1248

The Asiatic Society Of Bombay
THIS MANUSCRIPT HAS BEEN ADOPTED FOR
MICROFILMING BY :-
SHREE . P. H . KARANI
Date 17·10·2008

अथचंपूवृत्तिप्रारंभः ग्रंथसंख्या १०३७५

Chumpoo Vrittee

२

1248

अथचंपूवृत्तिप्रारंभः ग्रंथसंख्या १०३७५

Chumpoo Tritee

२

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

चं० वृ०

१

॥श्रीगणेशायनमः श्रीसरस्वत्यैनमः॥ ध्यात्वासरस्वतींदेवींविबुधानंददायिनीं॥ स्फवर्णांपुण्यरूपांतामलंकारविराजितां॥१
अर्थः॥ पादाब्जांगुलिसत्कनिर्मलनखावदेशेपुब्जोरुप्रयी॥ नित्रेषाप्रतिबिंबितांतरमुदायस्यानमंतिप्रभोः॥ अप्राप्त
परभागसंसृतिभयाल्लीननदीनाम्नातौ॥ तंपार्श्वंफलवर्द्धिकेश्वरमहंनत्वोपसर्गापहं॥२॥ प्रौढंप्रौढयुगप्रधानपदमाभ्राज्य
प्रनीतंपुरा॥ देवीजयाभुवितागदेवभविकश्राद्धस्यसाक्षात्पुरः॥ योगिन्यापिवयेनमंत्रमहिमाप्रागभ्यतेज्जिग्यिरे॥ स्तुत्वा
श्रीजिनदत्तसूरिमघंनतीव्रप्रतापारुणं॥३॥ जिनकुशलंकृतकुशलं॥ प्रारब्धविशेषशास्त्रसिद्धिकरं॥ प्रणिधायमन
सिमानसमिवशुचिहृदयंमहामानं॥४॥ श्रीचंद्रपालोत्रकियत्सदानां॥ यद्यप्यनिंद्यांविवृतिंचकार॥ तथापितच्छेषपदा
र्थमार्थप्रकाशनार्थांविवृणोमिचंपू॥५॥ कश्चित्पुरेवरेण्यपुण्यमतिभाक्प्रबोधितसकलशास्त्रोपनिषत्कमलोविम
लोध्वस्तसमस्ततम सर आदित्यइवनेमादित्योद्विजोबभूव॥ तस्यस्फूर्तिस्विविक्रमःपवनान्यकर्मविहितविक्रमस्सम
जनिष्टगरिष्ठः॥ अन्यदाहिस्वपित बंधुविवादादिप्रयोजनेबहिर्ग्रामंगतेसमाजगाममतिमान्कश्चिदपरस्तत्पुरे
विद्वान्॥ तेनचरं न्वेषिणावसरंप्राप्यनृपस्तदा मयासार्द्धंनकोपिवादंकर्त्तुमलं॥ यदिपुनःश्रीमतांपुरेकश्चि
द्विपश्चित्स्यात्तदामयासमंसमंतात्कृतप्रतिपक्षापवादोवाग्मःकार्यतांवार्य्यतांवादिद्वृतत्राकापिशाचिकाततोराज्ञा॥
नेमादित्यगृहेस्यानुचरोमुमुचेतेनचागत्योचे॥ नेमादित्योभ धवेना कृहवासिभिरवाहिसंधत्यसोबहि
र्ग्रामंजगामेति॥ ततस्तत्पुत्रेणवाहूतस्तेनाचिंत्यतावंतमनेहसमयासत्यपिस्वतंत्रस्कृतंत्रेस्वपितरिविनतरिपाठकेनाध्या
पि॥ अथबालिशोऽलसःकिंकरोमि॥ नहिबलवतिपरबलेसमुपस्थितेद्विजोरःशिक्षयितुंशक्यते॥ नहिसरित्पुरेभरप्रभ
तेऽतिथीभूतप्रभूणांपिप्पलीबंधंकर्त्तुंप्रभूयात॥ ततोऽनन्यगत्यावमत्यदैन्यंस्फारस्फरनिकरप्रणतांस्वगृहाधिदेवतां
श्रीभारतींप्रणनाम॥ विहितस्वपक्षस्फूर्त्तयेकामितपूर्त्तये॥ ततस्तेनमातर्भारतिअद्यासौवावदूकोवादीसमुपस्थितः १

115/1933

तेनसहवादःकर्त्तुंयुज्यते॥ नममवक्ताचिदस्त्यिर्युक्तिबलेनतंजेतुं॥ मतःअसद्यस्त्वद्भक्तमुखेनिवसेत्फलेप्रावान्परभ्रेभ्य
रो॥ अरेनिर्भाग्यत्वात्प्रतिनप्रसीदामि॥ परंभक्तिः कृताविफलानसंपद्यतेभवतांकुलेहमहर्निशंपूज्याचातोया
वात्वपिताप्रनागच्छे॥ तावदहंत्वन्मुखनपिताप्रवसामि॥ माचिंतांविधत्त्वस्वच्छमतिविधत्स्यकुरुष्ववादेतेनसमंमप्र
मत्तासत्यायातंविद्यामदोन्मादिनंवादिनंजेष्यसीत्युक्तमहर्षोत्कर्षसमाजगामगुणग्रामाभिरामोराघवस्यसदसि॥ त
तोहेलयाविविधवचश्चातुरीविहितवासवेज्यघृणया अप्रमेयप्रमेयप्ररूपणयानिर्जित्यतंभूपसमक्षंविपक्षंतद्दानो
पदाकृतकनकादिवस्त्रपादाय्यचरूसनिर्जितमदनोविकसितवदनोराजराजदत्तमबंधधुरसिंधुरस्कंधाधिरूढःप्रौढवारां
गनाबीज्यमानप्रधानातिमानप्रकीर्णकयुगलस्समियायमहामहप्रायसुंदरंनिजमंदिरंततोचिंतयच्चित्तेयाववसि
तानेति॥ तावत्सरमेऽपि ममप्रतिनिधत्ते॥ तेनाहंपित्रागमनादर्वाक्यशोर्थंकंचित्काव्यग्रंथंग्रथ्नामितदाचास्यतउक्तं॥ यतः
क्षणध्वंसिनिसंभवेस्मिन्॥ काव्यादृतेन्यत्क्षयणेतिसर्वं॥ अतोमहद्भिःयत्रासक्तिश्रायप्रवर्तितःकाव्यकथाप्रसंगः॥ का
व्यप्रकाशेयुक्तं॥ काव्यंयशसेर्थकृते॥ व्यवहारविदेशिवेतरक्षतये॥ सद्यःपरनिर्वृतयेकांतासम्मितयोपदेशयुजे॥
कालिदासादीनामिवयशः॥ श्रीहर्षादेर्धावकादीनामिवधनं॥ राज्ञादिगताचिताचारपरिज्ञानमादित्यादेर्मयूरादीनामि
वानर्घनिवारणमित्यादिविचार्यचातुर्यसंबंधानलदमयंतीयकथांकर्त्तुमुद्यतवान्नलस्यपुण्यश्लोकत्वेनप्रकाशत्वात्
ततोनुदिनंसक्करतीलालित्यमनुसरता॥ नल॥ थाविलाससागरंतरतातिनतलकथायाअन्यूनाःसप्तोच्छ्वासायावत्तविनि
र्ममिरेतावतापितातत्क्षामादाजगामस्वात्मगृहद्वारं॥ ततःश्रीभारतीप्रतिश्रुतंकार्यंनिर्वाहास्वावासमलंचकारततएताव
त्येवयंचंपूकथास्थितेतिश्रीगुरुप्रवादः॥ ॥अथ॥ सकलमंगलकारणंप्रत्यूहव्यूहनिवारणमभिधेयाद्युपयोगवनि
श्चयनशास्त्रादौकविनाकिमपिप्रणेयंतदतन्मनसिनिधायाभीष्टदेवताप्रणतिपूर्वमवसाध्यमारंभणीयंइतिशिष्यवारा

च०टी०
२

नुलंघनेन सकलजलनिधिरपि जलैरलब्धमध्यो विविचित्रपदपंक्तिसरित्साथो वीथिसंघट्टः श्रीत्रिविक्रमभट्टः प्रतिपा
दनीयमर्वरसकथोपक्रमे सदा शृंगारित्वादि इदानीं दानं कांतनांतरसादुत्वा दीनरागप्रभृतीं श्वापहाय सर्वरसा
त्मकं सर्वमतश्चरंचांकरमवस्तुवन्नाह॥ ॥जयतीत्यादि॥ ॥चंद्रमौलिः कथाशुभ्रास्वरा जयति सर्वोत्कर्षेण व
र्त्तते॥ ननु नमस्कार एव विघ्ननिरासकत्वेन प्रसिद्धस्ततः कथं तं परित्यज्य जयतीति प्रयोग उच्यते। जयतीति पदेन स
र्वोत्कृष्टता प्रतिपादिता भवति। सर्वोत्कृष्टश्च नमस्कार्य एव॥ यत्र सर्वोत्कृष्टत्वं तत्र नमस्कार्यत्वमित्यविनाभावादेतो
जयतीति पदेन॥ नमस्कारप्रतिपत्तिः नमस्कारेण प्रबंधकर्तृव्यास्यात् श्रोतॄणामिष्टफलसंपत्तिः किंभूतः श्चंद्रमौ
लिः गिरिसुतायाहिमाचलदुहितुः पार्वत्याः संबंधिनि कामसंतापं वहतीत्येवं शीलं कामसंतापवाहि तस्मिन् काम
संतापवाहिनि मनोभवप्रभवपीडांदधाने उरसि हृदये चंदनस्यायं चांदनो रसनिषेक इव संतापापहरणाद्राहणहुमर
साभिषेक इव यः॥ ॥यथा चंदनरससेकस्तप्तस्य शांतिकृद्भवति॥ तथायमपि कामाभितप्तगिरिजाहृदयस्य शांति
कृत्॥ ॥रसानिषिच्यंते ऽस्मिन्निति रसनिषेकोरसाधार इत्यप्यकदेशेन प्रतिपत्तव्यं। रसाश्च शृंगारादयो नव। तां
श्च कवय एव व्यक्तीकर्तुं प्रभविष्णवः अतस्तदनु तस्य रसाधारस्य भगवतो अनुपश्चाद् इस व्यक्तिकारणभूतानां कवीनां
वाल्मीकिव्यासकालिदासप्रभृतीनां वाचां विलासा वाग्विलासो वचोवैचित्र्यो विजयंते॥ किंभूतानां कवीनां कवीकीर्त्तिय
शोभाजां मितीति कीर्त्तिभाजस्तेषां यशस्विनां किंभूता वाग्विलासाः असकृदजस्रं अमृतबिंदूनतत्समानान्रसातिरेकान्
स्पंदंत स्रवंतीति अमृतबिंदुस्पंदिनो निरंतररसाविष्कारिणः असौ हि भगवान् जगत्कर्त्ता त्वाज्जगतोप्यादिरलौकिकं
पदमध्यास्ते। अतस्तस्य पश्चाद्यलौकिकाभावारम्यस्वभावास्तदपेक्षयैव वाग्विलासानां विशेषजयः। अथवा। वाग्विलासा वि राम
जयतइति स एव भगवान् शब्दब्रह्मस्वरूपसकलव्यापित्वनगतोऽसकृदमृतबिंदुस्पंदितादिविशेषणजयतियतामूर्त एकस्याएवगो २

117/1933

र्या उरसि तथा चांदनएवरसनिषेक इति व्यतिरेकः॥ ॥अत्र च प्रथमाद्धप्रतिपादितेनार्थेन वक्ष्यमाणप्रबंधार्थोद्योपपद्यते
॥तथाहि॥ गिरिभीमनपसर्य स्वभावपर्वतं जल इत्यक्तस्तस्य सुताया दमयंत्याः दुर्वारस्मरविकारसंतप्ते उरसि नलश्चं
दनरसनिषेको भविष्यति॥ स च चंद्रवंशानां मौलिर्मुकुटायमान इति॥ ॥यद्यपि पूरणगुणेत्यादिना षष्ठीसमासनि
षेधात्तदन्वित्यत्र समासश्चिंत्य॥ तथापि तदनुतदुपरीत्यादयः प्राह्याः ससमासाः महाकविनिबद्धत्वात्साधवः। यद्य
प्यन्यतरग्रहणस्याभीष्टसिद्धिस्तथापि स्त्रीपुंसरूपयोः द्वयोर्ग्रहणं काव्यस्य शृंगाररसनिर्भरद्योतनार्थं॥ अत्रास्य विशे
षणवक्ष्यमाणत्वात्॥ मालिनी॥ १॥ यश्च जगतः शिवमाशिभ्यां शिवाभ्यामपि केनाप्यतर्क्येण हेतुना स्वीकृतः तत्किं सहा
यः किं मूलं किमुपकरणं च। काम इत्याह॥ जयति मध्वित्यादि। कोप्यद्भुतवैभवः कंदर्पदेवो जयति॥ किंभूतो मधुसहाय
। वसंतसखः नहि संस्वायमंतरेण कश्चिन्महाकार्यकारणाय प्रवर्त्तते॥ एतस्यापि कृत्स्नं जगत्साध्यमतो मधुमित्रमकरो
त्॥ पुनः किंभूतः॥ सर्वा यासंसारवल्ली उत्पत्तिरद्भिमत्वाद्भवस्य वल्लूपमानं तस्या जननाय उत्पादनाय नवकंदः क
विनकंदः। कविनकं दारि अविच्युता वालदृष्टिः। तदनु कंदर्पदेवादनंतरं तदुत्पाद्यस्तदुत्पादकश्च। पुनः मुहुः। अपांगा
लंगनं चापांतप्रदेशे क्रीडसंचारितानां कामुकजनलक्षीकरण। यत्र वर्त्तितानां तरुणया पिल्लोचनानां नवयः सुंदरी नेत्रा
णां विलासः कटाक्षादिविभ्रमो जयति। पुनः शब्दा मुहुः शब्दवत्पौनरुक्त्यं वाऽभ्यासवीजवचनः॥ अथवा सकलजगज्जंतु
जातीयाभिप्रेतत्वात् नवस्वपि रसेषु शृंगारो मुख्यस्तस्य चाधिष्ठाता कंदर्पदेवो जयति देवः कामः॥ तस्य चालाद्योत्सादकत्वेना
विनाभूतत्वात् कांतानयनविलासो जयति॥ पुनर्विशेषणत्यर्थः पुनः शब्दो विशेषो॥ यथा निःकंदामरवंदिनीरुद्ध पुटिते
दृशां कज्जारुरुद्धलीजंबाला विलमंबुकर्तुमितरास्ते वरादोस्तान्॥ दृष्ट्वा सा पुनरर्णवार्मिसलिले रत्यावितायामियं। त्र
स्यापव त्रिनेत्राः स्थिताव समती सा पाप्मिणा पुत्रिणी॥ १॥ मालिनी अथ यदवादि। तदनु च विजयंते वाग्विलासा इति।
॥

तद्गुणानिवश्लोकत्रयेणाह॥ ॥अगाधेति॥ अहंसरस्वती भारतीनदीविशेषश्चतस्याइदंसारस्वतंश्रोतः प्रवाहंवंदे
नमस्कुर्वेस्तुवेवावदि अभिवादनस्तुत्योरिति धात्वर्थनिर्देशात्नदीपक्षेप्रवाहस्यतद्धर्मत्वात्नकिंचिदनुपपन्नंपरंभारतीप
क्षे। अन्यधर्मस्यान्यत्रारोपणलक्षणसमाधिनागिरांनेरंतर्योपि श्रोतःशब्दो॥ यथाउन्मिमील कमलंसरसीनां। कैर
वंचनिमिमीलमुहूर्तादिसत्रोन्मीलननिमीलनेनत्रधर्मावपिकमलकुमुदयोरारोपिते। किंकुर्वन्वहन्॥ भारतीपक्षे
अगाधामहार्घतया अलब्धमध्यांतर्मध्यप्रकरणान्मनसिपरिस्फुरद्ध्वनश्चमत्कारीस्फूर्तिविशेषोयस्यतत्॥ नदी
पक्षे अगाधागंभीरः अंतर्मध्यपरिसमंतात्स्फुरद्धवलनंआवर्त्तविशेषोयस्यतत्। तथागीःपक्षेविबुधानांदेवाना
मानंदमंदिरंभारतीविलासेनसुगणाभर्मपिप्रमादःसंपद्यते। अत्रविबुधानांपंडितानांआनंदस्थानं॥ नदीपक्षेवानांप
क्षीणांमध्येबुधाराजहंसास्तेषांहर्षस्थानं। पुनर्भारतीपक्षेरसानांशृंगारादीनांअंतरविशेषस्तत्रनेनवा। प्रौढंप्रगल्भं॥
नदीपक्षेरसायाःभूमेरंतरमध्यप्रवहतिस्मेति॥ प्रौढंगंभीरं॥ सरस्वतीकिलम्लेच्छदेशेन्यग्भूतदंते पुनरुद्भवतीति
लोकश्रुतिः कालिदासोप्युवाचनदीमिवांतःसलिलांसरस्वतीमिति॥ यद्वाम्भः पयोरस्यास्तीति कृत्वासरस्वतीशब्देनदीमा
त्रवचनः। यदनेकार्थः॥ सरस्वतीसरिद्भिदि। वाच्यात्मगायांस्त्रीरत्नेगोवाग्देवतयोरपि। अतःसारस्वतंनादेयंश्रोतोवंदे
किंभूतंवहन्प्रसरत्॥ पुनःविबुधानांदेवानांजलक्रीडादिभिःप्रमोदसदनं। एतावतास्वर्गमार्गप्रवृत्तं॥ तदुक्तं॥ तथारसायां
वसुधायांतथाअंतरेव्योम्नि अर्थात्पातालेप्रकर्षेणोद्धउत्यसाधारणविशेषसाम्यर्थात्त्रिपथगाश्रोतइत्यर्थः प्रौढमिति
प्रागूढांढत्यादिनावृद्धिः॥३॥ प्रसन्नाइति॥३॥ कस्यचिद्विशिष्टभागस्यपुंसः पुरुषस्यपुण्यैःश्रेयोभिरीदृग्गुणाःसुखेवा
वावाण्यांस्त्वदुवस्त्रियाभवंति। संपद्यंते। संजायंते। कीदृशोवाचः। नानेतिपदंसर्वत्रान्वयते॥ नानाअनेकधाप्रसन्नाःप्रसा
दगुणोपन्नाःसुबोधाइत्यर्थः शब्दगुणप्रसादः। अंतर्मिश्रितत्रोथित्याभ्यामर्थगुणस्तुप्रमादोवैमल्यंइगिति अवबोधगो

119/1933

चरत्वमिति॥ यावत्॥ तथाचाह। काव्यप्रकाशकारः॥ श्रुतिमात्रेणशब्दानांयेनार्थप्रत्ययोभवेत्। साधारणःसमग्राणां
प्रमादो ——— इति यद्वाप्रसंनाःसमासरहिताः उक्तंच॥ माधुर्यमभिवांछंतःप्रसादंचसुमेधसः समासवंतिभूयांसि। नप
दानिप्रयुंजते॥१॥ अन्यत्राप्युक्तं। बहुसमासवतीवृत्तिरोजः असमासवतीवृत्तिः॥ प्रसादइतितथानाना अनेकधाकांत्या
कांतिगुणेनदर्तुंमनोवशीकर्तुंशीलंयासांताः कांतिहारिण्यः शब्दगुणः कांतिरोज्ज्वल्यंग्राम्यादिभिरनतिप्रयुक्तत्वमिति
यावत्॥ अर्थगुणस्तुकांतिर्दीप्तरसत्वं। तथानानाअनेकप्रकारंशब्दगुणार्थगुणशब्दालंकारार्थालंकाररूपंतत्तुष्टाश्ले
षं विशेषणचक्षतइति नानाश्लेषविचक्षणाः। शब्दगुणोमसृणत्वं श्लेषःअर्थगुणस्तुश्लेषोघटनाशब्दरूतः॥ शब्दा
लंकारश्लेषः॥ अहचकाव्यप्रकाशकारःश्लेषलक्षणं॥ क्रमकौटिल्यानुल्बणत्वोपपत्तियोगरूपघटनात्मा श्लेषइति
स्त्रियस्तुप्रसंनास्तोषान्विताः। तथाकांत्यावपुषागुणविशेषेणमनोज्ञाः॥ तथाविविध आश्लेष आलिंगनेविचक्षणाः
दक्षाः आलिंगनान्यमूनिद्वादशस्पृष्टक१ विद्धक२ उद्घृष्ट३ पीडन४ लतावेष्टक५ वृक्षाधिरूढ६ तिलतंडुल७ क्षीरनीर८
रूपगूढ९ जघनोपश्लेष१० स्तनालिंगन११ ललाटिकाख्यानि॥४॥ किंकवेरिति॥ कवेस्तेनकाव्येनकिं॥ धनुष्मतोधानुष्क
स्यतेनकांडेनशरेणकिं नकिंचिदित्यर्थः। तेनेतिकेन। यत्काव्यंकांडंच। परस्यान्यस्यश्रोतुःशत्रोश्चहृदयमनसिवक्षसिचल
ग्नंचमन्रुतं। मर्मप्रविष्टंचसतशिरोमहीनंनघूर्णयति। नभ्रमयति शिरोघूर्णनंचहर्षव्यथयोराधिक्याद्भवति। हृदयंमा
नसोरमोरितिविश्वप्रकाशः अत्रचकाव्यसंबंधाच्चद्वयोरपिकवि धनुष्मतोरुपहासपरतयाप्रयोगः अत्रकिंशब्दःकुत्सार्थः
यदनेकार्थः॥ किंप्रश्नेकुत्सनेपिच॥ काव्यंसर्गबंधः। अथकुकविनिंदाव्याजेनविपरीतगिरामग्राह्यत्वमाह॥ अप्रगल्भा
इत्यादि। एककवयःबालकाइवमति॥ किंभूताःकवयः। पदन्यासविभजनंपदंतेषांन्यासेनैयत्यप्रयोगेअप्रगल्भाःअ
निपुणाः। तथाजनानांविदग्धलोकानांनीरागंरागाभावस्तत्रहेतवः॥ कारणंनहितादृशांकाव्यंश्रुत्वारसिकानांकश्चिच्चम

सं०टी०
४

त्कारः संजायंते। तथा बहुल आलापा येषां ते बहुलालापाः एतेन निःसारवक्तृत्वमिति॥१॥ बालकपक्षे पदंन्यासे चरणक्षे
पे अप्रगल्भाः। तथा जनन्यामातृरागहेतवो अनुरागकारणं। तथा वर्द्धीलोन्नं निष्ठीवनजलं पिबंतीति बहुलालापाः यद्वा
बह्वो बाला अप्रस्वरूपा येषु ते। कस्यरच्यः पद्मामनक्ष इति अत्यन्नयः समासांतः॥२॥ अत्र गंभीरार्थत्वात् कविभिरन्यथा
र्था उत्प्रेक्ष्यंते। तद्यथा एके कवयः अबालकाः जराजर्जरितदेहा इव तेपि अशक्तत्वात् पदन्यासे अप्रगल्भा एव तथा जनानां यु
वतिलोकानां नीरागं रागाभावस्तत्रहेतवः न हि जरद्देहयुवतिजनोनुरज्यइति। तथा निद्रालस्याद्याधिक्येन अबहुल आ
लापा येषां ते तथाविधाः॥३॥ यद्वा॥ एके कवयः वनकवया जलपक्षिण इव संति के जलवयः कवयः। किंभूता अरणं आरः अ
गंतायगत्यर्थास्त प्राप्त्यर्था इति वचनादारः प्राप्तिरात एव आरकः स्वार्थे करलयोरैक्यात् अपक आलकः प्राप्तिर्येषां ते त
था अत एव पदन्यासे अपक प्रगल्भा अप्रगल्भा बकादयः श्लेषो अक्षरच्युतिश्रवणादयः पलोपः। नीरं च अग गश्च नीरा
गा अजना सनरहिता नीरागा रिक्तत्वाद्यर्थहेतवः येषां ते तथा एकांतसजलवनस्थायिन इत्यर्थः। तथा अरणं आरो विहायो
गतिर्बहुलस्य आरस्य आपः प्राप्तिर्येषां ते बहुलालापाः श्लेषरलयोरैक्यत्वश्रवणात् सपक्षत्वेन बहुलनभोगतयः॥४
यद्वा॥ एके कवयः बालकाः कस्याबाला बालका अत्यास्यायां कनूत्पर्णकुंतला इव संति ते न किंभूताः पदंन्यासे वर्णालक्षण
स्थानरचनायां अप्रगल्भा असंस्कार्यत्वात् तेन जनानां युवलोकानां रागाभावजनकाः। सपुष्पमाल वर्णविन्यासेन बहु
एव के गारागजनकाइति। तथा अलीनां समूह आलं पद्मिनीमुखवर्त्तित्वेन कर्णोत्पलनिकटवर्त्तित्वेन वा बहुलः आलस्य भ्रम
रसमूहस्याप प्राप्तिर्येषु ते पद्मिनी मुखस्य कर्णोत्पलस्य च कर्भित्वात्॥ यद्वा बहुला इदं त्रविषेशे आपः प्राप्तिर्येषां ते तद्देशेहि
अदीर्घा एव केशाः स्फुरंति। डलयोरैक्यात् बहुलालापाः॥५॥ यद्वा एके अबालकाः पंडिताः कस्य ब्रह्मणो वयः पक्षिणो राजहंसा राम
इव संति किंभूता राजहंसाः पदंन्यासे चरणंन्यासे सति प्रगल्भतीति प्रगल्भन् प्रगल्भ अप्रगल्भ एवंविधा अक्षरा भाप्रभा ४

121/1933

येषां ते। ब्रह्मवाहनत्वात् अत एव जनेषु निश्चितं राजंते इति जननीराः स्कविदुः॥ तथा मे गमनं तत्र हेतवः। विधेर्गमने
कारणं तथा लक्ष विलास ललनं लालो विलासो बहुलोलस्य लीलाविशेषस्य आपः प्राप्तिर्येषु ते बहुलालापाः॥६॥
यद्वा आरूढ नव एके कवयः अबालकाः प्रौढा इव संति। तव इत्यत्र श्लेषाद्विसर्गलोपः हे प्रगल्भाः पदंन्यास प्रगल्भं धृष्टं
प्रकरा हूलिं अस्यति पाताले क्षिपतीति प्रगल्भा ईदृक् विधः पदन्यासः क्रमक्षेपो यस्य सः तस्य संबोधनं। तथा इः कामः तस्य
जननी लक्ष्मीस्तस्या रागो यस्य सः इजननीरागस्तस्य संबुद्धौ हे इजननीराग न विद्यते बहुलस्य प्रभूतस्य आलस्यानर्थस्य
आपो व्याप्तिर्येषु ते आ दृव्यास्तै। अबहुलालापा एतत्क विविशेषणं॥७॥ यद्वा॥ एके कवयः अबालका इव संति किंभूताः
कवयः अवत विस्तुवत प्रगल्भाः कपदंन्यास पदरचनायां। यथा तेन पदत्रयेण विश्वत्रयं व्याप्तं तथा कविभिः स्ववचनरच
नया। तथा निप्रशंसणे जनान्नयंति कस्वं प्रापयंतीति जननन्यो रागज्ञानः स्तेषां रागहेतवः। तथा बहु अत्यर्थं लाति अर्थान्
यशा गर्कानीति बहुला एवंविधा आलापा येषां ते बहुलालापाः॥८॥ यद्वा हे एकामनव के कवयः बालका इव संति न केपि त्वां
स्नातुं सर्वेपि प्रौढा एवेति भावः। हे आपदंन्यासे अप्रगल्भ। आपदां समूह आपदं तस्य न्यसनं न्यासः स्थापनं तस्मिन् अप्रग
ल्भ। सर्वसंपत्निदानत्वात्। श्लेषाद्विसर्गलोपः॥ तथा हे जननीराग जनानां कामुकलोकानां निश्चितो रागो यत्रेति दृष्टिकामस्त
हभेदन मगस्य श्विवियत्वात्॥ बहुलः संभोगविप्रलंभादिविषय आलापो येषां ते बहुलालापा इति कविविशेषणं॥९॥ अथ प्र
रणं विनापि कवित्सरात्कर्ष मसहिष्णवस्तस्मान् च वस्तु ज्ञानकाव्य प्रवृत्तिभंगहेतून् त्रोद्रमात्रेण गौरवयन्नाह॥ अक्षेति॥ दुर्नि
दायां दुष्टः कृत्याकृत्य भव्याभव्य विशेषविवक विकल्पजनाद् दुर्जनास्तेषामियं दौर्जनी संसत्सभा वंदनीया नमस्कार्या इत्युप
हासवाक्यं श्लेषतस्तु वंदगुप्ताक रणीया वंदनीया। कथं ब्रह्मणां विप्राणां इयं ब्राह्मी संसदिव द्विजसभेव यथा द्विजसतां वं
द्यं तथा दुर्जनसंसदपि वंद्या। किंभूता दौर्जनी संसत् अक्षमया रूपाय आलापः संभाषणं तस्य वृत्तिं व्यापारं जानातीति अक्षमा

चं० टी०
५

लापवन्निज्ञाकोपोल्लापयुक्तवाक्त्रसता। तथाकुशासनस्य कुत्सितवीक्षणस्य परिग्रहः स्वीकारो यस्यां सा कुशासनपरिग्रहा
तथात्यमसाधावपि खला प्रतिपक्षभूता। असाधौ यदि खला प्रभवति। तदा भवतु परं साधावपि खलेत्यनौचित्यविस्मय
मिश्रमसमुच्चयार्थोऽपिशब्दः प्रतीयते॥ किंभूता द्विजसभा। अक्षमालाया जपमालाया अपवर्त्तिर्भ्रमणं तां जानातीति। त
था कुशस्य दर्भस्य आसनं विष्टरस्तस्य परिग्रहः स्वीकारो यस्याः सा। पवित्रस्य पवित्रत्वात् तदासेव्यमेव तस्या उचितं पुनः
किंभूता सद्मखलया। सोऽप्यावर्त्तत इति समखला॥ ॥ ब्राह्मीमिति तस्येदमित्यण्। ब्रह्मण इत्यत्रास्वरादिलोपः। ब्रह्मा
नुतपञ्चि वेदध्यानं द्विजविधा। ऋत्विग्योगविभिदोश्चेत्यनेकार्थः॥ समंसा ध्वनिर्वलंसदृगित्यनेकार्थः॥ ७॥ रोहणमि
ति॥ अहं विपश्चितां विदुषां वृंदं समूहं वंदे। नमस्यामि॥ किंभूतं शोभनानि निर्दोषगुणसरससालंकाराणि उक्तानि कृ
थितानि सूक्तानि सुभाषितानि हान्यवरत्नानि तेषां सूक्तरत्नानां रोहत्यस्मिन्निति कृत्वा रोहणं उत्पत्तिस्थानं॥ तन्नमस्कारे
ण हेतुमाह॥ यस्य विपश्चिद्वृंदस्य मध्यपतितो यन्मध्यपतितः सन् काचो बंधः प्रकरणात् काव्यबंधो नीचोऽप्यतादृ
शोऽपि उच्चैः उत्कृष्टां मणिरिवाचरतिस्वप्रबंधकर्त्तारं भूषयन्मणीयते। विपश्चितो हि कृविपरिश्रमं जानंतो ऽतादृशमपि प्र
बंधव्याख्यानप्रसंगाद्दनुगृह्णंत्युत्कर्षं लंभयंति। कृत्वबंधकत्वंतव ध्यंत अनेनार्थान्तर अस्मिन्निति वाच्यः निकाचः प्रबंधः॥ अ
थ वरारोहणं माणिक्यशैलं स्तौमि यस्य मध्यपतितः काचः क्षारमृद्विकारो नीचोऽपि निकृष्टोऽपि रत्नसान्निध्यान्मणीयते रत्ना
यते॥ ८॥ आस्तां सज्जनदुर्जनयोः शीलेन साम्यं यावन्मूर्त्त्यापि महदंतरमिति निरूपयन्नाह॥ अत्रीति॥ अत्रमुनि
नेव जन्मत्वात्रिज्ञानस्य त्रयोऽस्ति न ज्ञातो कस्य चपुनः नरिष्टिर्जातस्येत्यद्भिजातस्य अथार्थात्कुलीनस्य सज्जनस्य सता याम्
र्त्तिः आगिरमेवराजगन्मैत्रीपरा वर्त्तते। सा मूर्त्तिर्व्यस्फुटं रत्रिज्ञातस्य निवासभूतस्य तमसो अंधकारस्य दुर्जनस्य त्रिज्ञात
स्य अकुलनस्य कृवर्त्तते॥ न कापीति॥ यतो दुर्जनस्य मूर्त्तिः वैराविरहेतुः अत्रश्लेषान्न्यायातलोषः अथवा ग्निश्तमसाः राम
५

123/1933

सज्जनदुर्जनयोश्च सहजं वैरमिति विरोद्धतो दुर्जनस्य कृसाम्मूर्त्तिरिति॥ अथवा दुर्जनस्य मूर्त्तिः कृ अवैरा अपि तु सर्वो
त्रापि सवैरेत्यर्थः। मूर्त्तिः पुनः प्रतिमायां काठिन्यययोरपीत्यनेकार्थः॥ ९॥ निश्चितमिति॥ सत्कृत्रसाः शृंगारादयो य
त्र तत् ईदृक् विधं वंठं चितं काव्यं काव्यग्रंथं यो नाभिनंदति नाभिप्रैति न स्तौतीत्यर्थः। स निश्चितं ध्रुवं सहस्रयाव
र्त्तत इति कृत्वा ससुरो मधुपः कोऽपि न वकुलिनो नाभिजातः पुनः सर्वथा सर्वेणापि प्रकारेण समे साधावमतिः सर्वथा सा
धुविषयां मतिं मिष्टां सवनादिरूपां न करोतीत्यर्थः॥ अथच॥ अक्षरैः संबंधं मीलितं अक्षरसंबंधं काव्यं शु कम
भिलक्षीकृत्य यो न नंदति न हृष्यति स क्षरोदवः कोऽपि। तथा न कोऽप्यस्यां लीनत्रोऽभिलिष्टः स्वर्गे एव तस्यावरुद्धानात्तथा
मालक्ष्मीः ऋः कामस्ताभ्यां सह वर्त्तत इति समं विष्णुस्तत्र सवनाय मतिर्यस्य स मे मतिर्विष्णुपक्षीय इत्यर्थः॥ १०॥ संप्रति
वाग्विलासाधारान् उदारान् वाल्मीकिप्रभृतीन् कतिचित् कवीन्वर्णयन्नाह॥ सदूषणेति॥ तस्मै श्रीवाल्मीकिमुनये न
मः॥ तस्मै शतकस्मै येन कविना रम्या शब्दार्थदोषरहितत्वादमणीया रामायणी कथा चतुर्विंशति सहस्रप्रमाणा कृता
विदधे॥ किंभूता कथा दूषणखरौ राक्षसौ॥ सह दूषणेन वर्त्तत इति सदूषणा। तथा निर्दोषा दोषरहिता पुनः सह खरेण
वर्त्तत इति सखरा दूषणखरयोरत्रैव ध्यत्वेन प्रणीतत्वात् तथा सह कोमलत्वेन मृदुत्वेन वर्त्तत इति सकोमला माधुर्य
गुणापन्नेत्यर्थः॥ अपि विरोधे सच दूषणखरयोर्दोषार्थं कतिनार्थत्वभवत् कथं या सदूषणा सदोषा भवति स निर्दोषा अप
गतदूषणा कथं स्यात्तथा सह खरेण खरत्वेन वर्त्तत इति॥ सखरा या सखरा भवेत् सा सकोमला कथं भवेदिति विरोधः
समाधिस्तु प्रागेवोक्तः। कोमलशब्दः स्वरशब्दश्च शुक्ललक्षणादिवत् भावप्रधानत्वेन ग्राह्यौ॥ इहानुक्तोऽपि वाल्मीकिः प्र
तीयते प्रौढः विशेषणप्रयोगात् विशेष्यप्रतिपत्तिरिति वचनात्॥ किंवा सो भगवान्मर्त्यलोके काव्यसृष्टिप्रथमवेधानि
रूपम्परमणीयकृरामायणनिर्माणप्रवीणतयैव निर्दिश्यमानः प्रकृष्यते न त्वितरसाधारणसंज्ञामात्रनिर्देशेन। अत

चं०टी०
६

एवकविनोत्कर्षं चमत्कृतनवाक्यसमाप्तिं प्रतीक्षितुमक्षमेण चित्रविक्रमेण वाक्यगर्भेपि। नमस्मैनमइति भक्तिप्रकर्षप्रकाश
नमुक्तं। अर्ङ्गेयाव्यत्यासपाठेतु। गर्भितदोषउक्तिर्नस्यात्। नमस्तस्मै कृतेत्यंतत्पदद्वयस्यादावुपन्यासेसद्दूषणेत्यादि
दलस्यचा॥ न न्यासेनतद्दोषसंभवइतिभावः। नमइतिपदस्य पूर्वमेवन्यासात्॥ रामोऽस्यतज्ञायते ऽस्यामितिरामाय
णी अधिकरणल्युट्। स्वरादुत्तश्चेतिणत्वं॥११॥ किंच॥ व्यासइति॥ सव्यासः कृष्णद्वैपायनाख्योवंद्योनमस्कार्यः सइ
तिकः। यत्कर्ता। इदृशीसर्वत्रख्याता। भवसंसारेगार्वाकृस्रष्टानिर्मिता किंभूता विस्तारिविस्तरणशीलं भारतंयस्यां सा
विस्तारिभारती किंभूताव्यासः क्षमाभृतां क्षमांबिभर्तीति क्षमाभृतस्तेषां क्षांतानांमध्येश्रेष्ठः। अतिशयेनप्रशस्यः। कः
इवहिमवानिव। यथाहिमवानवंद्यतेगौरीपितृत्वात्। सचकीदृशः क्षमाभृतांभूधराणांमध्येश्रेष्ठः श्रेयान्। तथाय
नहिमवतांवंभक्तिविरता अनुरक्ताईदृशीविश्वविख्यातागौरीपार्वतीनिर्मिता। कीदृशीविस्तारिणीभादीप्तिर्यस्यासावि
स्तारिभा॥ भरतान्भरतवंशोद्भवान्युधिष्ठिरादीन् अधिकृत्यकृतंशास्त्रंभारतंसपादलक्षप्रमाणं। क्षमाक्षांतिः क्षोणी
च। भवः सत्ताभिजन्मसु। रुद्रेश्रेयसिसंसारेइत्यनेकार्थः। गौरुदाकद्विरि। स्वर्गदिशिपशौ। वज्रभूमाविषौगिरित्य
नेकार्थः। (गौरुदाकदंत्रि। स्वर्ग)॥१२॥ कर्णांतेति॥ भारती भरतात्यसंभूतयुधिष्ठिरादिवृत्तसंबद्धा। कथाकस्यनआ
ल्हादंकरोति। अपितुसर्वस्यापिकरोतीत्यर्थः॥ किंभूताभारतीकथा। कर्णस्यराधेयस्यांते विनाशेसतिविभ्रमेणविस्मये
न। वेः पक्षिणः गरुडस्यभ्रमणवा अतिलाघवेनभ्रांताविचरितुंप्रवृत्ताः कृष्णार्जुनविलोचनावासुदेवपार्थधृतराष्ट्राय
स्यांसाकर्णांतविभ्रमभ्रांतकृष्णार्जुनविलोचनातथांतत्रप्रबंधनाख्यानात्केवकांतेवसुंदरीवायथाकांतासर्वस्यआल्हा
दंकरोति॥ किंभूताकर्णांतश्रवणपर्यंतयाविभ्रमाविलासः स्तनभ्रांतसाचिविलोकनायस्फुरितकृष्णार्जुनेश्यामबल
क्षेविलोचनेनेत्रेयस्याः सातथाविधायद्वाकर्णांतश्रवणपर्यंतगामिनीविभ्रमभ्रांतकृष्णार्जुनेचविलोचनेयस्याःसा

राम
६

125/1933

भरतानधिकृत्यकृताभारती अधिकृत्यग्रंथइत्यण्॥१३॥ शश्वदिति॥ गुणाढ्येनबृहत्कथाकारेणनिश्शेषः सर्वो
जनोरंजितः आवर्जितः प्रमोदंप्रापितः किंभूतेनबाणः कविर्द्वितीयोयस्यसतेनएवंगुणाढ्येनपश्चाद्द्वितीयेनबाणेनचे
तिभावः पुनः किंभूतेनत्रा अश्वन्निरंतरंनमदाकारंस्तनधृतादिरूपंधरतीत्येवंशीलोमदाकारधारीतेनमदाकारधारिणा
किंत्वगर्णानित्यः समासविधिर्भिन्नवचनादत्रनयानसमासः॥ केनेव। धनुषेवयथाधनुषबाणद्वितीयोयस्यतत्तेन। आकृष्टबाणे
नत्राश्वदनिशं। अरमत्यर्थंनिश्चयः सकलोजनः प्रतिपक्षलोकोजितः पराभूतः किंभूतेन। गुणाख्यातेन आढ्येनसमृद्धेन
आरोपितप्रत्यंचेनेत्यर्थः। तथानमनपआकारस्तद्धारिणातद्विभूता अन्यथाबाणोमुक्तेः॥१४॥ इदानींकविवर्णनंसंक्षि
पन्नाह॥ इत्थमिति॥ इत्थंउक्तप्रकारेणयेषांवाल्मीकिप्रभृतीनांकवीनांकाव्यंसर्गबंधः विचित्रविस्तीर्णवस्तुरसग्रथितावृत्ता
साद्यावाकथा। महापुरुषप्रतिबद्धमुपदेशरूपंसंक्षिप्तवत्तकथितंकथानकंतेषांयेरसाः शृंगारादयस्तैः काव्यकथाकथानकर
सैः अमी इत्युगीनविद्वांसः कर्णौचहृदयंचकर्णहृदयंद्वंद्वश्चप्राणितूर्यसेनांगानामितिद्वंद्वैकवद्भावः परिपूर्णंसामस्त्येनो
भिन्नंकर्णहृदयंयेषांतेपरिपूर्णकर्णहृदयाःसंतिअतोवाच्यस्यार्थस्यविवेकेसदसद्धाराविकृत्वाअधीराधीर्बुद्धिर्येषांतेतेषांउ
भियविरचनविधुरत्रमुधीणामाद्गामनत्वज्ञानादिदृम्भिधाश्वतश्चमत्कारकरणापटवोवाचावाण्यः किलक्वावकाशंलप्स्यं
तिस्थानाभावात्कुकिलत्सत्यसंभावनेगिरांह्यवकाशः कर्णयोर्हृदयेवातत्रद्वयमाद्यकविवचोभिरेवाभितमतः क्वावकाशः
। किं कइवपयोभिः कुंभाइव॥ यथापयोभिः परिपूर्णकुंभादराः कुंभांतरस्यपानीयस्यावकाशंलभंते। इवार्थेयथाशब्दः॥ तर्हि
किंकथाग्रथनप्रयत्नेनत्याज्यंस्यात्। अथवतिउपायस्मरणगर्भपक्षांतरसूरयोविद्वांसः सर्वंसहंतेइतिसर्वसहाः तस्मादस्मा
दृशामपिगिरः सहिष्यंते। अस्मद्विरापितत्कर्णहृदयेऽवकाशंलप्स्यंतइत्यर्थः॥ आइत्यपरिहारोयं। सर्वसहाइतिपूः स
र्वेयारंगिसहारितिसर्वशब्दसहः खच्। खित्वान्मुमागमः॥१५॥ भंगश्लेषमुक्तिविशेषणसंयुग्वन्नाह॥ वाचइति॥ वचो

चं०टी०
७

गिरोभंग श्लेषविशेषतो। भंग श्लेषातिशयेनकाठिन्यंकाकंश्यमायांति प्राप्नुवंति॥ ननांतरांतरानिबध्यमानेतत्र भं
गश्लेषनोद्वेगः कर्त्तव्यः नोद्विजितव्यं यस्माद्धेतोः कवेः काव्यकर्त्तुर्नैकारसः नैकारुचिः प्रसत्तिलक्षणा। व्युत्पत्तिल
क्षणाप्यस्ति॥१८॥ ननुप्रसत्तिमार्गेण कोमलमेवकाव्यंनिबध्यतां। किमितरेण व्युत्पत्तिमार्गेणभंगश्लेषकृतकाठि
न्येनोद्वेगहेतुना इत्याह॥ काव्यस्येति॥ कोमलस्यप्रसन्नस्य इतरस्यव्युत्पन्नस्य चकाव्यस्यबंधछायाविशेषणरच
ना चारुत्वनरसोपिशृंगारादिरपि अनन्यरूपोप्यन्यादृशोऽन्यरूपोव्युत्पत्तिकर्त्तयासोत्कर्षः स्यात्। इतरभाजनरुद्ध
क्षीरद्रव्यभाजनरुद्धक्षीरवत्। अपिःसंभावने। काय्यव आम्रफलस्येवयथा आम्रफलस्यकोमलस्यापरिणतस्य
इतरस्यपरिणतस्यबंधस्यवृंतस्यच्छायायाश्चनीलपीतादिरूपायाविशेषणयावद्रसःस्वादोप्यन्यादृक्स्यात्
आम्राआकारेवसदृश्यंतुबंधच्छायाविशेषणभवत्यवेत्यर्थः॥ बध्यतेऽनेनेतिवृंताबंधोरतं। यद्वाफलारंभक्र
मकणिकारूपोबंधः काव्यपक्षेबंधोरचना॥ अथग्रंथकृतस्यान्वयवर्णनामाह॥ अस्तिअसमस्तेत्यादि। त्रांडि
त्यनाम्नोमहर्षेर्वंशोन्वयोऽस्तिविद्यतइत्यन्वयः। किंभूतस्यमहर्षेः। समस्ताये मुनयोवाचंयमाः मनुजानांम
नुष्याणां यद्वृंदं कदंबकं वृंदारकादेवास्तेषांवृंदं समस्तमुनिमनुजवृंदवृंदारकास्तेषां वंदनीयेनमस्कारणीयेपा
दारविंदे चरणाब्जेयस्यसतथातस्य। तथाभगवतः समग्रैश्वर्यादिगुणयुक्तस्यविधेर्ब्रह्मणो विश्वव्यापीजगद्धा
पनशीलोयोव्यापारःकरणप्रयत्नस्तस्ययत्सारवश्यंपारतंत्र्यंतस्माद्विश्वव्यापिव्यापारवशात्। संसारचक्रे भूमं
ले अवतीर्णस्यप्राप्तजन्मनः तथाक्रतुक्रियाणांयज्ञकर्मणांयत्कांडकलापस्तेनत्रौंडिविख्यातस्तस्यक्रतुक्रिया
कांडत्रौंडस्य। यज्ञश्चलोकानांशांतिकृदसौचयज्ञक्रियाकलापप्रसक्तस्तेनायंप्रजाशांतैप्रजास्रष्टइतिभावः॥ राम
कांडनालेऽधमेवर्गे इत्यनेकार्थः॥ त्रौंडविख्यातमत्तयोरित्यनेकार्थः॥ तत्रत्रांडित्यनाम्नोमहर्षेर्वंशेकेचित् अन ७

127/1933

चानाः श्रोत्रियाः सांगवेदशास्त्राध्येतारोब्राह्मणाब्रह्ममुखोद्भवाः श्रूयंते किंभूताः श्रवणेश्राकर्णने उचितायो
ग्याः पुण्यरूपत्वात्तेषांनामापिश्रोतव्यमितिभावः। किंकवंदनपल्लवाइवतेपिश्रवणोचिताः कर्णयोरवतंसीक
रणाययोग्याः। पुनः किंभूताः शुचयोजन्मकर्मादिभिः पवित्राः तथासत्यमवितथंवचोयेषांतेसत्यवचसः सूनृत
भाषिणः तथाविरिंचेः ब्रह्मणोवर्चस्तेजोयेषुतेविरिंचिवर्चसः। ब्रह्मणः समुद्भूतत्वात् वर्चस्कतेजसिगूथरूपइत्य
नेकार्थः यद्वंसशब्दस्यलोकानुग्रहीतत्वानल्पाख्यिवलिंगादिवनाश्लीलत्वं। यूनः॥ किंप। अर्चनीयः आभ्यर्च्य। आचा
रानुष्ठानंयेषांते अर्चनीयाचाराः पुनः ब्रह्मअध्यात्मोविदंतीतिब्रह्मविदः यदनेकार्थः ब्रह्मातुतपसिज्ञानेवेदे ध्याने
द्विजविधौ ऋत्विक्योगाभिदांश्रुति॥ अथतेषामेववर्णनप्रक्रमेविरोधमुखेनतान्स्तुवन्नाह॥ किंभूतास्तेपुण्याः पवि
त्राजनालोकाः पुण्यजनाः अलमत्यर्थंनश्येयकापुरुषाः कुत्सितपुरुषाः सत्पुरुषाइत्यर्थः नचेतिसामुदायिकोनिषेधा
र्थोनिपातो। तथासहस्त्रेण उपवीतेवेनेदपावनावर्त्तंतइतिससत्राः नचयेलंपटाः लालसाः अतितृष्णारहिताइत्य
र्थः। लंपटंलालसंविदुरितिहलायुधः तथाप्रसिद्धाश्चलोकेविख्याताचनयेलंपाकालंपटाः लंपाकोलंपटेदेशेइत्य
नेकार्थः। नथाकाममभिलषितंवर्षंतिददतीतिकामवर्षाईप्सितदाथिनोनचयेसन्मार्गस्यलंघनाः लंघयंत्यतिक्रा
मंतीतिमल्लंघनाः सन्मार्गप्रवर्तकाइत्यर्थः। तथानवंतारुण्यलक्षणंवयोवस्थायेषांतेनववयसस्तथाविधाअपिनच
येलंवादीर्घाः अलकाः कचाः येषांतेलंबालकाः यायज्ञकृत्वेनतेषामदीर्घाएवकेशाभवंति। तथाभारतंव्यासोक्तशास्त्रं
व्याख्यानावसरेच्याहुरिति॥ भारतिकामहांतश्चतेभारतिकाश्चमहाभारतिकाः श्राहेत्यर्थेप्रभृतादिभ्यउपसंख्यानंवकृत
र्थाविधाश्चवयः ऽरमंत्यर्थंगोपान्रक्षन्तनजीवंतिवृत्तिंकुर्वंतीतिगोपजीविनः। नृपदत्तप्रतिग्रहधनेननाजीविकांकुर्वंते
नृपात्प्रतिग्रहदोषाय। यदुक्तंयोराजः प्रतिगृह्णातिलुब्धाद्युच्छास्त्रवर्त्तिनः सयातिनरकान्घोरान्। सपुत्रपशुबांधवः

चं० टी०
८

तथा अपप्रथा। नाभिसरांसि अप्सरांसि। सेवितानि अप्सरांसि यैस्ते सेविताप्सरसः तथाविधा अपि नवये अरमत्यर्थं
भयान्विताया: सभाया:। इतितेषांस्तुतिपक्षः अर्थविरोधादन्वयं ते ये पुण्यं जनागक्षसास्ते कथं नलंका ङ्कवा अपि लंका
ङ्कवा एवं तस्यु:। तथा ये सदसत्रणतंतुनाविंध्यंत इति सस्वा: ते अलमत्यर्थं कथं न पटाः वासांसि अपितु पटा एव तन्म
यत्वान्नेषांतथा ये नक्रूपेणसिद्धा अग्निसंस्कारेण निष्टांप्राप्ता: यूपाद्यास्ते कथं अलं न पाका: पच्यंते स्मेति पाका: कर्म
णि घञ्। तथा ये कामेन छया वर्षंति पानीयं क्षरंति ये ते कामेन छया वर्षेस्ते कथं अलं अत्यर्थं घना मेघा न भवंति
। तथा ये नचवयसस्ते कथं न अलं बालका: शिशव:। तथा ये भरतानाट्यभेद: शिष्पत्वमेषामिति भारतिका: महांत
श्च ते भारतिकास्ते कथं न रंगा नृत्यभूमिस्तेन उपजीवंतीति रंगोपजीविन: नृत्यभूमौ नृत्यकरणेन वर्तयंति ते तथा ये से
विता भुक्ता अप्सरसो देवांगनायैस्ते सेविताप्सरसस्ते कथं न रंभयान्विता: रंभाख्याप्सरोन्विता: अप्सर: शब्दो जाति
वचना ज्ञात्या न्वरंभापि स्यादिति निषिध्यत इति विरोध: तत्परिहारस्तु पूर्वपक्षपक्षव्याख्यान एवोक्त इति एवं ते सक
लगुणगरिष्ठा: शिष्टा श्राकर्ण्यंते। किं बहुना किं बहूक्त्या अस्मादृशास्तेषां कियतो गुणानुवक्तुं क्षमा भवंतीत्यर्थ:
। यत: जानंतीति। हि निश्चयेन तद्विधा एव तत्तुल्यगुणा एव तादृशांतस्तुल्यगुणानां अनूचानानां गुणानुवक्तुं ज्ञानं
ति विदंति॥ ननु मादृशा अतत्तुल्यगुणा: एतदेव दृष्टांतेन द्रढयति। गरिम्णा दुर्वहत्वस्याश्रया गरिमाश्रयस्तं गिरी
णां पर्वतानां भारं विश्वंभरैवं वक्ति जानाति। नान्य: विश्वंभरेति विश्वं बिभर्तीति। साभिप्रायं पदं॥१८॥ तेषामिति। तेषां
अनूचानानां वंशे श्रीधरस्य श्रीधराचार्यस्य आत्मज: पुत्रो नेमादित्यो भूत् किंभूतानां तेषां विशदं निर्मलं यश: कीर्ति
र्येषां ते तेषां विशदयशसां किंभूतो नेमादित्य: स्वमतांबुरुहां विकसन् उल्लसन् वेदवि द्यानां वेदशास्त्राणां विवेक: स्व राम ८
स्वपक्षनिक्षेपणं लक्षणं विवेचनं यस्य स: स्वमतिविकसद्वेदविद्याविवेक:। यस्य नेमादित्यस्य जना अद्यापि दिग्नि

129/1933

दिशंतिसर्वदिक्षु उत्कल्लोलां उल्लासवतीं। कीर्तिरेव पीयूषसिंधु: सुधासरित् उज्ज्वल्यप्रसारित्वसाम्यात्तां कीर्तिपी
यूषसिंधुं श्रवणान्येव श्रोत्राण्येव पुटका: पानपात्राणि तै: श्रवणसुखात्किंचिन्मीलितनेत्रा: पिबंति धयंति॥ अद्या
पि लोकास्तद्यश: शृण्वंतीत्यर्थ:॥ सिंधुस्तु कल्लोला ऊर्ध्ववीचि: पुटकै: पीयत एवेति ध्वन्यार्थ:॥ मंदाक्रांता॥१९॥ अथद
मयंती कथाकर्ता कवि: स्वनिंदागर्भितं स्वाभिधानमाह॥ तेस्माद्रिति। तस्मान्नेमादित्यात् अस्मि अहं त्रिविक्रमाख्य: सु
तो जातो अभवं। किंभूतोहं जाड्यस्य मूर्खत्वस्य पात्रं आधारो जाड्यपात्रं अविष्टलिंगोयं॥ तस्मादिति कस्मात् येन ने
मादित्येन तैस्तैरद्भुतैरात्मन: स्वस्य गुणै गंभीरत्वादयै: तैरात्मगुणैस्त्रयाणां लोकानां समाहारस्त्रिलोकी तस्या स्ति
लकमिवाचरितं तिलकायितं। गुणै: कृत्वा सर्वेष्वपि मुख्यो जात इत्यर्थ:॥ अस्मीत्यव्ययं अहमित्यर्थे। यद्वा अहमित्य
स्मद्योगे नात्युक्तोपि युष्मत्तोहं जातोस्मीति क्रियाप्रयोग:॥ अत्र जातोस्मीति। धातुसंबंधप्रत्यया इति भूते लट् साधु:
सोहमिति। यथा मोहान्मानाङ्कति मानपि बक: स्वभावस्तु भगगते। हंसस्यापेक्षया पंगुरिव पंगु:। अथवा दैवात् कथंचि
त् भग्नचरणत्वात्पंगु: हंस इव आचरितुं हंसायितुमिच्छति वांछति॥ यथा हंसो लीलया गच्छति तथाहमपि यामीत्येवं मो
हाद्द्धिया। तद्वत् पंगुर्बककल्पमात् जाड्यपात्रं त्रिविक्रम: मोहात् मंदधीरल्पबुद्धि: सन् कविषु वृंदारक: श्रेष्ठ इवाचरितुं कवि
वृंदारकायितुमिच्छामि॥ जाड्यपात्रस्य मम तत्साम्यमपि दु:प्रापं किं पुनस्तत्त्रेष्ठत्वं परं तदिच्छायां मोहविलसितमेव बीजं॥ अ
त्र कर्मक्रियायाद्वि: प्रयोगो न दोषाय भिन्नाधिकारित्वात्॥ वृंदारकामनोरमसुर श्रेष्ठ इत्यनेकार्थ:॥ भंगेति॥ मया त्रिविक्र
मेण दुष्करं कर्तुमशक्यं भंगश्लेषणप्रधानो य: कथाबंध: कथारचना भंगश्लेषकथाबंधस्तं कुर्वता विदधता दु:खेन गम्य
ते: इति दुर्गो गंतुमशक्या अंभसांपति: समुद्रो बाहुभ्यां भुजाभ्यां तरितुं लंघयितुं आरब्ध:। यथा बाहुभ्यां दुस्तर: समुद्र:
तथा भंगश्लेषकथाबंधोपि दुष्कर इत्यौपम्याद्दुक्तसंबंध:। अभवदुक्तसंबंध उपमापरिकल्पक:॥ अथ खलानां निंदाभिधान

चंद्र
९

पुरस्सरं स्तन्नकाव्यस्यबक्लायामसमाध्यत्वमाह। उत्फुल्लेति॥ दुष्टमुखै ईर्मुखैर्मुखरैः उत्फुल्लो दुष्टकथनायविक
सितो उत्कटा वागल्लागंडा येषां ते उत्फुल्लगल्लाः तैस्तथाविधैः सद्भिः स्फुरल्लीलया आलापाः किमेतन्नूतनं काव्यं स्तूय
ते तएव भंगश्लेषाद्या अन्यत्रापि दृश्यंते। इतः परगृहसर्वस्वमेतद्विस्थवंरूपाणि निंदाकराणि वाक्यानि क्रियंते हि
यस्मात्पुनः विशेषणकविरेव काव्यकर्तृवक्रतः श्रमं चिन्ताद्या यासं सम्यक् समाधृत्याज्ञानातिकाव्यं कुर्वतः कवयं श्र
मः। संपद्यत समतथाविधारं वक्रावाभिः परिच्छत्तुं त्रास्यत ॥ नतुइत्तेनेरितिभावः दुर्मुखो मुखरे नागराजे वा त्रिनिवानरे
इत्यनेकार्थः॥ उल्लापाइतिपाठका कुभाषितानि चस्तरीरूपाणि। अत्रगल्लत्राब्दा ग्राम्यः तथा च काव्यप्रकाशकारः
तांबूलभृतगल्लोयं। भल्लंजल्पतिमानुषः करोतिखादनं पानं सदैवतुयथातथा॥ अत्रगल्लादयः शब्दाग्राम्याइति
परंग्राम्योप्यत्र दुर्मुखानां अकवीनां ग्राम्याणां निंदाभिधानप्रयुक्तसमुचित एव तेनात्र न दोषशंका अथ कवि कुकथास
मास्त्यनंतरकार्यस्वकायविनयमाहयद्वामोहहेतुंमनाः कुर्यं निषधयन्नाह॥ संगतेति॥ रुचिरा रम्य आश्रयोन
लोपाख्यानलक्षणा यस्याः सा रुचिरा श्रयानलसंबंधिनी मममकथास्वरुडरव्यग्रैः आवलोक्यतां विमृश्यतां। स्वरु
हि चित्त बुद्धयः संभवंतीति। किंभूता कथा शोभनो रसः शृंगारादिर्यत्र। तथा केन। अर्थेन संगता उचिता उचित्यं हि रस
स्य परमहस्यं। तदुक्तं॥ अनौचित्यादृतेनान्यद्रसभंगस्य कारणं। प्रसिद्धौचित्यबंधो हि॥ रसस्योपनिषत्परः॥ पुनः
किंभूता रम्या भंगश्लेषादिभिः मनोहरा॥ कथा कव नंदनोद्यानस्य नंदनवनस्य मालपंक्तिः सेव। यथा नंदनोद्यानमा
ला स्वर्गे वस्वर्गे तिष्ठतीति स्वर्गस्थाः तैः स्वर्गवासिभिः आलोक्यते। वीक्ष्यते किंभूता नंदनोद्यानमाला स्फुराणां सा
र्थाबंदैतेन संगता वृतमंगा। तथा रमयतीति रम्या स्कंदरा कुत्सलकटा बहुलमिति कर्तव्यं चाय च। तथा मेरुः सुरगिरिः स राम
एव चिरं बहुकालमाश्रय आधारो यस्या सा मेरुचिराश्रया तत्रैव तस्याः सद्भावात् स्वरुंडरितिपक्षे पूर्वं अघोषास्थाद्यु ९

131/1933

त्वस्सेषु वालोपमितिविसर्गलोपः॥ अथ कविः सोत्कर्षस्वकीयग्रंथाभिधानमभिदधाति। उदात्तेति॥ ईदृग्विधा च
चंपूः गद्यपद्यमयी कथा हारयष्टिश्च मुक्ताहारलता केन सकर्णेन हृदि चित्ते वक्षसि न ध्रियते। न ध्रियते। किंभूता चंपूः
उदात्तो महात्मा नायकः स्वामी भस्मात् नलस्तेन उपेता सहिता तस्याश्च तत्व्यत्वेन निबद्धत्वात्। पुनः किंभूता गुणव
त् उज्जैः प्रसादादिगुणयुक्तं यन वृत्तं छंदसा बद्धं अबद्धं तु मुक्तकं गद्यं। ततो द्वंद्वस्ते यस्यां सा गुणवद्वृत्तमुक्तका॥ किंभू
ता हारयष्टिः दात्तो महार्घो नायको हारमध्यरत्नं यस्या सा तथा गुणस्तंतुः सविद्यते यासु ता गुणवत्या ईदृग्विधा रत्नमु
क्ता वर्तुलमौक्तिकानि यस्यां सा गुणवत्तवृत्तमुक्तका। शेषाद्विभाषेतिकप्रत्यये आपोन्यतरस्यामितिवा ह्रस्वः इकार
स्तु नत्रांकनीयः तस्य पाक्षिकत्वात्॥ चंपूरिति। चपसात्वने। हभि चपेः स्वरान्तात श्चेति चपेरुप्रत्ययः चंपूः। कथा विशेष
इत्याादिरूना विशेषतं तु। गद्यपद्यमयत्वे नदी चरणानि पदानि किंताष्ट्रासांतत्वेन च बोध्यं यदनेकार्थरत्तिः गद्यपद्य
मयी चंपूः। कथाविशेषां कोष्ठासा च वर्ण्यतइति॥२५॥ अथ प्रकृत नलभूपतिकथांतदृशनगर्यादिकथनद्वारेण प्र
स्तावयन्नाह॥ अस्तीति॥ आर्यावर्तो नाम प्रसिद्धो देशः अस्ति। नाम प्रकाश्य कुत्सयोः संभाव्याभ्युपगमयोरलीके वि
स्मकुधीत्यनेकार्थः हिमवद्विंध्ययोः मध्यं। यत्प्राग्विनशनादपि प्रत्यगेव प्रयागाच्च आर्यावर्तः स उच्यते॥ किंभूतो
देशाः समस्तायाविश्वंभराभूस्तस्याप आभोगः परिणाहस्तत्र। अभास्वल्ललामलीलावान् भास्वल्ललामलीलावान्
भवन् भास्वल्ललामलीलायमानो भास्वत्तिलशोभायमानो यः स समस्तविश्वंभराभोगभास्वल्ललामलीलायमानः
सर्वपृथिव्यां मुख्यभूत इत्यर्थः। लीलायमान इत्यत्र लीलाशब्दात्। नहृति वर्तमानादाचिः॥ तथा नाकलोकस्य स्वर्ग
लोकस्य सेव्यतया आश्रयणीयतया समानः सम ः यथा नाकलोकः सेव्यते। तथायमपि सेव्य इत्यर्थः॥ तथा नीरसस्य
मनोहारी। नीरं च जलेन सस्येन च धान्येन च मनांसि निवासिजनचेतांसि हरति वशीकरोतीत्येवंशीलः। कुत्र ग्राम्यो

चं॰ सू॰ धर्मिणोयः कविमल्लस्यय: कथाबंध: सइवसोपि। नीरसस्यारसिकस्यमनोहरोनतुरसिकस्य॥तथा॥भारता
१० लंकारभूत: भारतंभरतक्षेत्रं। तस्यअलंकारभूतामंडनोपम: कइवभीमइवसोपिभारतस्यव्यासोक्तशास्त्रस्यअ
लंकारभूत:। भूतंसत्योपमानयो: प्राप्तेतीतपिशाचादा। पृथ्व्यादोजंतुयुक्तयोरित्यनेकार्थः।।तथासर्वविषयाणांस
मस्तदेशानामग्रणीमुख्य: कइव। कांतानांकुचमंडलया: पयोधरयो: स्तनोइव। अश्लेषइतिसोपिसर्वविषयाणां
सकलेंद्रियार्थानांमुख्योभवति॥तथाअदृष्टकृतिनिपातोपसर्गलोपवर्णविकार: निपात: स्वस्वपदात्पतनं उपस
र्गो धनापहारादिउपद्रव: लोपोदेवदायब्रह्मदयापालनं। वर्णविकारा बलाद्ब्राह्मणस्यशूद्रीकरणं शूद्रस्यचब्राह्मणीकर
णमित्यादिरूपाद्यातुवर्ण्यो व्यवस्थापश्चात द्वंद्वे निपातोपसर्गलोपवर्णविकारा बलान दृष्टा: प्रकृतीनांप्रजानांनि
पातोपसर्गलोपवर्णविकारा: यत्रस: कइव। अनधीतव्याकरणइवनअधीतंपठितंव्याकरणंशब्दशास्त्रंयेनस:
सोपिनदृष्टा: नज्ञाता: प्रकृतयोधातवोभ्वादय: निपाताश्चादय: उपसर्गा: प्रादय: लोपो अकारादेर्नाश: वर्णवि
काराक्षरविकृतिश्चयेनस:॥पुन: किंभूतोदेश: पशुपतिजटाबंधइवगंगाभुजटाजूटइवगंगायामंदाकिन्यापुण्यस
लिलै: पवित्रांबुभि: प्लावित: प्रक्षालित: किंभूतयागंगयाविकसितानिप्रफुल्लानियानिकनककमलानिस्वर्णाभोजा
निकुवलयानिचनीलोत्पलानितेभ्य: उच्छलितउद्भूतोयोरज: पुंज: परागस्तेन समूह पिंजरितापिंगलीकृतायो
हंसास्तएवअवतंस: शेखरोयस्या: सातयामस्त्रिरोवाच्छितत्वेनतेषांशे खरायमाणत्वात।पुन: किंभूतयाप्रचु
राभूयांसश्चलंतोयेचकोरा: चंचलचंचव: चक्रवाकाश्चरथांगाकारंडकाश्चमुरलास्तेषांयामंडलीश्रेणीतयामंडि
तंभूषितंतीरंतटंयस्यासातया॥तथाभगीरथभूपालस्यतद्रूसूनुनस्थकीर्त्ते: पताकाइवयासातयातेनैवस्ववंशा राम
नांसगरपुत्राणांनरकादुद्धर्तुंस्वर्गगमनस्वर्गप्रवाहस्यानीतत्वादतएवतन्नाम्नाभागीरथीतिप्रसिद्धिंगंगाया: पताकोपमानं १०

133/1933

त्वाऽन्वन्यसाम्यात्तथास्वर्गगमनायसोपानवीथीयमाना: आरोहणमार्गइवआचारमाणारंगंतोविलसंतस्तरं
गावीचयोयस्या: सातयानत्स्नानात्स्वर्गावाप्ते: स्वर्गच्छतांतद्वीचयोमन्येसोपानवीथीव॥ईदृभुक्तंदीपीदृग्विधयागं प
गयाशोभाभवति।तथाचंद्रभागयानद्याअलंकृतएकदेशोविषयांशोयस्यसोचंद्रभागालंकृतैकदेश: पशुपतिजटाबं
धोपिचंद्रस्यभागोंशस्तेनअलंकृतोभूषितएकदेशोयस्यसईदृग्विधोभवति॥तथासकलसंसारचक्रस्यसमस्तसंस्र
तिमंडलस्यसार: प्रधानंतथापुण्यकारियांपुण्यकर्त्तॄणांशरणायसाधु: शरण्य: एतद्देशाधारेणधर्मिणोधर्मंकुर्वंतीति॥
तथारमणीयस्यमनोहरस्यभावोरामणीयकंयोपधाद्गुरू नमाद्बुमतदेवकदलीवनंरंभारण्यंतस्यारामः कृत्रिमव
नंयथा आरामेरंभावनंतिष्ठतितथात्रापिचारुत्वंतिष्ठतीत्यर्थ:॥तथाधर्मस्यपुण्यस्यधामगृहंतथासंपदामृद्धीनां
आस्पदंस्थानंतथाश्रेयसांकल्याणानामाश्रयोआधार: तथासाधवो भव्यायव्यवहारा: प्रवर्त्तनानितेषांआकार: खानि:
।तथाआर्याम्नायामर्यादाइदंकर्त्तव्यंइदंनकर्त्तव्यमित्येवंरूपाव्यवस्थातस्यये उपदेशा: कथनानितेषांआचार्यभव
नंअध्यापकगृहंयथाचार्यगृहेसाधुमर्यादोपदेशा: प्राप्यंतेतथात्रापि॥यस्मिन्नार्यावर्त्तदेशेईदृग्विधा: प्रजा: लोका:
संतीतिगम्यते किंभूताअनवरतंअजस्रंधर्मकर्मोपदेशेनपुण्यकृत्यप्ररूपणेनशांतोध्वस्त: समस्तोव्याधिव्यतिकरो
रागसंपर्कोयासांता: तथापुरुषायुषंवर्षाणामष्टोत्तरंशतंजीवंतीत्येवंशीला: पुरुषायुषजीविन्य: यद्द्वानाकालेलो
काम्रियंतइत्यर्थ:॥पुरुषायुषमिति॥अचतुरेत्यादिनाअजंतेनिपात्यते।तथासकलानियानिसंसारसुखानिवैष
यिकसौख्यानितानिभजंतेयास्ता: सकलसंसारसुखभाज: धर्मकर्मणेतिपाठयस्मिन्देशेधर्म्मकर्मणनीरुजाबद्धा
युष: सुखिन्य: प्रजा: धर्मकर्मणेतिव्यस्तमेवत्रिभि: प्रजाविशेषणै: संबंधंस्यात् अथसर्वसुखभाक्त्वंप्रजानांदर्शाय
न्नाह॥तथाहीति॥इदमिदमेस्वेषवर्तते नप्रजास्विति वक्तुंपरिसंख्यामाह कुष्टेतिकुष्टमौषधविशेषस्तस्ययोग: संबं

धोगांधिकापणेषु गांधिकहट्टेषु दृश्यतेन प्रजासु। कुष्टस्य त्वगरोगविशेषस्य योगः संबंधो दृश्यते इति क्रियाः ये
पिस्वयंयोज्याः। कुष्टं भेषजरोगयोरित्यनेकार्थः। तथास्फुटते व्यज्यते अर्थो नेनेति स्फोटः वैय्याकरणप्रसिद्धं शब्दब्र
ह्म। सच वाक्यस्फोटः पदस्फोटश्चेति द्विधा नित्यश्च तन्मतेतस्य प्रकर्षेण वादः कथनं स्फोटप्रवादः सच वैयाकरणेषु
शाब्दिकेषु न प्रजासु स्फोटस्य पिटकस्य प्रवादः कथनं। न स्फोटकाः कस्य चिज्जायंत इत्यर्थः॥ तथा तालाश्च तलपुटा
यत्तलस्वेव संन्निपातः। उभयहस्तयोजनं॥ यदुक्तं॥ आस्यां दक्षिणहस्तेन तालं वामेन योजयेत्। उभयोर्हस्तयोः पातः
सन्निपातः स उच्यते॥ न प्रजासु सन्निपातः वातपित्तश्लेष्मणामेकत्र योकगः संनिपातो रोगविशेषः। तथा ज्योतिः शा
स्त्रेषु यत्र ग्रहाः सर्यादयस्तेषां मेषादिराशौ संक्रांतिः संक्रमणं न प्रजासु ग्रहसंग्रहसंक्रांतिः ग्रहो बंधनं तस्य संक्रांतिः न कश्चि
दन्यायं कुरुते यो बध्यत इत्यर्थः॥ तथा मतप्रधानाख्यं तत्वं मूलप्रकृतिः ततो महान् तस्मादहंकारः अहंकाराच्च पंचतन्मात्राणि
पृथिव्यादि पंचतन्मात्राणि एवमष्टौ तेन एकादशेंद्रियाणि पंचभूतानि चेति षोडशविकाराः एवं चतुर्विंशति तत्वानि पंचविंश
श्च पुरुषः। तथा च मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः इ
ति सांख्यागमश्च तेष्वेव भूतविकारवादः। भूतान्येव विकारास्तेषां वादः प्रमाणतर्कसाधनोपालंभः सिद्धांताविरुद्धः पंचा
वयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वादः॥ न प्रजासु भूतं प्रेतस्तस्य विकार उपद्रवस्तस्य वाद उक्तिर्भूतविकारवादः न
भूतेन कश्चिदभिभूयत इत्यर्थः॥ तथा तिथिषु कर्मं वाटिषु क्षयो दृश्यते। अद्य तिथिपातो जात इति। न प्रजासु क्षयो विनाशः
॥ तथा वनभूमिषु गुल्मवृद्धिः गुल्मस्तंबस्तस्य वृद्धिर्वर्द्धनं न प्रजासु। गुल्मो रोगविशेषः तस्य वृद्धिः॥ तस्यापि गलग्रहः
गलग्रहो ग्रहणं गलग्रहः महानमत्स्याः मत्स्यानां मत्स्यं गलग्रहातीति भावः बडिशप्रयोगेण वा गलग्रहणशीलहस्तः तथा पर्व
तवनभूमिषु न प्रजासु गरग्रहः गरस्य विषस्य ग्रहो ग्रहणं न कश्चिद्भक्षणार्थं गरं गृह्णातीति भावः। श्लेषरलयोरैक्यश्रवणात्

135/1933

यद्वा गलग्रहो गलहस्तः तथा पर्वतवनभूमिषु अद्रिनिकुंजेषु गंडकोत्थानं गंडकाः खड्गिनः तेषामुत्थानं उदयप्राप्तिः न
प्रजासु गंडकाः क्षुद्रस्फोटकास्तेषामुत्थानमुद्भवः क्रस्वा गंडगंडकाः अल्पाख्यायां कन्। यद्वा गंडकांतरायस्तस्योत्थानं
यत्नेनकार्थः गंडको विघ्ननिघायां संख्यावच्छेदस्व दिष्टु॥ विद्यतिविद्या विष्कशे संख्यति संख्या भेदश्चत्वारः कपर्दकाः अव
च्छेदः पर्वतितरु वृत्ता॥ तथा चंडिकायतनेषु चंडिकागृहेषु शूलसंबंधः शूलस्यायुधविशेषस्य संबंधः संयोगः तभिः स्व
हस्ते तस्य गृहीतत्वात् न प्रजासु शूलस्य रोगविशेषसंबंधः लोकानां तन्नो वाताधिक्याभावात्तदभावः॥ अपरं यत्र देशे एते
पदार्थाः तद्यथा॥ ग्रामाः संग्रामा इव वर्त्तंत इति क्रियासर्वत्राध्याहार्या॥ किंभूता ग्रामाश्चतुरगोपशोभिताः यत्र परिषत्
मंडपेषु ग्रामवृद्धा उपविशंति ते चतुराः तैस्तथा गोपैर्वल्लवैरुपशोभिताः विभूषिताः यद्वा चतुरैर्दक्षैर्गोपैः पाशुपाल्यजीवि
भिरुपशोभिताः गोत्राब्देस्य पशुमात्रवाचकत्वात् संग्रामपक्षे यत्रः वतिच्छेदः ते च किंभूताः तुरगैरश्वैरुपशोभिताः अपरं
यत्र सर्वत्र नगा इव अद्य इव नगरप्रदेशाः पौरविभागाः किंभूताः नगरप्रदेशाः तुंगसकलभुवनाः तुंगानि उच्चानि सकला
नि समस्तानि संपूर्णानि वा भवनानि गृहाणि यत्र ते। किंभूता नगाः सहसकलभैरिभैर्डिंभैर्वर्त्तंत इति सकलभं ईदृक्विधं यद्भुवनं
तत्सकलभवनं तुंगः पुन्नागरूपलक्षितं सकलभुवनं यत्र ते पुन्नागकेशरोपेत युतकानना इत्यर्थः॥ यद्विश्व प्रकाशः तुंगपुन्नाग
नागवाः तुंगस्या दुन्नते उन्यवत् तथा यत्र नूपुराणि व॥ किंभूतानि पुराणि सत् शोभनमाचरणं आचारस्तदेव मंडनं भूषा येषां
तानि सदाचरणमंडनानि। किंभूतानि भपुराणि सदा नित्यं चरणाङ्घ्रिस्तस्य मंडनानि॥ तत्रैव तेषां विभूषायै निबध्यमानत्वात्
तथा यत्र देशे प्रभंजना इव समीरणा इव जनाः संति किंभूता जनाः सहदानभोगाभ्यां वर्त्तंत इति सदानभोगाः येर्लक्ष्मीर्दीयते
र्थिभ्यः स्वयं च किं भुज्यत इति किंभूताः प्रभंजनाः सदाशश्वत नभसि व्योम्नि गच्छंतीति नभोगाः आकाशगामिनः॥ तथा यत्र
यौवनीवतारुण्यानीव वनानि किंभूतानि वनानि प्रियालं राजादनं पनसं वृक्षविशेषं स्मियति प्राप्नुवंति यानि तानि प्रियालप

चं०र० नमाराणि। आर्त्तरण। राज्ञादनपनसमहितानीत्यर्थः॥ किंभूतानि यौवनानि प्रियाणां दयितानां आलपनेन सकामोल्ला
१२ पेन माराणि प्रधानानि॥ तथा यत्र चेटिका इव दास्य इव वाटिकाः किंभूता वाटिकाः विटपिभ्यः तरुभ्यो हिताः नरुरुद्धिका
रिण्यः। किंभूता श्चेटिकाः विटैः खिंगैः पिहिताः वेष्टिताः विटपिहिताः न तस्या श्चैव विटममुंचतीत्यर्थः॥ तथा यत्र स्रस्तकूल
त्राणावभत भक्तम्बियत्र उक्षेत्र सत्राणि इक्षुक्षेत्रपुण्यानि सत्राणि दानेशालास्तानि किंभूतानि इक्षुक्षेत्रसत्राणि नि
र्वेतिरुद्धानानि निवृत्या वृत्तरभावन स्वच्छंदं रुद्धीयंत एधिनि किंभूतानि सत्कलत्राणि निर्वृत्तिः सुखं तस्या रुद्धानानि पदानि
र्वृतिरुद्धानानि तथा यत्र पशुनां रक्षकाः पुरुषाः पशुपुरुषाः जावालास्ते उवत डगभागाः सरसिप्रदेशाः किंभूतास्तडागभागाः
जलाविलक्षणाः जलाविलाः जलार्थिभिः सदासेव्यमानतया जलपिच्छिलाः क्षणा अवतारादितीरप्रदेशा यत्र यद्वा जले
राविलाविरंध्राः पूर्णाः क्षणाः खातिकानि यत्र पुनः किंभूताः अप्रमाणाः अगाधाः किंभूताः पशुपुरुषाः जडाम्मूर्खाः पुनः
विलक्षणा व्यापतलक्षणज्ञानाः।यद्वा। अविभिमेंढलैर्लक्ष्यंते ज्ञायंत इति अविलक्षणाः।यद्वा अवीनूलक्षयंति रक्षसद्द
न्युपलक्षयंतीति अविलक्षणाः पश्चात्कर्मधारयः॥ तथा अमाणाः प्रत्यक्षादिप्रमाणरहिताश्च॥ तथा यत्र कुपितकपि
कुलाकुलितलंकेश्वरकिंकरा इव। कुपितं सीतापहरणात् क्रुद्धं यत्कपिकुलं हनुमदादिवानरसमूहस्तेन आकुलिता व्या
कुलीकृताः येलंकेश्वरकिंकराः रावणानुचरास्त इव कूपाः संति॥ किंभूताः कूपाः भग्नाः कुंभकर्णाः यत्र ते भग्नकुंभकर्णाः
स्फुटितघटकंठाः तथा घनाः प्रचुराः स्वाः स्वकीयाः पातालमूलोत्थानतु प्रवाहादिना प्रविष्टा आपः पानीयानि येषु ते
घनस्वापाः।यद्वा। घनस्वाः बहुद्रव्या आपो येष्विति। वापीकूपादौ हि प्रायो जीर्णोद्धारार्थं निधिर्भवतीति रव्यातिस्ततः
कर्मधारयः किंभूताः कपिपक्षे भग्नः श्रीरामागमनेन घनेन कुंभकर्णस्य रावणानुचरस्य घनः प्रचुरः षण्मासावधिकः स्वा राम
पशयनं येषां ते भग्नकुंभकर्णघनस्वापाः रामः समागत इत्यकस्मात्तेषां निद्रात्याजितेति॥ तथा यत्र सरित इव नद्य इव गावो १२

137/1933

धेनवः किंभूताः गावाः पीवरं ऊधः आपीनं येषां ते पीवरोधसः। अत्र गोशब्दो धेन्वर्थोपि स्त्रीनरलिंगित इति व्याडिः। ततः
पुंस्त्वात् पीवरोध्न्य इति न स्यात्। यद्वा पीवरं च तत् ऊधश्च पीवरोधस्तस्मात् पीवरोधसो हेतोः गावः सरित इवेत्येवमर्थघटनावि
धेया। एतत्पक्षे धेन्वर्थो गोशब्दः स्त्रीत्व एव। किंभूताः सरितः। पीवरं स्थूलं रोधः तटं यासां ताः पीवरोधसः॥ तथा यत्र सूर्य
द्युतय इव रविदीप्तय इव कुलस्त्रियः सत्कुलोत्पन्नरमण्यः किंभूताः कुलस्त्रियः सती सा धीतस्या व्रतं एकपतिकात्वं पतिव्र
ताधर्म इत्यर्थस्तेन अपगतानष्टा दोषा कलंका यासां ताः सतीव्रतापदोषाः किंभूताः सूर्यद्युतयः सहतीव्रतापदोषैः वर्त्त
न्त इति सतीव्रतापदोषाः॥ यद्वा सहतीव्रतया उग्रतया वर्त्तंत इति सतीव्रता। स्तथा अपगता दोषा रात्रियाभ्यस्ताः अपदोषाः
तथा कर्मधारयः। तथा यत्र च कादंबरी गद्यबंधा इव कादंबर्याः कथाविशेषस्य गद्यबंधाः छंदोनिबद्धा। मुक्तवाक्यरच
नास्त इव। कदाराः संति। किंभूताः कदाराः मनोहारिणी रुचिराणि सारसानां द्वंद्वानि दंपतीरूपाणि युग्मानि येषु ते मनोहारि
सारसद्वंद्वाः। पुनः किंभूताः द्विगुना गोयुगयुक्तेन तत्पुरुषेण तत्स्वामिना धिष्ठिताः आश्रिताः द्विगुनेति चोपलक्षणं तेन बहु
गोयुक्तेनापि। चकारोप्यर्थो द्विगुनापि तत्पुरुषेणाधिष्ठिताः तथा दृश्यमानाः बहवो व्रीहयो येषु ते दृश्यमानबहुव्रीहय इति
पक्षे। अस्य संपर्कद्युणः पक्षे किंभूताः कादंबरीगद्यबंधाः। मनोहारिणः सारा श्रेष्ठाः सद्वंद्वा द्वंद्वसमाससहितास्ततः कर्म
धारयः पुनः तत्पुरुषेण द्विगुना च समासेनाधिष्ठिताः॥ तथा दृश्यमानबहुव्रीहिसमासाः। तथा च द्वंद्वतत्पुरुषद्विगुबहुव्रीहि
समासबहुला इत्यर्थः॥ किं बहुना किं बहु वर्ण्यते तस्य देशस्य तद्वाह॥ नास्तीति॥ यत्र आर्यावर्त्तदेशे। साकापि नगरी
नास्ति। यत्रेति यस्यां न वापी दीर्घिका न तथा सा नगरी नास्तीति॥ यस्यां न पयोधरा न पयःप्रधाना भूमिः तथा सा नगरी नास्ति॥
यस्यां न च स्त्री कोनादृश्यंत। एतत्त्रयमपि। क्रमेण चतुर्थपादेन विशिनष्टि। किंभूता वापी स्तुता न वं स्तुतिमात्रुतः अभी
क्ष्णमिति। नवा पिनीतथाभूते इनपयसि स्वामिजलं धरतीति नवापीनपयोधरा सेधन्या येनेयं वर्णिका रितति स्तुतिमत्र

चं.वृ.
१३

त्कर्नं धरा॥ कश्चादलय। स्नव्यजलधरावित्यर्थः। किंभूतापयोधरावपंत्यवश्यमितिवापिनः वृर्षकालेषमिना आगो
वहेतुत्वात् स्वामिनः पयोधराः मेघायस्यांसावापीनपयोधरा। पश्चान्नसमंबंधः। मेघानपक्ष्यसस्यसंपत्तिमती
त्यर्थः किंभूतास्त्रीनवातरुणी॥ तथापीनपयोधरापीनस्तनीच। यस्यांनगर्यांदृश्यतेसैवनगरीयत्रदेशेस्ति। अथवा
यत्रदेशेमानगरीनास्ति। यस्यांनगर्यांवापीनवनदृते। कीदृशीवापीननपयोधरा। अपितुपयोधरा। नसद्वयस्यप्रकृता
र्थसूचकत्वात्। तथा॥ यत्रनगर्यां एवंविधास्त्रीवतदृश्यते। किंभूतानवातरुणी। तथापीनपयोधरा। सर्वास्वपिनगरीषु
पयोधरताप्यः पीनस्तन्यश्चस्त्रियोदृश्यंतइतिभावः॥ पुनर्देशंव्यावर्णयन्नाह॥ अपिचेतिपुनः भवंतीति॥ फाल्गुन
मासिवृक्षाणांतरूणांजालाः जालाः वृक्षजालविगताः पल्लवाः याभ्यस्ताः विपल्लवायत्रभवंतिजायंते अत्रभूधातुः
प्रादुर्भावार्थः। यदुक्तं। सत्तायांमंगलेवृद्धौ नीवासव्याप्तिसंपदोः। अभिप्रायवशक्तौ च। प्रादुर्भावेगतौ चभूरिति॥ ज
नस्यतुकदापिचविपदामापदांलवालेशः। अपिचनभवंति। अपिचलकभयत्रसंबध्यते। भासीतिमासस्यत्रासादा
वातालोपः॥ यत्रेति॥ यत्रदेशेसौराज्येनशोभनन्नृपनभावनरोचितं आवर्जितंप्रमादितंमनोयेषांतेसौराज्यरंजितम
नसः तथासकलासमस्तायासमृद्धिः संपत्तया। वर्द्धिताःवृद्धिंप्रापितायमहोत्सवपरंपराक्षणपरिपाटीतस्यायः आरं
भउपक्रमः तेननिर्भराः भृताः॥ जनालोकाः स्वर्गवासिनंस्वर्गिणंजनंउपहसंतिन्यक्कुर्वंति। कथमित्याह॥ किंभूताज
नाः कुलीनाअभिजाताः तथानप्राप्ताविमानोभावप्रधानत्वान्निर्देशस्यविमाननातिरस्कारोराजादिकृतोयैस्ते अप्राप्तवि
मानाः। तथाअनेकानिबहूनिवसूनिधनानियेषांते अनेकवसवः॥ किंभूतंस्वर्गवासिनं जनंसततंनिरंतरंनकोधरायां
लीनअश्रितस्तं अकुलीनंतथाप्राप्तंविमानंदेवयानंयेनसःप्राप्तविमानस्तंतथाकतिपयैरष्टसंख्यैर्वसुभिर्ध्रुवादिभिः सम
देवैर्विराजितः कतिपयवसुवसुविराजितस्तं॥ न्यक्कारस्तुल्यार्थेव्याख्येयः॥ सन्नेत्थंजनाः कुलीनाः अभिजाताः स्वर्गवासि १३

139/1930

जनस्तुनकुलीनोनाभिजातइत्यादिरूपस्तथासदेशःकथंचस्वर्गान्नविशिष्यते। नाधिकोभवतिकर्मकर्तृरियंकुवत्रि
क्यं एवदन्नीयतियत्रदेशेगृहेगृहेप्रतिगृहंणार्यागौरांग्यः शुभ्रा भयान्वयावात्त्रियः संतीतिक्रियायथासंभवसर्वत्र
योज्या। तथायत्रमहानीश्वरः तिसमृद्धामहेश्वरालोकः सर्वोपिजनः। तथायत्रमहश्रियाशोभयावर्त्ततइतिसश्रीका
हरयोश्वाः। तथायत्रपदेपदेप्रतिस्थानंलोकपालराज्ञानोधनंददतीतिधनदाः॥ स्वर्गेतुनैवं॥ एकस्मिन्नेवश्वरगृहे
गौरीउमातथास्वर्गेएकएवमहेश्वरः शिवः तथासलक्ष्मीकोहरिविष्णुरेकएवनबहवः। तथास्वर्गेएकस्मिन्नेवस्थानएक
एवधनदः कुबेरः लोकपालस्तथाचकथंस्वर्गान्नायंदेशोधिकोभवेदिति॥ केवलंस्वर्गलोकादयंविशेषः अत्रदेशेसुराधि
पाराजानः। अधिअधिक्येनपिबतीतिअधिपः सुरायामद्यस्यअधिपः सुराधिपः। तथानचकश्चित्कोपिविरुद्धनाय
कोविनायकः सर्वोपिसुनायकइत्यर्थः सुरामधिपिबतीतितुवास्यकर्मण्यंतिसूत्रेणाणप्रसक्त्यागोसंदायवत्सुरा
धिपायइत्यनिष्टंस्यात। तेनपूर्वोक्तएवसमासोविधेयः। सुरात्रपावतुस्वर्गेतुसुराणामधिपोराजाइंद्रः विनायकोगणेश
श्च॥ तथायत्रचदेशेलतानांवल्लीनांसंबंधोयोगासस्लतासंबंधः कलिकायाः कोरकस्यउपक्रमः प्रारंभः कलिकोपक्र
मश्चपादपेषुदृश्यते। नपुरुषेषु। चललालोलंतस्याः संबंधः संगः चललतासंबंधः अचंचलाइत्यर्थः। पुरुषपक्षेचललतासंबं
धइति। समुदितंपदंतथाकलिः कलहः कोपः क्रुततयाः क्रमः पारंपर्यंकलिकोपक्रमः सचदृश्यतेनकोपिपूर्वंकलिंकुरुते
पश्चात्कोपमितिभावः। तथायत्रदेशेचमरकाणांगोविशेषाणांवार्ताकथनंयथातत्रचमरकाः संतीत्येवंरूपातथापरमसु
त्कृष्टं हिमंतुहिनंतेनोपघातउपद्रवः परमहिमोपघातः सचतुहिनाचलस्यहिमाद्रेः रुतलेषुभूभागेषुश्रूयतेनप्रजासु अत्र
पक्षेचाभिन्नजनेनमरकोमरणबाहुल्यंतस्यवार्ताकिंवदंतीतथापरस्यस्वव्यतिरिक्तस्यमहिमामाहात्म्यंतस्याउपघातोविना
शः परमहिमोपघातः सचश्रूयतेनकोपिमरकवार्ताश्रूयतेनचकोपिपरकीयांमहिमामसहिष्णुतयाउपहंतीत्यर्थः तथा

यश्चदेशः नीतिमद्भिर्नयोपगतैः पुरुषैरधिष्ठितोप्यथिनोप्यनीतिः अपिविरोधसचतुल्यार्थव्याख्यायां। कथंयः। नीति
मत्पुरुषाधिष्ठितो भवतिसकथं अनीतिः नविद्यतेनीतिर्यस्मिन्सः अनीतिः सच अनीतिर्न भवति। किंतु सनीतिर्भवेत्
अयंविरोधः तत्परिहारस्तु नविद्यते ईतिरूपद्रवोयस्मिन्निस्यनीतिः एवमयंपिविरोधतत्परिहारो ज्ञात्यौतथायोदेशः
महवटन्वयोधवेर्ततइतिसवथस्तथाविधापिनवटः संकुलो व्याप्तइतिविरोधः तत्परिहारपक्षेतु अवटैः कूपगर्तादिभि
र्वासंकुलः तथाकारूपयतोपिकुत्सितमौषधाकारूपं। तेनयुतोपिसहितोपिनगतानभ्रष्टारूपशोभायस्यसः अगत
रूपशोभः अयंविरोधः तत्परिहारस्तुकारवः शिल्पिनः तैरुपयुतस्तथा अगैर्नगैस्तरुभिरुपशोभायस्येति। तथायत्रच
देशेउदस्मिदमतकुर्वंतिनजनास्तथाहिनक्षत्रराशयो अश्विन्यादिभपंक्तयः गुरोर्बृहस्पतेर्व्यतिक्रममुल्लंघनगुरुव्य
तिक्रमंकुर्वंति। अश्विन्यादयः शीघ्रचारित्वेनगुरुमुल्लंघयंतीत्यर्थः। परंजनाः गुरूणांपितॄणांपूज्यानां वाव्यतिक्रमं
कुर्वंति। तथायत्रमाष्यावर्णावयवस्तस्याः कलहं। अन्यक्तानभ्युपगमरूपंलेखशालायांपठनायनियुक्तालेखशा
लिकाः लेखनशिक्षकाबालाः कुर्वंति। तत्रनियुक्तः सतस्यंतादितिनियुक्तेर्थत्क्वयत्रोपविश्यपट्टादिषुवर्णविन्या
संशिशवः शिक्ष्यंतेसालेखशालेति। नजनाः मात्राजनन्यासहकलहंकुर्वंतीति। तथाउलूकाः पेचकाः मित्रस्यसू
र्यउदयेउद्गमेद्वेषंईर्ष्यांकुर्वंतिकिमित्यसावुदितइतिनजनामित्रस्यस्वसुहृदः उदयेऽभ्युदयप्राप्तौद्वेषंकुर्वंति। तथाय
त्रकोकिलाः पिकाः अपत्यस्यनिजसंतानस्यत्यागंकाकनीडेपुमोचनंकुर्वंति। नजनाअपत्यत्यागंकुर्वंतिसद्वृत्तत्वेन
जातसातत्यभावात्। तथायत्रग्रीष्मदिवसाः उष्णर्तुदिनानिबंधुजीवानांबंधूकानांविघातंनतांकुर्वंति। ग्रीष्मदिनमध्ये
दिनेषुतेषांशोषात्ननजनाः बंधूनांस्वजनानांजीवविघातंप्राणच्यावनंकुर्वंति। यस्नाद्यलुब्धत्वात् किंबहुनाकिंबहूक्त्यादे
शइति। आसौ आर्यावर्तदेशः कस्यजनस्यनप्रियोवल्लभोभवत् अपितुसर्वस्यापिप्रियोभवतकिंभूतोदशः पुण्यतमा राम
१४

141/1933

अतिशयेनपवित्रांउद्देशावनादिभूभागायस्यसः पुण्यतमोदेशः असावितिकः योदेशः अनुक्रोशेनदययासंपन्ना
युक्तेर्जनैयुक्ताभूतः जनैः करिवयोजनैरीदृक्भूतैर्यो जनैः अनुगताः परस्परंसंबद्धाः क्रोशांगव्यूतानि अनुक्रोशास्तैः
संपन्नानि अनुक्रोशसंपन्नानितैः। दिशवर्णनामध्याय अथतदेकदेशीयदेशाख्यानपूर्वकंसप्रपंचंतन्मध्यभागव
र्तिनगरीवर्णनामाह। तस्येति। तस्यविषयस्य आर्यावर्ताख्यदेशस्यमध्येनिषधानामजनपदोनीवृतप्रथितोविख्या
तोस्ति। तत्रनिषधाख्यजनपदेनिषधाइतिपुरीअस्तिकिंभूता। पुरुषोत्तमस्यविष्णोर्निवासयोग्या अवरुद्धानायोचिता
अतिश्रेष्ठत्वात्। यद्वापुरुषेषूत्तमाः पुरुषोत्तमाः प्रधानपुरुषास्तेषांनिवासयोग्या। २७। जनेति। सानिषधानगरी
सततंनिरंतरंमनोहरारम्याभातिशोभते। किंभूतानगरीकस्वामिनाकप्रभुणाकृताविहितानंदाहर्षोयस्यासाकृतानंदा
किंभूतनजनानांनित्यास्वस्वमर्यादानुल्लंघनेनमुदितंहृष्टंमनोयस्यासाजननीतिमुदितमनास्तेनयदाजनाः स्वस्व
नीत्याप्रवर्तंन। तदाराजापिहृष्यति। पुनः किंभूतानागतोभ्रष्टानयायस्याः सागतनया। नतकन्यासा। अपितुस
नयायतएवनभ्रष्टनया अतएव नाननीतिमत्वं। कवगौरीवपार्वतीव। यथागौरीसततंभातितथेयमपिकिंभूतागौरी
जननीमतंतिकृतामुदितमनसाहृष्टेन अतएवशोभनेन। हर्षाच्चित्रकृतिसुंदरेणस्वामिनाकार्त्तिकेयेनकृतआनंदोय
स्याःसास्वपुत्रावलोकनादुमाया अपिहर्षोत्पत्तिः पुनः किंभूतानगस्यहिमाद्रेस्तनयापुत्री। नगतनयातथाभनसिहरः
स्मर्यमाणतयायस्यासामनोहरा। यस्यांचनगर्यांसवलंतेगतिविघातंकुर्वंतोरवेः सूर्यस्यरथतुरंगमाः स्यंदनाश्वा
रविरथतुरंगमामध्यंदिनमध्याह्नेसादिनंअरुणसारथिंखेदयंतिखेदंकुर्वंति। यतएवस्खलंति। अतएवतस्यपुनःपु
नःतत्प्रेरणायांप्रयत्नःखेदः अश्वस्खलनकारणमाह। किंभूतारविरथतुरंगमाः। अभ्रंलिहानिआकाशंश्लिष्यंति
यानिइंद्रनीलमालशिखराणिइंद्रनीलमणिघटितप्राकारकपिशीर्षाणितेषांयानिसहस्राणितेभ्योनिसृतंनिर्गतं

चं॰च॰
१५

यदंशुजालं किरणसमूहस्तदेव बाला: प्रत्यग्रोत्पन्ना: शाड्वलादीनितायेअंकुरास्तेषां यदग्रंतस्य ग्रासेनक्षणे ला
लसालंपटा: धृताभिलाषा:येतेतथाविधा: आर्यभाव: इंद्रनीलमणि किरणान्नीलतृणतुल्यान्जिघत्सव: सततसंनिस
न्नय: स्खलंति॥तत: सारथिनं स्वदयंतीति।तथायस्यांनगर्यांस्फटिकमणिशिलाभिर्निबद्धानिस्वचितानिया
निभवनप्रांगणानि।गृहाजिराणि तेषुगता:प्राप्ता: संक्रांताइत्यर्थस्तास्संचरंत्यो गच्छंत्यो या गृहिण्योवध्वस्ता
सांयाश्चरणालक्तकस्यतदानींमबाईलाक्षारसरंजितत्वात्पदपंक्तय: पदरचनास्तास्मुग्धा अप्रौढायेमधूपास्ते
षांपटलानिसमूहा: पतंतिअन्यत: आगत्यतत्रतिष्ठंति॥कया॥निर्मलंयत्सलिलंतस्याभ्यंतरे मध्यतरंतिविल
संतियानितरुणारुणकमलानिनवरक्ताभोजानितेषां आकांक्षयावांछया।तेमुग्धत्वादिदंजानंतिस्फटिकप्रांगण
गता: स्त्रीयांचरणालक्तकपदपंक्तय: इमानभवंतिकिंतुस्वच्छांभसिरक्तांभोजान्यमूनीतिस्फटिकस्यसलिलंपद
पंक्तिश्चकमलमुपमानं।।तथायस्यांनगर्यां।स्वच्छास्निर्मलास्विविधमणिभि: नीलपीतादिभेदभिन्नै: रत्नै:
निर्मितारचितायावासभवनानां शयनीयगृहाणां भव्यभित्तयश्चारुकुड्यानितास्प्रियतमा: विलासिन्य:स्वां
छायांस्वप्रतिबिंबं अवलोकयंत्यावीक्षमाणा:स्ता: अपरस्त्रीणांसपत्नीनांशंकायकाभिस्ता: कृतापरस्त्रीशंका:
कथमपिकृच्छ्रेणप्रियै: भर्तृभि: प्रत्यानीयंत।प्रसाद्यंते।गृहभित्तिषुस्वप्रतिबिंबं पश्यंत्योमुग्धा: सपत्नी: शंकंते
तत:प्रियतमैमाहृताकाष्टनमा: प्रतिबोध्यंतेयदेतेता: सपत्न्योनभवंतिकिंतुभवतीनांप्रतिबिंबमिति।।तथायस्यां
नपुर्यांस्वर्गाइवमार्गा:संतिकिंभूता:मार्गा: दिविभवादिव्या: रम्या: देवकुलै: देवगृहैरलंकृतादिव्यदेवकुलालंकृता: किंभू
तास्वर्गा: दिव्या:स्वर्गाद्भुत: कल्पद्रुमादिभि:तथादेवानांकुलै:समूहैरन्वय: वाअलंकृता:।।तथायस्यांसागराइव अब्ध राम
यइव।नागरा: पौरा:किंभूता:नागरा: सततंसदाअपांसुरेणुरहितवसनंवस्त्रंयेषांतेअपांसुवसना: पांसदीर्घश्चपशुण १५

143/1933

नात्रांते।इत्यस्मादुत्पत्त्यांदीर्घश्चभवतिपांसु:॥पक्षेकिंभूता: सागरा: अपांअंभसांस्फुटंवसंतपुरीतिस्तवसना:।अपा
मितिकृतेशिवड्डीतलवासाइत्यर्थ:।तथायत्रवनानीवभवनानिगृहाणिकिंभूतानिभवनानि।सहमत्तवारणैमत्तालंबैर्व
र्त्तंतइतिसमत्तवारणानिकिंभूतानिवनानिसहस्वमत्तवारणै: समदगजैर्वर्त्तंतइतिसमत्तवारणानि।।तथायत्रस्वर्गभूपा
इवशक्राइवभूपा:किंभूता:भूपा: स्फरसेनयाभनजलेन अन्विता: युता: पक्षेस्वर्गभूपास्फरसेनयात्रिदशसेनान्वि
ता:।।तथात्रहाराइवमुक्तावल्यइवनिहाराश्चैत्यानिसंतिकिंभूता:विहारा: अधिकंसात्कर्षंयथाभवतितथाधरोद्देशं
अधिवाप्रदेशंउद्भासयंत:विभूषयंत: पक्षेकिंभूताहारा: कंधरोद्देशांग्रीवाप्रदेशां अधिकृत्य।अधिकंधरोद्देशंग्रीवा
मित्यर्थ:॥विभूषयंत:विभक्त्यर्थव्ययीभाव:॥तथायस्यांनगर्यांअंतर्नगरमध्येप्रचुरा: बहुला:प्रसादादेवभूप
गृहा:।बहिश्चवारणेंद्रा:गजा:।ईदृग्विधा:दृश्यतेकिंभूता:प्रसादा: बहुला: कृणाउत्सवाभूमिकावायेषुतेबहुलक्षणा:
क्षण: कालविशेषस्यातसंप्रव्यवसरमह।इत्यार्घनेकार्थ:।पुन:किंभुता:स्कंधालेपविशेष: साविद्यतेयेषुतेस्कंधाव
त: किंभूता:वारणेंद्रा: बहुनिलक्षणानियेषांते।तथासद्धावंतावेगेनगच्छंत:।।तथायस्यांपुर्यांअंतर्मध्येसंगीतक
शाला: प्रेक्षणनिमित्तप्रयुक्तगीतनृत्यवाद्यत्रयंसंगीतंतदेवसंगितकंतस्यशालागृहा:बहिश्चकमलैरुपलक्षिता
दीर्घिका:वाप्य: कमलदीर्घिका: क्रीडार्थंकमलदीर्घिका: क्रीडाकमलदीर्घिका: क्रीडाजलाधारा:समालोक्यंतेकिं
भूता: संगितकशाला: स्फुराभितातिशयेनशोभायुक्तारंगान्नृत्यस्थानंयास्ता: किंभूता:दीर्घिका: स्फुराभिनस्तरं
गायास्ता: स्फुराभितरंगा: यथायत्रअंतर्मध्येकथमपिमहताकष्टेनपण्यस्त्रियोवारांगनाअभिगम्यतेप्राप्यंतेबहि
श्चक्षेत्रभूमयोभिगम्यंते।अतिक्रम्यंतेकिंभूता:पण्यस्त्रिय: बहुधाअनेकै: प्रकारै: अन्यै: विटै: निरुद्धावेष्टिता अतएव
दु:प्रापा: किंभूता:क्षेत्रभूमय: बहुभिर्धान्यै:निरुद्धा: अतएवदुरतिक्रमणीया:।तथायत्रअंतर्मध्यसबाहिश्चसहकारव

नै०च०
१६

नगान्नय: आम्रकाननपंक्तय: शोभंते॥ किंभूता: सभा: नाना अनेकविधाये आसुकवय: शीघ्रकवयस्तएवविभूषणंमंडनंयासांता: किंभूता: आम्रवनराजय: नाना अनेकवर्णायेश्चका: पक्षिविशेषास्तै: विभूषितयास्ता: नाना
शुकविभूषणा: तथायत्रअंत: पुरीमध्ये विपणयोहट्टावदिश्च सलिलाशय्याश्चाराविराजंते किंभूता विपण्य: स्फुग
धीनिद्रव्याणि पण्यमेषामिति सौगंधिकावणिजस्तेषांप्रसर: प्रणयाय पुते॥ प्रसरस्तुसंगरप्रणयज्ञवइत्यनेकार्थ:
पक्षे किंभूता: दीर्घिकाद्याया: सौगंधिकानांकल्हाराणांप्रसर: प्रवीर्त्तयेषुते॥ प्रसरस्तुसंगरप्रणयजवइत्यनेकार्थ:
टिप्पनककारणतुप्रसारा इतिपाठमधिकृत्यव्याख्यायिप्रसारालघ्वापणाविस्तारश्चेति॥ किंबहुनाकिंबहुव्यावर्ण्य
तेतस्या: सकलसमृद्धिमत्वात्॥ भूमयइतियत्तं॥ यत्रयस्यांनगर्य्यांभूमयाबहिर्बाह्यभागनाना अनेकविधेरामै
रुपशोभिता: विभूषिता: सत्य:। तथा अंतश्चमध्येनाना अनेकविधाभि: लघुतरुणीवृद्धाभीरामाभि: स्त्रीभिरुपशो
भिता: सत्योविचित्रवयसां विविधपक्षिणांपक्षविचित्रंवयस्तारुण्यंयेषांतेतेषांरम्यवयसांयूनांचसर्वदाशाश्वतमुद
हर्षं कुर्वंतिबहिरारामोपशोभिताभूमय: पक्षिणआनंदयंतिअंतर्भूमयारमोपशोभिता: यून आल्हादयंतीतिभाव:
वयस्तारुण्यबाल्यादौखगेइत्यनेकार्थ:। तथायस्यांनगर्य्यांदेवतायतनेषुदेवकुलेषुदेवता: हट्टेषुवणिक्जनाईदृ
ग्विधा: दृश्यंते। किंभूतादेवताभक्ताभक्तिमंतस्तैर्भज्यंतेसेव्यंतइतिभक्तभाज:। पुन: ससन्निधाना: भक्तानांनेकधाभा
जन्मलक्षणं कृतसान्निध्याइत्यर्थ:॥ किंभूता: वणिक्जना: भक्तंअन्नंभजंतीति। भक्तभाज: कादंविकाहिआपणेभक्तं
कृत्वाविक्रीणंतीतितथासह। सताप्रधानेननिधानेनवर्त्ततइतिससंनिधाना: सम्यक्निधियुक्ता: भक्तमन्नेतसेरेचेत्य
नेकार्थ:॥ तथायत्रपुर्य्यांकविगोष्ठीषुविद्वत्सभास्वकवयोद्युतस्थानेषुदुरोदरमंदिरेषुचद्यूतकाराईदृग्विधाविलोक्यंते। राम १६
किंभूता: कवय: अक्षरेषुवर्णेषुयुक्तायुक्तविचारणेसावधाना:॥ किंभूताद्यूतकारा: अक्षप्रासक: अक्षरसेपाशक्रांगे

141/1933

स्थितअवधानंचित्तैकाग्र्यंयेषांतेतथाविधा:॥ तथायत्रराजद्वारेषुकरिणोगजा: वेश्यांगणेषुभुजंगागणिकापतय:
चसंचरंतिक्रीडंतिकिंभूता: करिण: कांतारेवनेअगा: सल्लक्यादयस्तेप्रियाइष्टायेषांतेकांतारागप्रिया: किंभूता: भुजं
गा: कांतासुस्त्रीषुयारागानुराग: सप्रियायेषांतेतथाविधा: पुन: पुरींवर्णयितुमुपक्रमते। यस्यांचेति। चतुर्णांसमुद्र
धीनांयावेलामर्यादातीरंजलवृद्धिर्वातयाविराजितंयत्सकलंधरावलयंसमस्तभूमंडलंतस्यचूडामणि: शिरोमणिरि
वयासातस्यांसकलभुवलयमंडनभूतायामित्यर्थ:॥ वेलाबुधस्त्रियांकालेसीमनीश्वरभोजनेअक्लिष्टमरणेभोधस्ती
रनीरविकारयोरित्यनेकार्थ:॥ तथामणिकर्मणास्फटिकादिरत्नरचनयानिर्मितानिकृतानियानिहर्म्याणि धनिनांगेहा
नितेषांरम्यतयाचारुतया। कृत्वासुरपतेरिंद्रस्ययापुरी अमरावतीतस्या: पराभवंतिरस्कारंकरोतीत्येवंशीलाया: सादृ
इपुर्य्यां अपीयमधिकशोभावंतीत्यर्थ:। तथाविधायांयस्यांचनगर्य्यांव्याकरणेशब्दशास्त्रेयउपसर्गा: प्रादयोविंशति
स्तेषु अव्ययभावा: अव्ययत्वंदृश्यते। निपाताश्चोपसर्गाश्च अव्ययीभावसंज्ञकाइतिवचनात् धनिनांधनेषुदानादिनोप
योगाव्ययस्तस्यभाव: सत्ताव्ययभाव: नव्ययभावोअव्ययभाव: सनदृश्यतेदातृत्वेनधनिनोधननिदानादिषुयोज्जयं
तितेनधनाव्ययभावोनालोक्यते। तथाअस्यांपुर्य्यांउन्माद्यंतीमदोन्मत्तायेकरिणोहस्तिन: तेषांकपोलमंडलेषुगंडस्थ
लेषुदानविच्छित्तिर्मदशोभादृश्यतेनत्यागिगृहेषुदातृमंदिरेषुदानस्यत्यागस्यविच्छित्ति: विच्छेदोदृश्यतेसदाधनंददं
तीत्यर्थ:। तथायत्रनगर्य्यांभुजंगेषुफणिषुभोगस्यसर्पवपुषोभंगआमर्दनंकुंडलीकरणइतियावत् दृश्यतेनविलासिला
केषुकामुकजनेषुभोगस्यविलासस्यभंगोव्याघातोदृश्यते॥ तथायत्ररजन्याविरामेअत्ययेविरमंतीनि: प्रभीभवंतोयप्र
दीपा: तेषांपात्रेषुतैलाधारेषुस्नेहस्यतैलादे: क्षयोविनाशोदृश्यतेचतुर्यामोचिततैलस्यतस्यात्रेषुक्षिप्तत्वात्तद्विरामेतस्यक्ष
याभवत्येवनप्रतिपन्नाभिपरस्परप्रतीतानितानिजनहृदयान्निप्रतिपन्नजनहृदयानितेषुस्नेहस्यप्रेम्ण: क्षयोदृश्यतेअ
त्ययनचित्तेषुनस्नेहक्षयोवीक्ष्यतइत्यर्थ:। विरमदितिव्याङ्परिभ्यारमइतिपरस्मैपदेलट: शत्रादेश:॥ तथायत्रगीतस्य

नैष०
११

तानाद्वयेनैकं कूटाख्याः पंचविंशत्। अन्यच्चशुद्धाख्याश्चतुर्दश। एवंएकोनपंचाशत्तेषांविशेषेषुविभेदेषुकूटानांतानवि
शेषाणांप्रयोगो व्यापाराद्दृश्यते नत्वन्यद्दोषेपु वणिक्कंसस्यकूटस्यप्रयोगो व्यापाराद्दृश्यते। यत्रनकोपिवणिजः कमपिग्राम्यं
व्यापारंफलयंतीत्यर्थः॥ तथाविव्याकरणच्छात्रेषु शब्दशास्त्राध्ययनप्रवृत्तशिष्येषुदृष्टिः शास्त्रविवरणंतया कलहः ए
कच्छात्राः पर्गतिइदमस्यांव्याकरणसूत्रोव्याख्यानमस्तिअपरेवदंतिनेदमित्यादिरूपा रतिकलहोदृश्यते नस्वामिनश्च
भृत्याश्चसेवकाः स्वामिभृत्यास्तेषुदृत्तेरावीविकायाः कलहोदृश्यतेस्वामिनोवदंति नतावद्दृयमुक्तंभृत्याश्चवदंत्यता
वद्दत्तमित्येवंरूपात्विगतः कलहोनजायत इत्यर्थः॥ स्वामिभिः प्रतिश्रुतदेयधनदानात् भृत्यश्चतदधिकाग्रहणादि
ति॥ तथात्रचित्रेषुनानावर्णकरचितनानारूपेषु स्थानकभेदाद्दृश्यते॥ तस्यसन्मुखंपराङ्मुखंवासंपूर्णावयवंपार्श्वागत
ततोभागद्वयेनएकतः पतनाथन्यत्रचचटनाक्रमेणऋजुऋजुआगत द्वार्द्धअक्षअर्द्धऋजुसंज्ञानिचेति। स्थितस्थानाक्रा
नित्यंच। गमनमालीढं। त्वरितंत्रिभंगमित्याख्यानिचत्वारिशत्स्थानकानीति एवंस्थानकानांभेदश्चित्रेविति॥ तस
त्पुरुषेषुसचिवादिषुस्थानकस्यरक्षणीयनगरादेर्भेद उपजापाद्दृश्यते। नान्यैः प्रतिपक्षभूपैः सहसंधिंविधायनृपबंधा
दिनातेभ्यः एतन्नगरंसमर्पयंतीतिभावः॥ सत्पुरुषत्वात्॥ किंबहुना किंबहुव्यावर्ण्यतेस्याः सर्वस्याप्यत्रावस्थितस्यवस्तु
नोव्यावर्णनीयत्वात्॥ त्रिदिवेतिवृत्तं॥ इहनिषधदेशेयस्यांनगर्यां। स्फुराणांसदनानि प्रासादाविमानानि चतेषांयानिशिख
राणि कूटाग्रभागास्तेषुवेल्लयंत्यः पताकाः भांतिशोभंते किंभूताः आच्छादयंतेऽभीरीतिआग्रहाः अकुटकास्तेषुयेग्रथयते
नद्रावहाः उत्प्रेक्ष्यते त्रिदिवपुरस्यअमरावत्याः यासमृद्धिः संपत्तस्याः स्पर्द्धयाइवसंहर्षेणतु अन्यापियः स्पर्द्धतेसकिलप
ताकांवध्नातीतिस्थितिः किंभूतावेल्लयंत्यः नभसिउल्लसद्भिः राजमानैः पवनेनमरुतावेल्लतश्चलंतोयेपल्लवाअंचलास्तैः
परमुत्कृष्टंवैभवंमाहात्म्यंशोभातिशयंवहंत्यादधत्याः लुभालक्ष्याः॥७०॥ पुनर्नगरीवर्णनमाह अपिचेति॥ सानग
र्यस्याउत्कृष्टतयासंपदासमृद्ध्याविवर्जितारहितानकिंतु अतिशयेनसंपदासहितेत्यर्थः॥ निषधमुखनविधिप्रतीतिस्सा ११

147/1933

तिशयत्वंद्योतयति॥ किंभूता। चार्वी। मनोज्ञा। तथासदाअनसंसदस्त्वारसज्ज्ञाः साध्वाचारप्रवणाः येसज्जनाः साधवः
तैः सेविताआश्रिता॥ एवंनगरीवर्णनामभिधायनदधीश्वरप्रवरनलवर्णनांकर्तुमुपक्रमते॥ यस्यामिति॥ यस्यांनगर्यां
वीरसेनस्यनलोनाम। इतिप्रसिद्धराजा आसीदितिसटंकः किंभूतोनलः निजभुजयुगलबलेन आत्मबाहुद्वयसाम
र्थ्येन विदलितंविध्वस्तंयत्सकलंवैरिवृंदं समस्तारिकदंबकं तस्यया सुंदर्योवध्वस्तासांनेत्र। नीलोत्पलेभ्योगलत्
श्रवत्याबहलानिबिडावाष्पपूरः अश्रुप्रवाहस्तस्मिन्। प्लवमानस्तरत्प्रतापएवराजहंसोयस्यसः एतावतास
र्ववैरिविनाशेनप्रतापाधिक्यं। तस्यदर्शितं। तथासकलजलनिधीनांवेलावनेषुतीरकाननेषुसकलमंडलविजयात्
निखातानिक्षिप्तायकीर्तिस्तंभाजयस्तंभास्तैर्विभूषितंशोभितंभुवनवलयंभूमंडलंयेन सवेलापदेनवाब्धितीर
भांभाजलकंधीतिपदं करिकलभादिवद्वुद्धपोषकत्वात्नदुष्टंपुनः किंविशिष्टः बहुधाअनेकशःरणक्षमः संग्रामकु
शलः। कइवबसंधरायाः आभोगइवपरिपूर्णताइवसोपिबहूनांगिर्य्यादीनांधारणक्षमः समर्थः॥ आभागः परिपू
र्णत्ववरुणच्छत्रयोरित्यनेकार्थः॥ तथानवस्याश्चर्थात् देवीउसंबद्धांहरंतीत्येवंशीलः वस्याहारीकइव। प्रसादइ
व नृपमंदिरमिवभवनचयाम्। श्यालेपविशेषेणहारीरम्यः तथाअनेकधासप्तांगत्वाद्बहुधायामाराज्यलक्ष्मीः तस्याआ
श्रयआधारः स्वाम्यमात्य। सुहृत्कोशराष्ट्रदुर्गबलानिच। राज्यांगानिप्रकृतयइतिराज्यंसप्तांगमुच्यते। कइवरविरिवस
च अनेकस्वप्रचुरस्वधाम्नः तेजसआश्रयाभवतिनथा सदानित्यस्त्रीजनस्यरमणीलोकस्य रम्यतयानवः अपूर्वइवक
इवदनुजलोकइवसचदानवैः सहवर्त्तनइति सदानवोभवति॥ किंभुतोनलः विश्वेषांसमस्तानांअमित्राणांशत्रूणांत्रासं
भयंजनयंतीति। विश्वामित्रत्रासजननः। कइववशिष्ठइव। सचकीदृक् विश्वामित्रस्यगाधियस्यत्रासजननोभयकृत् त्रि
शंकुनाम्नः क्षत्रियस्यविश्वामित्रेणसत्रंकारितमासीत्तत्ताडयाइयाजकेनतस्मैक्रुद्धो। वशिष्ठः स्वर्निवासंतस्यनिवा

चं०द०
१९

तवानित्यर्थः ।।पुनः किंभूतोनलः परिक्षितनयः परिक्षितोनिर्वासितोनयः षाड्गुण्यं येनसः । कइव जनमेजयइवन
पविशेषइव । सचकीदृक् । परीक्षिरभिमन्यो नृपस्यतनयसुतः परीक्षितनतनय । तथापरशुभासितः परस्मिन् उ
त्कृष्टे शुभकल्याणे आसीत स्थितः यद्वापरेषांजनानां शुभाय आसीतः । कइवपरशुरामइव सचकीदृक् परशुनाकुठो
रेणभासितादीप्तः पुनः किंभूतः नलः अलघुकोगारवार्हः तथादंडस्य बंधस्यपरिक्लेशार्थं लक्षणस्य भंगेनमुक्त्या
रंजिताः आवर्जिताः प्रमोदिताजनाएव जनकाः येनसः यद्वादंडोगर्वो तस्य भंगो नयनं विनयइत्यर्थः तेनरंजि
ता जनकः पितायेनसः । यद्वादंडश्चतुर्थोपायतस्य भंगेनमोचनेनरंजितलोकः । दंडः सैन्यदमयम । मानस्यइहभे
दष्व श्वकानुचरमथि । प्रकांडलगुडकोणचतुर्थोपायगर्वयोरित्यनेकार्थः कइवराघवइवरामइवसचकीदृक् अलघु
कोदंडस्य आभवहदधनुषोभंगेनरंजिताहर्षिताजनकाजनकाख्यनृपोयेनसः । पुनः किंभूतानलः जातरूपसंपत्तिः
जाता संभूतारूपसंपत्तिः सौंदर्यसमृद्धिर्यस्यसः । रूपंतु श्लोकशब्दयोः पत्रावाकोरसौंदर्यनाणकनाटकादिकेग्रंथावृ
त्तोस्वभावेचेत्यनेकार्थः ।। कइव सुमेरुरिवमेरुरिव । सचकीदृक् । जातरूपसुवर्णसंपत्तिः संपत्तयस्यसः पुनः कीदृक् नलः
पुण्यंभजतीत्येवंशीलः पुण्यभागीतथारथोस्यास्तीति । रथीवान् । तथासतहितैः स्मरस्कारिभिः मित्रैः वर्त्तत इति सहितः कै
इवतुहिनाचलइव । हिमवानिव । सचकीदृक् । पुण्यापवित्रायाभागीरथीगंगातयासहितो ऽन्वितः । पुनः किंभूतः प्राणि
नां अर्थिनां चिंतामणिरिवचिंतितप्रदसमर्थ इव । यथा चिंतामणिश्चिंतितंसर्वंदत्ते तथासोपि ।। तथासंग्रामायप्रभवंतीति
संग्रामिकासांयुगिनास्तेषांमध्ये अग्रगण्योमुख्यः । महासांग्रामिक इत्यर्थः । संतापादिभ्यश्चतुर्थ्यंतेतत्प्रभवतीत्यर्थेठ
ञ् तथादर्शनीयानां दर्शनार्हाणां वस्तूनांमध्ये आदर्शइव । दर्पणइवयः सः यथा आदर्शः सुतरांदर्शनीयः भवति विघ्ननाश
कत्वात् । आदर्शदर्शनादेवसर्वेविघ्नाः प्रलीयंते इतिवचनात् तथायंनलोपिसुतरांदर्शनीय इति भावः ।। तथाअध्यय राम
नं पठनं विदंतीति अध्ययनविदास्तेषांमध्ये उपाध्याय अध्यापकः प्रधानोध्ययनविदित्यर्थः । तथाशौर्यशालिनां शूरा १९

149/1953

णांमध्ये आचार्योमुख्यः । तथास्त्रज्ञास्त्रस्य धनुर्वेदस्य उपदेशक उपदेष्टा कथकः ।। तथादृढसत्त्वामप्रहरंतीत्ये
वंशीलादृढप्रहारिणस्तेषांदृढप्रहारदातॄणांमध्ये परिवृढः स्वामी । तथापुण्यकारिणां धर्मकारिणांमध्ये अग्रगण्य
तइति अग्रेगण्यः मुख्य इत्यर्थः ।। तथाविपश्चितांविदुषांमध्ये अपश्चिमः प्रधानः तथात्यागवतां दातॄमध्ये अपाश्चात्य
प्रथमः तथाचातुर्याणां चार्या दक्षत्वशिक्षकाणांमध्ये अचरमः प्रवरः । परमश्चातुर्यविनेतेत्यर्थः । तथा अपर्यंतः प्रचुरो
याभूभारः तस्याधारधरणेस्तंभभूतस्तंभोपमेआयतत्वपीनत्वसाम्यात् द्वेभुजकांडेबाहुदंडौ तयोः कीलितान्यस्ताशाल
भंजिकेवाचरंती शालभंजिकायमानाविजयश्रीर्जयलक्ष्मीर्येनसः अन्यापिपुत्रिकास्तंभेकील्यत इति ध्यायार्थः ।। पुनः किं
भूतः समस्तंजगदेवप्रसादः सौधंतस्यशिरसि शिखरेवतंसभूतो अवतंसतयाजातः कांतोमनोज्ञः कीर्तिरेवध्वजः पताकायस्य
स्यसः । यस्यकीर्तिर्जगतिसर्वेषां अप्युपरिविजृंभितेत्यर्थः जगतः प्रसादः कीर्तेश्च ध्वजउपमानंतथाराज्यलक्ष्मीरेव करेणुका
हस्तिनीतस्याः यच्चापलंचांचल्यं तस्यसंयमनेनिवारणे शृंखलेवयः सः । यथा शृंखलयाकारणकाचापल्यं निषिध्यते
। तथायेनराज्यश्रीचापल्यंनिषिद्धं । राज्यश्रीस्तंविहायान्यत्र यातीतिभावः ।। अथनलीयगुणवर्णनांचिकीर्षया आह ।। य
स्येति ।। यस्यनलस्यगुणाः शौर्यौदार्यधैर्यादयोभगवतः ऐश्वर्ययुक्तस्य विश्वंसृजतीति विश्वसृट् तस्यविश्वसृजः कमल
संभवस्यब्रह्मणः कर्णलग्नाविज्ञापनार्थं निकटेविभ्रताः । स्वर्लोकमधिवसंतिस्मनिवासंचक्रुः । उपान्वध्याङ्वसइतिवसतेराधा
रः कर्मसंज्ञः स्यात् किमितितत्रजग्मुरित्याह । सततंनिरंतरं एकस्मिन्नेवब्रह्मांडसंपुटे संकीर्णे आकुलोयोनिवासः
अवस्थानंसएवव्यसनंविपत्तिस्तेनविषीदंतीत्येवंशीलाः प्राचुर्यादेकस्मिन्ब्रह्मांडे अमांत इत्यर्थः ।। पुनः अनेकाया
ब्रह्मांडकोट्यस्तासांयाघटनानिर्माणंतामभ्यर्थयमानाइवप्रार्थयमानाइव । अन्योपिस्वनिवासभूमिसंकीर्णे स्वस्वामि
नंबहुभूम्यर्थंप्रार्थयमानस्तत्कर्णयोर्विज्ञप्तिंकुरुतेतथागुणा अपिस्वनिवासस्थाननिर्माणपविज्ञप्तये । ब्रह्मकर्णलग्नाः
बहुब्रह्मांडघटनांकारयंतीवेत्यर्थः । स्वर्गिभिरपितत्रतद्गुणावर्ण्यंत इति भावः ।। किंभूतागुणाः इंदुश्चकुंदश्चपुष्पविशेषः

कुमुदानि च श्वेतकमलानि इंदुकुंदकुमुदानि तानिव उज्वल्य साम्यात्कांतिः शोभा येषां तेन तथा सकललोकानां कर्ण
योः प्रियाणि घयइनवल्लभाभ्यागतावत् एतेन तथा। यथा प्रियातिथयः सबहुमानं प्रवेश्यंते। तथा यस्य गुणा अपि साभि
लाषं श्रूयंत इत्यर्थः॥ तथा यस्मिं श्च जनिता जनानामानंदा येन स तस्मिन् जनितजनानंदे राज्ञि नले नृपे मेदिनी भुव
नंदयति समृद्धां कुर्वाणे सति गीतादिष्वेव जातिसंकरादीनि आसन् प्रजासु न॥ तथा हि गीतेषु गानेषु जातयो नंदयंतिप्र
भृतयो षड्जादयो वा तासां संकरा मिश्रप्रतीतयः न प्रजासु जातयो विप्राद्याः तासां संकरा अनुचितसंबंधेन विप्लवाः। तथा ना
टकेषु च ध्रुवपदादिषु नाना अनेकस्वरविशेषविशिष्टा लयाद्भुतमध्यविलंबितलक्षणास्तेषां भंगा विच्छित्तयः न प्रजा
सु नाना अनेकविधा आलया गृहास्तेषां भंगा विनाशाः अपराधाकरणात्। तथा नृपेषु विषमाणि कर्तुं दुःसाध्यानि करणानि क
रणानि नलपुष्पपटादीनि अष्टोत्तरसंख्यानि तेषां प्रयोगा व्यापाराः न प्रजासु विषम एव विषमकः स्वार्थे कः करणानि युद्धत
स्य प्रयोगाः प्रवृत्तयः न केपि परस्परं युध्यंत इत्यर्थः॥ तथा वाद्येष्वातोद्येषु दंडः। कोणो वादनोपकरणं करः पाणिस्त
याः प्रहाराः आघाताः न प्रजासु दंडो बंधादिः कारागारजदयानु प्रहारो घातनं पश्चाद्द्वंद्वः दंडकृतप्रहाराः तथा पुण्यक
र्मणां धर्मकर्तव्यानां ये आरंभाः उपक्रमाः तेषु पुण्यकर्मारंभेषु प्रबंधाः सांतत्यानि नित्यं जनैः पुण्यकर्माण्येव क्रियंत इ
त्यर्थः न प्रजासु प्रकृष्टबंधाः रज्ज्वादिभिः॥ तथा शारीद्यूतेषु पाशो बंधस्तस्य प्रयोगाः शारयोर्हि दायैर्बध्यंते अक्षायैः
प्रासकाः एव प्रतीताः। न प्रजासु पाशो बंधन रज्जुस्तस्य प्रयोगाः न कोपि रज्जुभिः कमपि बध्नातीत्यर्थः॥ तथा पुष्पितकेत
कीषु दलकेतकीगर्भः तस्य छेदा विपाटनानि। न प्रजासु हस्तयोश्छेदाः कल्पनानि चौर्याद्यकरणात् तथा न्यग्रोधेषु वट
षु पादस्य मूलस्य कल्परचनाः न प्रजासु पादयोश्चरणयोः कल्पनाः कर्तनानि। तथा कंचुकमंडनेषु कंचुलिका विभूषा
रूपेषु वस्त्रविशेषस्तस्य विलेपणहृदयप्रमाणेन। कर्तनानि छेदनानि। न प्रजासु नेत्रयोः नयनयोः विकर्तनानि खंडना
नि॥ पुनर्नलं वर्णयितुकाम आह॥ यश्चेति॥ नलः कोपि पूर्वो विस्मयहेतुर्लौकिकं जगत्पालयंतीति यतेभ्यो नाहताएव वि

151/1933

मद्दशएव विलोकं सर्वां पालयतीति लोकपालस्तथा हि इंद्र्यादिना सोल्लमेव दर्शयति॥ यतो विबुधानां देवानां पतिरिंद्रः सपूर्व
पूर्वदिगयुक्तत्वात्। नलस्तु अपूर्वं उत्कृष्टो विबुधानां पंडितानां पतिः॥ तथा अन्यो हि धर्मराजो यमः दंडः करे यस्य सः दंडकरो दं
डपाणिः। नलस्तु न दंडो बंधादिः करः श्चरामदेयांशो यस्मादित्थं दंडकरः। तथा धर्मप्रधानो राजा धर्मराजः धर्मविजयित्वात्। त्रिवि
धा हि राजा धर्मविजयी लोभविजयी असुरविजयी चेति। यो हि सेवया दंडमात्रेण चतुष्यति स धर्मविजयी। यो हि परेषां श्रि
यं भुवं च गृह्णाति स लोभविजयी। यः श्रियं भुवं प्राणांश्च गृह्णाति सोऽसुरविजयीति विशेषः॥ तथा अन्यो हि प्रचेता वरुणः सहज
घन्यया पश्चिमया वर्त्मत इति स घंजेन्यः नलस्तु अजघन्यः अकुत्सितः तथा प्रकृष्टचेता उदारमानसः। जघन्यं चरमे त्रिष्वे
जघन्यं गर्हितेन्यवत्॥ तथा अन्यो हि धनदः कुबेरः सहउत्तरया दिशा वर्तत इति सोत्तरः। नलस्तु न विद्यते उत्तर उत्कृष्टो य
स्मादित्यनुत्तरः तथा धनं ददातीति धनदः अपरं येन च। नलेन सातेन सुखेन पृथ्वी प्रिया च भुक्ता निर्विष्टा तत्सुखास्वादे
न अनुभूतेत्यर्थः॥ किंभूतेन येन प्रचंडदोर्दंड एव दीर्घभुजप्रकांडमेव मंडपमंडली शोभनमंडपस्तस्यां विश्रांता श्रांतिम
पनीतवती विजयश्रीर्जयः लक्ष्मीर्यस्य सः अन्यापि या श्रांता भवेत्। सा मंडपमंडल्यां विश्राम्यतीति छायार्थः। मंडली शब्दस्तनु
यष्ट्यादिवत्स्वल्पवाचकः पुनः किंभूतेन श्रवणोत्पलदलमिव विशालत्वनीलत्वसाम्यात्। कर्णोत्पलपत्रमिव आचरती श्र
वणोत्पलदलायमाने तथा मानिन्या मानं लुंटत श्चोरयंत इत्येवंशीले मानिनीमानलुंटाके यद्दृष्ट्या मानिन्या मानो गलतीत्य
र्थः॥ ईदृग्विधे लोचने नेत्रे यस्य स तेन जात्याभिषकुद्मलं टलः धाकन्विति शीलाघे लुंटः धाकन्॥ सा तेनेति यदमरसिंहः अ
र्मसातस्कलानि चेति। किंभूता पृथिवी कामरूपाः प्रागज्योतिषाख्य देशास्तान् धरतीत्येवंशीला कामरूपधारिणी। तस्याः तथा
पृथिव्याः सकलजनमनांसि हरंतीत्येवंशीलं विशेषकं देशविशेषः॥ तथा पृथुलं विशालं लाटमंडलं देशविशेषः पृथुललाट
मंडलं तथा यस्या भुवः कुंतलो देशविशेषाः किंभूता अभिलषणीया स्पृहणीया जनानां कांतिः शोभा येषु ते तथा यस्याः ना
भिस्य स्य देशविशेषस्य भागो मध्यादिप्रदेशः श्लाघनीयः तथा यस्या भूमरीद्दग्विधा भूमिद त्राः किंभूता बद्धोलवल्याल

चं० स्तु०
२०

नाविशेषायस्मिन्‌सबहुलपलीकः। नद्युतश्चेति बहुव्रीहौ कप्। तथासरसां मालिकाश्रेणिःसैवअलंकारोमंडनं यस्य
सः॥ तथायस्याःप्रियइदृग्विधाः कांचाः देशविशेषस्यैव प्रदेशोविभागः किंभूतः प्रकटितः प्रकाशितः कामकोटिनाम्ना
दव्याविलासोमलषितार्थंपूरणलक्षणोयस्मिन्‌सः॥ किंभूताप्रिया। काम्यतइतिकाममभिलषणीयंरूपंधरतीत्येवंशी
लायद्वाकाममतिशयेनरूपधारिणी॥ तथायस्याःकांतायाःसकलजनमनोहारिविशेषकंतिलकं तथायस्याः पृथु
विस्तीर्णंललाटमंडलं अलिकं। तथायस्याःरमण्याः अभिलषणीयाकांतिःकृष्णस्निग्धछायायेषांते तथाविधाः कुंत
लाः केशाः॥ तथायस्यानासिकायां भवोनासिक्योभागः प्रदेशः श्लाघनीयोवर्णनीयः तथायस्याःप्रियायाईदृग्विधो
मध्यदेशउदरंकीदृक्। बहुलावल्व्यः उदरलेखायत्र सबहुलवलीकः। पुनः। कीदृक्सहारो मालिकालंकारेणरोमपंक्तिलक्ष
णमंडलेन वर्त्तत इति सरोमालिकालंकारश्च॥ तथायस्याःप्रियायाः ईदृशःकांचीप्रदेशः श्रोणितटंकीदृक्प्रकटितोदर्शि
तः कामकेलिः अनंगोत्कर्षस्य विलासोयेनसः प्रकटितकामकेलिविलासः॥ किंबहुनातस्याःभूमेःकांतायाश्रीर्किंब
हुधावर्ण्यते। सर्वलक्षणकारणत्वात्‌ तदेवव्यक्तिरस्याइतियस्याःपृथिव्या अंगेअंगाख्यदेशएवरंगेनर्तनस्थाने निरु
पमानःशैत्यमांद्यसौरभ्यात्स्वगुणत्रययुक्तत्वेनप्रधानोवायुस्तस्मिन्‌रूपमयायोसतिवनश्रीः काननलक्ष्मीरमणीय
तयाचारुतयानृत्यतीवक्रीडतीव अत्रवाततरलनमेवनर्तनं॥ किंभूतावनश्रीः कृष्णापिप्पलीअगुरुचंदनौवंतिकः
मलयश्चैतेषांआमोदः परिमलस्तया बहुधालकुचानांलकुचानां आभोगोविस्तारसोभूषणंयस्यासा॥ पक्षेयस्याःप्रि
यायाःअंगंत्वतीरमेवरंगोनृत्यभूमिःतस्मिन्‌निरुपमानवायत्यग्रायौवनश्रीस्तारुण्यलक्ष्मीरमणीयतयानृत्यतीव यूनः
प्रेक्षकटाक्षादिमिलासकरणात्‌किंभूता। यौवनश्रीर्नर्त्तवशात्‌कृष्णागुरुचंदनयोः कालागुरुचंदनयोरामोदेन सुर
भिणागंधेनबहुलोव्यासः। कुचाभोगएवस्तनविस्तारएवभूषणंमंडनंयस्यासा तथाविधाकिंबाह्यतः। अस्याःकिंचिद
प्यद्भुतंवर्णनीयमस्ति। तथाहि॥ कोप्यपरिच्छेद्यमहिमातथानवः पूर्वविलक्षणो अवतारोजन्मयस्यसः तथाभूतः॥ राम
२०

यश्चाणुत्तुनाक्रियस्यनवाःस्तुतयोऽवतार्यंते॥ अस्मिन्‌चितिनवावताराःस्तवास्पदं। सर्वेविपत्तिभ्योऽन्यःसाधारण
एव। सनत्वाराजापुरुषेषुउत्तमः पुरुषोत्तमः तथाअमारामोऽस्यास्तीति अमीनामीनोरोगः॥ यदिवानमयति शत्रून्
वश्यमिति कृत्वानमीश्चेतापाक्रांतारिचक्र इत्यर्थः। पुनःकिंभूतः नरूपेणकुत्सिताकुत्याद्दूषितःकलंकितः। तथाअंगी
कृतोविश्वविश्वंभरायाः समस्तपृथिव्याभारः तच्चिंतालक्षणोवीवधोयेनसः। स्वीकृतधराधरोपिकुत्सिताउर्म्मिःपीडा
यस्यसःकूर्म्मिः। अकूर्मिः कूर्मिःकृतः कूर्म्मीकृत। आत्मशरीरंयस्यसः। तथाविधोन। अंगीकृतभारोहि। पीडावान्‌भ
वति। अयंचभूभारंबिभ्रदपिनपीडांयत्ते॥ इत्याधिक्यमस्यनिवेदितं। उर्म्मिःपीडास्रवोत्कंठाभंगप्रकाशवीचिषु इत्यनेका
र्थः॥ तथावरोधिकोयआहवः संग्रामस्तंपुष्णातीति। वराहवपुट्। तेनवराहवपुषाक्रूरेणनराशियासेनपृथ्वीबभार
रेणकरणकरस्यमंतरेणवैरिणोजित्वास्वेनैवभुवंदध्रइत्यर्थः॥ तथानरेषुसिंहःशौर्यात्‌ हिरण्यंधनंकशिपुश्च भो
जनाच्छादसमुच्छिन्नोनष्टोहिरण्यकश्यपुर्यस्मात्सईदृग्विधोनच॥ तथाबलिनांबलवतांराज्ञांबंधनविधौबलात्कर
णविधानेवानवादैन्यंकथमेतान्‌गृहीष्यामीतिचेतसिवक्लव्यंनआकरोत्‌। दर्पिष्टभूपतीनप्यवध्नादित्यर्थः॥ तथारा
मःसुंदरः। तथाअलमत्यर्थंकश्वरश्रियं। कस्यब्रह्मणः ईश्वरस्यचशोभाः श्रियंद्रव्यंनापिनचापाहरत्‌हृतवान्‌। सर्व
देवस्वापहारिनेत्यर्थः॥ आत्मशोदेवानामुपलक्षणं॥ तथाबुद्धोविद्वान्‌पुनःकल्कंपापंविद्यतेयस्मिन्ती निकल्कीनी इदृक्
विधानियानिकुलानितेषुअवतारंजन्मकरोतीत्येवंशीलःकल्किकुलावतारकारी ईदृग्विधोन। नपापिकुलोत्पन्नइत्यर्थः
तथाअन्यएवपुराणपुरुषानदशावतारात्‌विसदृशएवनवावतारोनवसंख्यावतारः कोप्ययंपुरुषोत्तमोविष्णुरित्युक्ति
लेशः॥ अन्योहिपुरुषोत्तमोदशावतारोभवति। अयंचनवावतारः अन्योहिविष्णुर्मीनरूपदूषितोभवति अयंत्वनमीन
रूपदूषितइत्यादितुल्यार्थविरोधाद्भुतनाकार्याविष्णुःकीदृक्‌मीनरूपेणमीनावतारेणदूषितः॥ तथाविश्वंभराभारधरणे
कूर्मीकृतात्माकूर्मावतारः॥ तथावराहवपुषावराहावतारेणक्लेशेनभुवंअदधत्‌। तथानरसिंहावतारःसमुच्छिन्नोनिहतो

हिरण्यकश्यपुश्चदिभ्रश्यपनसनथाविध ः। तथाबलिनामस्यदैत्यविशेषस्यबंधनविधौवामनोवामनावतारः॥ तथा
रामोदाशरथिःलंकेश्वरस्यरावणस्यश्रियंराज्यलक्ष्मींजहार॥ यद्वारामःपरशुरामःसोप्यस्यविलोरवतारःसत्पक्षेश्च
लीमिति॥ भिन्नंकुउपतईश्वरक्रुश्वरःसहस्त्रार्जुनाजमदग्निहोमार्जुनीमात्रहरणात्प्रतिपक्षोजातःततस्तस्यश्रियम
हरत्। यद्वारामःकृष्णः। तदाकेनवायुनाउष्टईश्वरोभवति। पवनात्ञानत्वात्। यदिवाकस्यपापनीयस्ययमुनाहृदल
क्षणस्यईश्वरस्वामिकश्वरःकालियसर्पस्तस्यश्रियमपजहार॥ तथाबुधावतारः॥ तथाकल्किकुलेवतीर्णश्चविष्णुमीन
कूर्मवराहनरसिंहवामनरामबद्धकल्किनोइवसाराःकिंबहुनाकिंबहुत्तया॥ धन्याइति॥ तेदिवसाधन्याप्रशस्ताःयेषुदेव
संपुसव्यावर्णितानलेश्वेयनिलःसमभवत्। जातःकिंभूतः॥ भूपालेषुचूडामणिरिवयःसतथासर्वनृपतिप्रधानइत्यर्थः
पुनःकिंभूतःलोकालोकगिरींद्रेणमुद्रितालांछितायामहीभूस्तस्यांश्रांताअवस्थिताकीर्तिर्यस्यसः। तेचिरंतनाः
पूर्वकालीनालोकाअपिसुकृतिनःपुण्यवतःयेःलोकैस्तस्यनलस्यवक्त्रपंकेरुहवदनपंकजे। विस्फारितानि
अद्भुतावलोकनाद्विकासितानिनियानियानिनेत्राणितान्येवपत्रपुटकास्तैर्लावण्यंसौंदर्यंआस्वादितंपीतंलोचन
स्नहृपंदृष्टमित्यर्थः। पर्णानांनावाकृत्यान्यसनं। पत्रपुटकः॥ ३३॥ यइति॥ तेषांमहतांगुणानांसपार्थिवपुंगवोनृ
पश्रेष्ठएकाःद्वितीयनिधिर्निधानंतेषामितिकेषां। येगुणाःसमस्तभुवनेस्त्रिभुवनलोकैःकर्णयोरवतंसीकृताः
कर्णपूरीकृताःश्रुताइत्यर्थःकिंभूताःकुंदवतपुष्पविशेषवत्द्युतिर्येषांतेकुंदद्युतयः। यतएवकुंदद्युतयस्तत
एवकर्णावतंसीकरणमितिच्छायार्थः। तथायःगुणैःसर्वत्रदिग्भित्तयोदिकुतुड्यानिचित्रिताःविलिखिताःदिग्प्रां
तेपितकुणाःश्रयंतइत्यर्थः॥ उत्प्रेक्ष्यतेगुणैःकैरिवनालाकयालिखितैरिव॥ अन्यदपिलेखनात्चित्रितंभवति॥ त
थायःगुणैःवक्तुंहृदिकल्पितैरपिहृदयेन्यस्तैरपिवयंहर्षेणरोमांचिताःपुलकिताः॥ ३४॥ तथायस्यनलस्यनक्व
चिल्कुत्रापिवचनक्रमोवाक्यपरिपाटीअपार्थःअर्थादपेतःकिंतुसार्थः। कइवयुधिष्ठिरइवसोपिनक्वचिदपार्थोभवति॥ पृ

153/1933

थिव्याःआपत्यंपार्थः। अर्जुनःतद्रहितोभवति। सर्वत्राप्यर्जुनसहितस्यातएव॥ तथायस्यमानसंचित्तंअपापं
निःपापंकिमिवमरुमंडलमिवकिमपितदपिअपापं। अपेताआपोयस्मात्तत् अपापं ऋक्ष्युरस्य पथामनक्षइतिब
हुव्रीहौ॥ अप्रत्ययांतसमासांतः॥ तथायस्यकर्मकार्यंकष्टुउपकारेणसारंप्रधानंसपकारंसारं किमिवमहानसमिवपाक
रुद्धानमिव। तदपिसूपकारैःसूदैःसारंरुचिरं॥ तथायस्यदानंसत्पात्रवितरणात्शोभनंतथाकोटिगुणंकोटिसंख्यफ
लकरणात्। किमिवकार्मुकमिव। तदपिसंतौप्रकृष्टौकोटिगुणौअटनिज्येयत्रतत्॥ तथाविधंभवति॥ तस्ययस्य
राज्यंदृष्टवृषपर्वोत्सवं। वृषाधर्मःपर्वपौर्णमास्यादिःउत्सवःपुत्रजन्मविवाहादिःतेदृष्टाःअनुष्ठितायत्रतत्तथाविधं
किमिवदानवकुलमिवदैत्यकुलमिवतदपि। दृष्टोवृषपर्वनाम्नोदैत्यस्यउत्सवोमहे। यत्रतत्तथारूपंभवति॥ तथायस्य
हृदयंसर्वदाभ्रमरहितं॥ भ्रमःसंशयस्तेनरहितं। सर्वशास्त्रेषुप्रगल्भमतित्वात्। किमिवराजीवमिव। तदपिभ्रमरैर्भ्रमी
हितंसूक्ष्मकारिभवति॥ तथायश्चनलःपरमहेलाभिरतोपिपरमाहेलाशृंगारचेष्टातस्यामभिरतःआसक्तः। यद्वाप
रउत्कृष्टोमहउत्सवोयस्यांसापरमहाईदृग्विधायाइलाभूमिस्तस्यांरतःराजन्वतीहिमहीसदुत्सवाभवति। तथाअपार
दारिकःनपरस्त्रीलंपटःअपि। विरोधेयःयेषांयाःमहेलाःस्त्रियस्तासुअभिरतःआसक्तःसकथमपारदारिकःकिंतुपार
दारिकएवभवति। परिहारस्तुउक्तएवपरदारान्गच्छतीतिपरदारिकः। पश्चान्नयसमासः। गच्छतोपरद्वारेभ्यइतिठ
क्। तथाशांतनुतनयोपिनुतःस्तुतोनयोनीतिर्यस्यसःनुतनयःशांतश्चासौनुतयश्चशांतनुतनयःतथानकुत्सितरूप
युक्तः। अपिविरोधेयःशांतनुनृपस्यतनयोगांगेयोभवति। सकथंनकुरूणांक्षत्रियाणामुपयुक्तउपयोगीअपितुकुरूणामु
पयोग्येव॥ किंबहुनाकिंबहुत्तया॥ सदेति॥ हिमाचलोहिमाद्रिर्यस्यनलस्यसाम्यंसादृशंनोयाति। किंभूतःभूतनाथो
पिभूभृतांगिरयस्तेषांनाथोपिस्वाम्यपि। यथानलःभूभृतांनृपाणांनाथः॥ तथायमपिभूभृन्नाथःपरंतथाविधोपित
त्तुल्यतांनाप्नोतीत्यर्थः॥ कथयंतःसनलःसदाहंसस्वेदसाकुलंव्ययंप्रचलत्कंपमानंजडंव्यामूढंमानसंचेतोनबिभर्ति॥

अयं चेदृग्विधं मानसं बिभ्रदत्यौत्सुक्यतः कृतचुलामासादयेदिति ॥ सिद्धांते तु मानसं सरः सदेतिभिन्नं किंविधं हंसैराकुलं व्याप्तं तथा प्रचलद्भिरप्युनाकंपमानं जलं यत्र तत् स्वच्छजलं आकुलशब्दोभावप्रधानो । यथा तिष्ठंति च निराकुला इति माघ ॥ ३९ ॥ अपिचेति पुनर्नलस्य मेरुरपि साम्यं नाप्नोतीत्याह ॥ नक्षत्रेति ॥ यस्य नलस्य कांचनाद्रिर्मेरुः कांचनकांचिदपि समानतां तुल्यनानोयातिकिंभूतः स जातरूपोपि सम्यग् जातरूपं सुवर्णं यत्र तथाविधोपि यथा नलः सम्यग्जातं उत्पन्नं रूपं सौंदर्यं यस्य स तथाविधः तथायमपि स जातरूपः परं साम्यं नाप्नोति । कथमित्याह यतो नायं क्षत्राङ्कुरः स्म । तथा भोगे न युक्तः किंभूतस्य यस्य क्षत्रकुलप्रसूतिर्जन्म यस्य सः तस्य तथा खलु निश्चितं भागात् राज्यादीन् भजतीति भोगभाक् तस्य अतः साम्ये निषेधः सिद्धांते तु नक्षत्राणां भूरुत्थानं तथा न भ सिग गच्छतिये तन भागादवाप्ते युक्तः ॥ किं ॥ सर्वविभक्त्यंता श्चित्वनो प्रयोज्यो ॥ भू शब्दस्थानमात्रवचनः यथा उदजांगणभूमिष्वित्यत्र भूमिशब्द इति ॥ इंद्रवंज्रा ॥ ३५ ॥ तस्य च महामहीपतेर्महान्नृपस्य श्रुतशील इति नामेति प्रसिद्धो महामंत्री बृहत्सचिवो अस्तिस्म आसीत् । किंभूतः श्रुतशीलः सकलाः कृत्स्नाः याः श्रुतयो वेदाः शास्त्राणि च व्याकरणादीनि तान्येव शासनाक्षरमालिकाः आदेशवर्णपंक्तयः इत्थं विधेयं इत्थं न विधेयमित्यादिरूपास्तासां प्रशस्ति स्तंभः यथा प्रशस्ति स्तंभे लिखिता शासनाक्षरपंक्तिः अविच्युता भवति तथा यस्य हृदये श्रुतिशास्त्राणि स्मृतिवशादविनश्वराणि संतीति भावः ॥ तथा पुण्यकर्माण्येव प्ररोहाः अंकुरास्तेषां न्यग्रोधपादपो वटवृक्षः यथा न्यग्रोधपादपाद्बहवस्तदंकुरा उत्पद्यंते । तथास्मात् पुण्यकर्मोत्पत्तिरिति ॥ तथा साधूनां सतां ये व्यवहाराः यद्वा साधवो रम्या ये व्यवहारा व्यापारास्त एव रत्नानि तेषां आकरः खनिर्यथा आकरात् रत्नानि जायंते तथास्मात्स द्व्यवहारा इति भावः तथा पार्थिवनीतिर्नृपसत्क व्यवहारः स एव ज्योत्स्ना कौमुदी तस्याः इंदुश्चंद्रः । यथेंदो ज्योत्स्ना विसलति । तथा तस्मिन् नृपाणां नीतयः इति नृपनीतिविदेव किल नृपाणां संन्यायप्रवर्त्तनं कारयेदिति ॥ स तथा सकलकलाएव अंकुरकलापः प्ररोहवृंदं तस्य

155/1933

कंदः यथा कंदात् प्ररोहाणामुत्पत्तिस्तथा तस्मात् सकलकलानामिति ॥ तथा समस्ता ये पुरुषगुणाः शौर्यादयस्त एव मणयस्तेषां सागरः यथा कंदात् प्ररोहाणामुत्पत्तिस्तथा तस्मात् सकलकलानामिति ॥ तथा समस्ता ये पुरुषगुणाः शौर्यादयस्त एव मणयः तेषां सागरः यथा सागरे मणयः प्राप्यंते तथास्मिन् पुरुषगुणा इति ॥ तथा चपला अन्यत्र गत्वरा या राज्यलक्ष्मीः सैव करेणुका हस्तिनी तस्या आलानस्तंभो बंधनस्तंभः यथालानस्तंभेन बद्धा करेणुर्नान्यत्र याति तथा येन राज्यलक्ष्मीः स्वस्वामिनं नलं विहायान्यं नृपं न संक्रामतीति ॥ तथा सकला ये भुवव्यापारा भूव्यवहारास्त एव पारावारः समुद्रस्तत्र नौकर्णधारो नाविकः यथा नाविकेनाब्धिस्तीर्यते तथा येन भूव्यवहाराः सर्वेपि तीर्णास्तत्सरिच्छेदात् ॥ कर्णधारपदेनैव नाविकत्व प्राप्तेनौशब्दो हयहेषितादिवदुत्कर्षपोषकः सकलभुवनव्यापारनौकर्णधार इति पाठे सकलभुवनव्यापार एव नौर्वेडा तत्र कर्णव्यापारया धारस्त्वयः सः यथा कर्णधारेण नौर्व्यापार्यते तथा येन भूव्यापाराः सर्वेपि व्यापार्यंते स्मेति भावः ॥ पुनः कीदृक् स धांभोनिधिः क्षीराब्धिस्तस्य ये डिंडीरपिंडाः फेनराशयः तद्वत्पांडुरं यद्यशः तदेव कुशेशयखंडं कमलवनं तेन मंडितं भूषितं संसार एव सरो येन सः कुशेशयः खंडं संसारस्य च सर उपमानं एतावता अस्य सर्वत्रापि यशोस्तीति द्योतितं ॥ तथा सरागीकृताः स्वस्मिन्ननुरागिणः कृताः समस्ताः पार्थिवस्य नलस्य अनुजीविनः सेवका येन सः सर्वेपि नलसेवका इत्यर्थः अस्मिन्ननुरक्ता इति भावः ॥ तथा तस्य नलस्य जीवितसमः भेदे यत्राप्येकार्थपदप्रयोगेणाधिक्यं द्योत्यते अधिकं नलजीवितं तुल्य इत्यर्थः तथा हृदयसमः चित्ततुल्यः किं बहूच्यते शरीरमात्रेणैकं केवलं शरीरेण भिन्नः पृथक् द्वितीय इव आत्मा वस्तुतः ततो रेकएवात्मा परं शरीरभेदेन द्वितीय इव प्रतिभासते । एको नलशरीरांतर्गतो द्वितीयोयं श्रुतशीलदेहांतर्गतो नलस्यैवात्मेत्यर्थः ॥ एतावता तयोः परस्परानुकूलत्वं द्योतितं । तथा कुलक्रमेण नलीयवंशपरिपाट्या आगतः प्राप्तः नलवंशे पूर्वमप्यस्यैव पूर्वजा मंत्रिण आसन्निति ॥ तथा नलस्य सखा स्वरूः स्वयोः संक्रांते दर्पणः आदर्शः यथा दर्पणे अभिमुखपदार्थगतयथावस्थित

चं० टी०
२३

रूसमंकां निर्भवति तथास्य हृदि न लीयमानः दुःखयोः संक्रमो जायते यदा नलस्य सुखं तदास्यापि सुखं यदा तस्य दुःखं त
दास्यापि दुःखमिति भावः॥ तथा स्वभावेन प्रकृत्या नलेऽनुरक्तः अनुरागवान् कदाचिन्न त्यातिक्रान्त्या कारणेन नलेसानुरागोपि व
स्कृवस्तस्मिन्ननुरज्यत एवेत्यर्थः तथा शुचिः शुद्धः तथा सत्यावितथा पुतानि निर्दोषा वाक्यस्य सः तथा कृतं जानातीति
कृतज्ञः परकृतोपकारवेत्ता तथा ब्राह्मणो द्विजवंशोत्पन्नः तथा बाल्यकाल थनस्य मंत्रिणः सूनुः पुत्रः। मित्रमिति॥ स। श्रु
श्रुतशीलनामा तस्य भूपस्य नलस्य मित्रं च बभूव आपादि रक्षकत्वात्॥ तथामात्य बभूव सद्बुद्धिदायकत्वात्। तथा
मंत्री च बभूव। सर्वरहस्योक्तिस्थानकत्वात् तथा प्रियश्च बभूव अत्यंतरक्षणीयत्वात्॥ तथा विद्याभिः शास्त्रैः वयसा च
तारुण्येन शीलेन च सदाचारेण गुणैश्च औदार्यादिभिः समानस्तुल्यः॥ यादृशा नलस्य विद्यादयस्तादृशाः श्रुतशीलस्या
प्यासन्। तथापि विश्वंभराया भुवो भारं चिंतारूपं विविधं। सहत इति विश्वंभराभारसहः॥ ईदृग्विधः सहायः सहचरः
यथा नलो भूभारं धत्ते। तथासावपि॥ अपि चेति॥ पुनर्विरोधाधारेण मंत्रिणं व्यावर्णयन्नाह॥ ब्रह्मेति॥ ब्रह्मणे ब्राह्मणा
य हितो ब्रह्मण्यः ब्राह्मण्यः ब्रह्म न थयवरवलति लमाषवृषात् ब्रह्मस्यदने कार्थः ब्रह्मण्यो ब्रह्मणे हितनाने श्वरे इति। तथा
ब्रह्माणं वदं वेत्ति। ब्रह्मवित्। तथा तापं संतापं हरतीत्येवं शीलः तापहारी। तथा क्रियायुक्तः तथा प्रायशो बाहुल्येन
विप्रैः द्विजैः युक्तः। तथा सन् शोभनो वेष आकृत्यायस्य सः सद्वेषः। तथा द्वेषको धान्निर्मुक्तं द्वेषरहितं चित्तं यस्य सः
द्वेषनिर्मुक्तचित्तः॥ अपि विरोधे यो ब्रह्मण्यो भवति स ब्रह्मवित्तापहारी ब्रह्मस्वापहर्ता कथं स्यात्॥ तथा यः स्त्रीयुक्तः
स कथं विप्रयुक्तो वियुक्तः। तथा यः सद्वेषो द्वेषयुक्तः स कथं द्वेषनिर्मुक्तचित्त इति तत्परिहारस्तूक्त एव॥ तादृक् श्रुतशी
लसमः अन्यः को वा दृश्यते वीक्ष्यते श्रूयते वा न कोपि स एव प्रकृष्टगुणयुक्त इत्यर्थः॥ शालिनी॥ अथानंतरं पार्थि
वानलस्तस्मिन्॥ अमात्य परिजनस्य सचिवलोकस्य परिवृढः स्वामी॥ तस्मिन् श्रुतशीले मंत्रिणि राज्यस्य प्राज्यः प्र
भूतो यश्चिंताभरस्तं राज्यभारं निधाय निवेश्य एवंविधे वयसि तारुण्ये वर्तमानः स्वयमात्मना अनवरतमजस्रं। स

राम
२३

157/1933

कलोपः संसारसुखसंदोहे विषयसुखातिशयस्तमन्वभूत्। विशेषेति। विशिष्टः पार्थिवः मानिन्याः मानवत्याः स्त्रि
यः मानस्याहंकृतेः सर्वस्वं धनमिव यः स यं दृष्ट्वा मानिन्या मानोपयातीत्यर्थः। किंभूते तस्मिन् प्रौढं प्रगल्भं प्रेम स्नेहो
यस्मिन् स प्रौढप्रेमा॥ तस्मिन्। तथा निगूढः परैरपरिच्छेद्यो मंत्रो रहस्यालोचनं यस्य स निगूढमंत्रस्तस्मिन्। तथा तृणीकृत॥
स्तृणवदसारः कृतः स्त्रीणामयं स्त्रैणो विषयरसो विषयरागो येन स। तस्मिन्। स्त्रीषु नासक्त इति भावः स्त्रैणेति। स्त्रीपुंसाभ्यां
नयस्नञाविति स्त्रीवाचकान्नञ्। तथा सौराज्ये सम्यक् नृपतिभावे यो लोकानुरागस्तं जनयतीति सौराज्यरागजननस्तस्मिन्। अने
न मंत्रिणा तथा सच्छिक्षा प्रदीयते। यथा राज्ञः सम्यक् नृपतित्वे रागः संजायते राजा सम्यक् नृपो भवतीत्यर्थः॥ तथा जनस्य लोकस्य
जननीवदाचरतीति जननीयमानस्तस्मिन्। यथा जननी बालकं॥ साधुतया पालयति। तथायं जनानिति॥ तथा अमात्यानां
भयधर्मार्थकामैश्चर्यापरिक्षासा उपधा सर्वाभिरुपधाभिर्मंत्रिपरीक्षाभिः शुद्धा बुद्धिर्यस्य सः तस्मिन् एवंभूतप्रभूता
मात्यगुणोपेतेत्यर्थः॥ अथ वयो विशेषेणाह किंभूते वयसि। अस्मिन् वा नव्यो यौवनारंभस्तेन रमणीये रम्ये। तथा रमो
या रमणीजनः स्त्रीलोकस्तस्य हृदयं नमनयोः प्रियमिष्टं यत्तत्तस्मिन्॥ तथा प्रियंगुः फलिनी लता तद्वत् श्यामः कायकां
तिर्यस्य तत् प्रियंगुभं तस्मिन्॥ तथा जितं रूपसौंदर्याभ्यां जितं मदनस्य महस्तेजो येन तत्। जितमदनमहः तस्मिन् तथा
। अपहसितं तिरस्कृतं सुराणां सौभाग्यरूपं यशो येन तत्। तस्मिन्। तत्सौभाग्यात्। अस्मिन् सौभाग्यमधिकमित्यर्थः त
था विस्मापितानि साश्चर्याणि कृतानि समस्तजनमनांसि येन तत् तस्मिन्। तथा लसन् उल्लसन् यो लावण्यपुंजो लवणि
मसमूहस्तेन परिजितं जितं समुद्राभा येन तत्। तस्मिन् लावण्यं लवणभावः सौंदर्यं च। तथा कांत्या कटाक्षितं निराकृतं चं
द्रमहो विधुज्यायेन तत् कांतिकटाक्षितचंद्रमहस्तस्मिन्॥ अत्र वयसः शरीराभृथक्त्वात्तच्छरीरविशेषणानि अपि
वयस्युपवर्यंते॥ अथ स्वानुभवनप्रकाराद्वर्णयति। तथाहीति॥ कदाचित्कस्मिंश्चित्काले नरो हरिवाहनविलासं हरि
श्चतस्य वाहनं वाह्याली प्रवर्तनं तद्वद्विलासस्तमकरोत्॥ किंभूत। तदुत्कल्या संजाता विषमा उच्चारण भीर्युद्धभयं यस्य सः

चं०वृं०
२४

तथा अहितानांशत्रूणां अपकारी अपकर्त्ता कइवगरुडइव।।यथागरुडस्तार्क्ष्योदरेःविष्णोर्वाहनविलासोवाहनलीलातंक
रोति।वाहनत्वंभजतइत्यर्थः।किंभूतः।नउत्पन्नंविषान्मरणभयंयस्यसःतथा अहीनांसर्पाणांतापंसंतापंकरोतीत्येवं
शीलोऽहितापकारी।।तद्भक्षकत्वात्।।तथाकदाचित्नलःपर्वतभुवगिरिक्षोण्यांविजहारचिक्रीड।विपूर्वोहरतिःक्रीडा
यांवर्त्तते यदुक्तंक्रियाकलापेक्रीडार्थाविहरतिरमते।खेलतिखेलयतिचेतिखल्वार्थाइति।किंभूतायांपर्वतभुवि।मदनः
मि कोगाढोधन्तूरोवा।।बाणोवृक्षविशेषःआसनःप्रियकः।अतिमुक्तकोवासंती।शणमुंजस्ततोद्वंद्वैःसम्यक्छादि
तायांआच्छादितायांकइव।चंद्रमौलिरिवशंभुरिव।यथाशंभुःपर्वताङ्गवर्तीभूतिपर्वतभूस्तस्यांपर्वतभुविगौर्य्यांविहरति
क्रीडति।किंभूतायांपर्वतभुवि।मदनःकामःतस्यबाणासनंधनुस्तेनअतिमुक्ताएवअतिमुक्तकास्वार्थेकःप्रतिक्षि
प्तायेशराःबाणाःउन्मादनमोहनादयस्तैःसंछादितायांवि।धूरितायांमदनाकुलायामित्यर्थः।।तथाकदाचिन्नलः
शिशिरायकमलाकराःसरांसितेषांअवगाहनेनअवलोकनेनउत्पन्नायेपुलकाःरोमांचास्तैःकोरकिताकुड्मलितात
नुःशरीरंयस्यइत्थंविधःसन्अनंतान्बहून्भोगान्विलासान्।भजतीतिअनंतभोगभाक्सुखमानंदंअन्वतिष्ठत
अकरोत्वैषयिकंसुखंबभाजेत्यर्थः।।यद्वाकमलानांआकरोवनंकइवअच्युतइवविष्णुरिव।सोपिअनंतस्यशेषस्य
भोगमहिकायंभजतीतिअनंतभोगभाक्सुखंअनुतिष्ठति।।किंभूतःअच्युतशिशिरःशीतलःसमुद्रोत्पन्नत्वात्कम
लायाःकंलक्ष्म्याःयःकरःपाणिःतस्यअवगाहनेनग्रहणेनउत्पन्नायेपुलकाःतैःकोरकिताततनुर्यस्यसःतथाविधः
।।तथाकदाचिन्नलोराजसभायांनृपसदस्यवस्थितःप्रजाव्यापारंप्रकृतिव्यवहारं।अचिंतयत्जनानांसत्यासत्यादि
विवेकमकरोत्।कइव।नलिनयोनिरिवब्रह्मेवसोपिराजसभावरजोगुणेस्थितःसन्प्रजाव्यवहारंलोकनिर्माणंचिंतय
ति।।तथाकदाचित्नलःकांतानांअंगनानांउन्नमंतीयौवनभराद्दृश्यमानायापयोधरमंडलीस्तनपंक्तिःतस्यावि राम
लासेनउपभोगेनहर्षंप्रमोदमभजत्।कइवमयूरइव।सोपिकांताकाम्याउन्नमंतीवर्षणायप्रगुणीभवतीयापयोध २४

159/1933

रमंडलीमेघमालातस्याअवलोकनयोविलासोनृत्यंतेनहर्षंभजति।।तथाकदाचित्नलःअश्वाःसंत्यस्यामितिअ
श्विनीतयारोनयासहितोयुक्तःतथामृगान्अनुलक्षीकृत्यसरतीतिमृगानुसारीमृगानुगामीसन्बहूनिशिप्याणिबा
लत्वणानियत्रेदृग्विधंवनमार्गंवनपथंबभ्रामअभ्राम्यत्।कइवनक्षत्रराशिरिवभपंक्तिरिवसोपिबहुशोबहुप्रकारंप
वनमार्गंनभोभ्रमतिकिंभूतःअश्विन्यानक्षत्रेणसहितःकिंभूतयाश्विन्यासहइनेनरविणावर्त्ततइतिसेनातयापुनःकिं
भूतोमृगंमृगशीर्षंअनुसरतीतिमृगानुसारी।।अत्रपक्षएकारात्प्राक्विसर्जनीयउपध्मानीयोवाशाप्यपदेतुषकारएव।तद
वंरूपभेदेपिश्रुतिसाम्यान्नदोषइतिकविसमयः।।तथाचचंडसिंहकृतेश्रीचंडिकाचरितेमहाकाव्ये।पुष्पादिपामिहस
दाधिगमेसमृद्ध्या।पुःपादपाःफलभराच्चविनम्रभावं।पुष्पादपापिदधतोमुनिवत्सजन्मा।पुष्पादपातिमधुसाधुमधुव्रतो
घाः।।अपांजलानांअधिगमेप्राप्तौसत्यांपुष्पाकुसुमात्फलभरात्चफलातिशायात्तयासमृद्ध्यातयापादपाःतरवोविन
म्रभावंआपुःसमृद्धेर्हिनमतास्यात्।जलाधिगमःपुष्पफलानांहेतुःताविवसमृद्धेःसाचनम्रतयाइति।।तथापुष्पाणांअ
तभक्षणंतयाअपापिपापरहितंशोभनंजन्मयथामुनयोदधति।तद्वदेवएतेपिमधुव्रतौघाःसजन्मधारयंतःसंतोमधुम
करंदंअपुःपिबंतिस्मपादैःअंघ्रिभिःपादेषुमूलेषुवापतंत्यभीक्ष्णमित्यनेनमधुप्राचुर्योक्तिः।।अत्रायुक्पादयोःपकार
एवयुग्मयादयोश्चविसर्गउपध्मानीयोवानतुषकारःपरंश्रुतिसाम्याददोषः।।एवंविसर्गजिह्वामूलीयषकारेष्वपि।।यथाये
सहजन्निलंकाचाराअपिभांतिनिस्त्रीकूटगमात्।सुधियकाष्ठादशाकंधराधिकंसपदितेश्नुवते।।१।।सहजोवृत्तिर्मोनिःक
लंकानिर्दोषआचारोयेषांतथोक्ताःसुधियःकाष्ठादशाकंदिग्वक्त्रंधरैःपर्वतैरधिकमश्नुवतप्राप्नुवतप्राप्नुवंति।स्त्रीणामभ
भावोनिस्त्रिकूटंपक्षतस्यगमोभ्रंशःकुटगमःनिस्त्रिचकूटगमश्चनिस्त्रीकूटगमंइतिसमाहारद्वंद्वःएतेनजितेंद्रियत्वमु
क्तिःअपिविरोधेयेषांकिलमहसस्वर्णायांलंकायांचारोगतिःतेकथंत्रिकूटाचलभंगनाभावेनभांतिदशाकंधरोरावणःकाष्ठा
दिशः।।अक्षरार्थेनिष्कशब्दपएव।निःकलंकपक्षेजिह्वामूलीयविसर्गौतथाकदाचिन्नलःअक्षैःप्रासकैःविनोदंक्रीडांअ

चं०२०
२५

न्वतिष्ठत। अकृतककर इव अंजनाया अपत्यं आंजनेयः हनूमान् सइव। सोपि अक्षस्य रावणात्मजस्य विनोदं
वधं चकार। तथा कदाचित् सुग्रीवश्शोभनाग्रीवायस्य सः नलः वेस्फुटं देहीति ब्रुवाणस्य कथतः तथा असमं बालघ्यां का
कौभिन्नकंठध्वनौ तिष्ठतीति आलघुककाकुत्स्थः तस्य याञ्चावशात् स्वरभेदवतो ऽर्थिनो याचकस्य प्रार्थनासफला क्रियतां
इति अमुना प्रकारेण नरपुंगवान् नरश्रेष्ठान् आदिदेश। आदिष्टवान्॥ वासमुच्चये॥ कइव वानरेश्वर इव यथा वानरेश्वरक
पीन्द्राः सुग्रीव आदित्यस्तनुः हेवैदेहीसीतेति ब्रुवाणस्य प्रलपतः अलघोर्गुरोः काकुत्स्थस्य रामस्य अर्थिनः सप्रयोज
नस्य प्रार्थनासफला क्रियतामिति वानरपुंगवान् कपिमुख्यान् निर्युक्तवान् काकुत्स्थत्यत्र श्लेषत्वात् वर्णलोपो न दोषाय
॥ तथा कदाचित् नलो मार्गणान् याचकान् इष्टार्थसंपादनेन सुमनसः सौमनस्ययुक्तान् विधाय स्वस्य गुणं त्यागाख्यं जगतो
पि कर्णपूर्यते नेनेति कर्णपूरः। अकर्णपूरं कर्णपूरं कृतवानिति कर्णपूरीचकार। सर्वस्यापि जगतो मार्गणैः स्वगुणं श्राव
यामासेत्यर्थः। कइव मकरकेतन इव। मन्मथइव। यथा मकरकेतनः सुमनसः पुष्पाणि मार्गणान् शरान् विधाय स्वगुणं। नि
जज्यां कर्णपूरीकरोति आकर्णांतमाकर्षति तथा कदाचिन्नलः उच्चैरतिशयेन उन्नताभ्यां स्तनाभ्यां पयोधराभ्यां। नाभ्या च रम्याः
तथा कुमाः अनिमिषा निनिर्मेषा नयनविभ्रमा नेत्रलीलया भिस्ताः॥ तथा सकंदर्पाः सकामा वेलायां वारके विलसंति भोगे
य उपतिष्ठंत इत्येवं शीला वेलाविलासिन्यः स्ता मिषेवे कइव अंभोनिधिरिव। अब्धिरिव। सोपि वेला अंभोरुहाः सेवंते किं
भूतास्ताः उच्चैरधिकाः। तथा स्तननेन नादेन अभिरम्याः तथा कृतमणीमिषाणां मत्स्यानां नयनं प्रापणं यैस्तथोक्ताः विवि
धाभ्रमा आवर्त्ता यासु ताः॥ तथा कं जलं तस्य दर्पणमोक्षणसदवर्तत इति सकंदर्पाः। दर्पेर्मी मवनार्थत्वात्। कं शिरोंबुसु
खेषु कंम्बे। मंत्रेकचकमव्ययं इत्येकाक्षरमाला॥ तथा किलसंत्यभीक्ष्णमितिविलासिन्यस्ताः॥ यथा कदाचिन्नलः। नपैरेयेहुं
शक्या अयोध्यां नियपुंपुभिस्थितः॥ तथा सुमित्रो नेः शोभनसुहृद्भिः उपेतः सहितः सन् रममाणा विलसंत्यो रामावि राम
लासिन्यो यत्र। ईदृग्विधं यद्गृहं तस्य प्रेक्षणं भरतानां संगीतं तेन क्रीडाविशेषेण क्षणं मुहूर्तं आल्हादनं प्रमोदमत्व भूत अनुबभू २५

161/1933

वकइव दशरथइव। यथा दशरथः अयोध्यायां अयोध्यानाम्नां नगर्यां स्थितः तथा सुमित्रया लक्ष्मणमात्रा सहितः सन् र
ममाणा क्रीडां कुर्वाणा या रामभरतौ तनयौ प्रेक्षणेन अवलोकनेन आल्हादमनुभवति। एवममुना प्रकारेण अस्य नलस्य सक
लं यशोवलोकस्य सुखविपर्यस्य तस्य संतानं प्रवाहं अनुभवतो निर्विघ्नमानस्य दिनानि यांति गच्छंति। संतानोस्त्र्युग्मे
त्रयोः संतादेवकक्षे वेत्यनेकार्थः। संततिः प्रवाहः। अथानंतरं कदाचित् अस्मिन् अपि समये इमं राजानं नृपं नलमवलोकयितुमि
वेक्षितुमिव वर्षा अवतरंति स्म। वर्षाः स्वर्गतः स्मीलेन वर्षाणां साक्षात्स्मीलमध्यवासितं। मतश्चोभयत्र श्लेषः किंभूताः व
र्षाः उन्नमंतो वर्षणाय प्रगुणी भवंतो ये पयोधरा मेघास्तेषामंतरे मध्ये पतंती या धरावली जलपातश्रेणी तया वेराजिताः स्त्रि
यः कीदृश्यः उन्नमंतौ यौ पयोधरौ स्तनौ तयोरंतरे मध्ये पतंती क्रीडंती हारावली मुक्तालताश्रेणिः तया विराजिताः। यद्वा उ
न्नमत्पयोधरयोरंतर्मध्ये अपतंतः अतिसंहतोन्नतत्वात्। अप्रविष्टां तो हारा यासां ताः। तथा वलीभिरुदरलेखाभिः विराजि
ताः नतः कर्मधारयः तथा किंभूताः वर्षाः। कमलदलानां कांतमिष्टं नयनमिति वाहनं यासां ताः। वर्षाणां हि अतिवाहेन कमला
नामुल्लासः। पक्षे कमलवत्कांते नेत्रे यासां ताः। पुनः किंभूताः वर्षाः सुरचापवक्रं इंद्रधनुर्मंडलं तदेव वक्रे भ्रुवौ यासां ताः स्त्रीप
क्षे सुरचापवक्रवत् वक्रे कुटिले। भ्रुवौ यासां ताः॥ पुनः किंभूताः विद्युदेव मणिमेखला यासां ता। तथा अलमत्यर्थं। कस्य जल
स्य आरं वेगं धारयंतीति। यद्वा करस्य समूहः कारं तस्य समूहः कारं तस्य राजदेयांशावंदस्य धारिण्यः॥ यद्वा कार इति राजदेयां
शनाम यदनेकार्थः॥ कारोबलौ वधे यत्ने हिमाद्रौ निश्चये यतौ इति वर्षा हि सस्यादुत्पत्तिसाधकत्वात् कारस्यापि साधनं भ
वंति पक्षे स्त्रियः किंभूता विद्योतमानमणिकांचीभूषणधारिण्यः। पुनः किंभूता वर्षाः शिंजनाः गर्जंत्यः॥ तथा मुक्तामानसं प्रति
प्रस्थापिना हंसा यकाभिस्ताः। यद्वा हंसभ्यो मुक्तानि मुक्तहंसानि। हंसरहितानि निर्धातं प्राक्प्रयुज्यते इंदृक् विधानिकानि
कामियाः कृताः। तत्समये हंसानां मानसे गमनात् पक्षे स्त्रियः किंभूताः शिंजाने नादायमाने अमुक्ते बद्धे हंसके चरणाभरणे
यासां ताः पुनः किंभूताः वर्षाः प्रवहति स्मेति। प्रौढं। कर्त्तरिक्तः प्रवाहापन्नं यत्कं जलं तेन रेणुसंचारे रजः प्रसरं हरंत्य। भीक्ष्णमि

चं॰टी॰ नि।प्रौढकरेणुसंचारहारिण्यः॥ पक्षे किंभूताः स्त्रियः प्रौढा प्रगल्भा या करेणुर्हस्तिनी तस्याः संचारवत्गमनवत्संचारेण
२८ गमनेन हारिण्यो मनोज्ञाः शाकपार्थिववत्वात् मध्यपदलोपी समासः तथा कं जलं धरंतीति कंधराः मेघाः कंधारम्याः कंध
राः याः कृता कम्रकंधराः पक्षे स्त्रियः कीदृश्यः कम्रा मनोज्ञा कंधरा ग्रीवा यासां ताः।पुनः किंभूताः वर्षाः तिरस्कृता
आच्छादिता शशांककांतिश्चंद्ररोचिर्याभिस्ता॥तथा कायपानीयायलापाः कलापाः कुटुंबिनीजनगीयमानरास
कामेन रुच्यमुत्ता मेघावलोकना यान्मुखमंडलादेशा यासु ताः पश्चात्कर्मधारयः पक्षे स्त्रियः किंभूताः तिरस्कृतो नि
र्जितः शशांककांतिकलापश्चंद्रकांतिसमूहो येन तत्॥ईदृशं उच्चं उत्कृष्टं उन्नतकपोलं वा मुखमंडलं मुखबिंबं यासां न
ताः किंभूतं राज्ञां॥सकलजगतां समस्तलोकजनैर्गीयमानाः अतिशयेन रागबंधध्वनिनो त्रायमाणा गुणा यस्य स तं
।पुनः किंभूतं अनुपमः अद्भुतो यः कल्पलावण्यराशिः रूपसौंदर्यसमूहलेवराजितस्तं।पुनर्वर्षावर्णनमेवाह॥यत्रेति
यत्र वर्षासु॥आकर्ण्येति॥शार्दूलविक्रीडितवृत्तं॥वसुमती भूः समुच्छ्रितान् उच्चान् शिलिंध्रा भूमिस्फोटा एव ध्वजाः
पताका लानूद ध्वजा धारयामास उल्लसते हर्षेणेव मुदेव अन्योपि यो दृष्टो भवति स समुच्छ्रितान् ध्वजान् धत्ते।किंकृत्वा
जीमूतस्य मेघस्य नूनः ध्वनिः स्तुतो ध्वनिः तं घनगर्जितं आकर्ण्य श्रुत्वाण्यत स्तवने॥किंभूतं घनगर्जितं युवा चासौ
राजा चेति युवराज्यस्तस्य भावो यौवराज्यं स्मरस्य कामस्य यौवराज्ये पटह इव यः सतं।कामस्य तरुणराजत्व पटहोपमं रा
ज्याभिषेकहि पटवादनमुचितं तथा नृत्यत्केकिनां विततकलापकरणप्रवृत्तकलापिनां यत्कुटुंबिकं पुत्रकलत्रादि तस्य
मंडांगभीरां मृदंगक्रियां मृदंगवादनविधिं वधतं दधानं नृत्ये किल मृदंगध्वनिना भाव्यं किंभूता भूः उन्मीलंति विकसंति
यानि नवानि नूतनानि नीलानि हरित्छवीनि कंदलानि वप्रगाः दलानि च पत्राणि नवनीलकंदलदलानि तेषां व्याजे राम
न छलेन रोमांचिता पुलकिता।अपि चेति पुनर्वर्षावर्णनमेवाह॥पूर्णैरिति शार्दूलविक्रीडितं।धाराकदंब द्रुमाः पुष्प २८
मेव पुलकं रोमांचं वहति धारयंति॥उल्लसते तोषेणेव हर्षेणेव अन्योपि हर्षेण पुलकितो भवति॥द्विविधा हि कदंबा।

163/1433

ऐके धूलिकदंबा अपरे धाराकदंबा कर्णपुटायितैः कर्णपुटोपमैः पत्रैः कृत्वा मधकरमृष्टं मंडलेन भस्तले मिलंती
नि विशि भवंति या मेघावली घनपंक्तिस्तस्या गर्जितं स्तनितं शृण्वंत आकर्णयंतः किंभूतैः पर्णैः नवरसप्रभारवि
स्फारितकर्णपुटेन स्युमंडला त्सर्गमंडला न्मिलत्या योषितः शब्दं शृणोत्येवेति च्छायार्थः।किंभूता धाराकदंबद्रुमाः
शास्वायथमाना मिलनः तथा सौरभभरात्सोगंध्यभारान्युर्यात् आंताउपरि पर्यटंत श्वेत अलयश्च त एव पालिध्व
जाः प्रसिद्धचिन्हानि येषां ते यथवं धन इति यौजादिकाठिकल्येन।ग्रथितुं।श्रीलाइति शातडिग्रथमानाः॥यत्कवि
रहस्य।गाथां याथयतिग्रथत्यचिरतं श्लोकांश्च लोको नरान।गद्यं ग्रथयति स्फुटार्थललितं योनाटकं ग्रंथति॥ग्र
थ्नाति श्रुति शास्त्रयोर्विवरणं ग्रंथानने काश्चयः स्वच्छं यस्य मनः स्वभावसरलं नोग्रंथते कुत्रचित्॥असमदात्मने
पदमपि॥तथा च॥वहति जलमियं पिनष्टि गंधानियमियमुद्ग्रथते स्रजो विचित्राः।मुशलमिदमियं च पातकाले
॥मुहुरनुयाति कलेन हुंकृतेन॥अथ क्रमेण यज्जातं तदाह॥नीरमिति॥श्लोकः॥नीरं जलं नीरजं निर्मुक्तं अम्भो
ज विहीनं जातं तथा भुवस्तलं भूतलं निर्गतानि रजांसि यस्मात्तन्नीरजस्कं निःपांशु जातं॥तथा वनं जातिलतापु
ष्पाणां मालतीकुसुमानां यो गंधः सौरभ्यं तेन अंधा आकुला मधुपा अलयो यत्र तत्तथाविधं जातं॥३९॥अपि
च॥भ्रांतेति॥द्रुतविलंबितवृत्तं॥मरुतः पर्वतात् मरुतो वायवो वा वचुः वांति स्म।किंभूता मरुतः धुताः कंपिताः ये कदंबास्त
रुविशेषाः तेषां यत्कदंबकं समूहः तस्मान्निपतति पतन्निः सरनू योनवः परागः पौष्यं रजस्तस्य परः प्रकृष्टयश्च आगमः
संगमस्तेन मंथरा मंदाः भारोद्वहने हि मंदगतिरेव स्यात् एतावता वायूनां सौरभ्यं मांद्यं चोक्तं पुनः किंभूताः हृताउढाः
तुषाराणां शीकराणां तुषाः कणा यैस्ते तथाविधः एतावता शैत्यं अस्त्येवि।तथा रतौ सुरते रागो भिलाषो येषां ते रतिरा
गिणः तेषां प्रियतमा अतिदयिताः तज्जन्यश्रमापनेतृत्वात्।रतिः स्मरस्त्रियां रागे रते इत्यनेकार्थः॥मरुत
इति पंचम्यां तसिद्धु मरुः पर्वतदेशयोरित्यनेकार्थः॥ततश्च ततोनंतरं एवंविधे जीमूतसमये मेघवर्षणकाले जाते

घं०टी०
२७

सतिकदाचित। कस्मिंश्चिनुअनंभसि पानीयवर्षणरहितदिवसेमृगयानं आखेटककाननंपालयतिरक्षतीति
मृगयावनपालकः प्रविश्यराजसभांतर्गत्वाराजानंनलंविज्ञापयामासविज्ञप्तवान्॥ किंभूतेजीमूतसमयेतिर
स्कृता आछादितास्तरणिविंबरविकांतयो येनसतस्मिन्।तथाविगलंत्यः श्रवणंत्योवारिविप्रुषोंभकणाय
स्मिन्सतथातस्मिन्॥ तथाशांतानिरक्ता चातकानांतृत्तृषायस्मिन्सतस्मिन्।तथानिर्वाणानि शांतानिवारण
नांहस्तीनांवपुंषितनवोयस्मिन्सतस्मिन्करिणांतादेवदेहदाहनिवृत्तेः॥ तथामानिन्यामानवत्यायोमानग्र
हः प्रियानभिमुखप्रवृत्तिः सएवग्रंथिस्तंमुष्णातिहरतीति मानिनीमानग्रहग्रंथिमुट्तस्मिन् वर्षासमयेहि
मानिन्योमानंपरित्यज्यप्रियानुकूला भवंतीति प्रियापराधसूचिका चेष्टा मानइत्यानंदलहरीवृत्तौ।तथाशो
षणंशुट्किप्।जनितानवासकानांतरुभेदानांशुटशोषणंयेनसः तस्मिन्तथाविधवानांमृतभर्तृकाणाबधूना
स्त्रीणांविट्टिः।अहितोविधववभूविट्टिः।तस्मिन्।तदानींतासांप्रियविरहेणदुःखोत्पत्तेः।तथार्वाइप्रापिताभ
इकाणांभकानांहदहर्षोयेनसतस्मिन् क्विप्प्रत्ययस्यांतः॥ तथामुद्रितआवृतश्चंद्रमायेनसतस्मिन्।तथा
निद्राणानिनष्टानिपंकजानियत्रईदृग्विधानिसरांसियस्मिन्तथातस्मिन्।तदानींकमलानांअनुत्पत्तेः।
तथास्वाधीनाः स्ववंशाः प्रियाः स्त्रियोयेषांदृग्विधाः।प्रेयांसोभर्त्तारोयस्मिन्सतस्मिन्।तदानीविर
हवत्कामहिसष्णुभिः प्रियैःस्वप्रियाः वशंनीयंत इत्यर्थः।यद्वास्वाधानप्रियाणांसन्निहितनायिकाणांप्रे
यानिष्टोयः सः तस्मिन्।तथाप्रोषितानिमानसंप्रतिगतानिकलहंसपक्षिणोयत्रसतस्मिन्।तदानींपानीय
कालुष्यात्॥तथानष्टगतंनक्षत्रमंडलस्योडुवृंदस्यमहस्तेजोयस्मिन्।तथामेचकीतंकृष्णीकृतंनभोयेनत
स्मिन् तदानींमेघानांकाष्ण्यात्॥तथानिष्पतंति सरीसृपर्नीलरुविशेषाणांरजः परागोयस्मिसतस्मिन्।त
दानींहितपुष्यंतीति।तथास्फुटंतिविकसंतियानिकुटजानि।कुटजपुष्पाणितेषांयोरजः पुंजः परागराजिस्तेन

राम २७

165/1933

पिंजरितापिंगलीकृता अष्टदिग्भागेषुभाश्छविर्यस्मिन्ससतस्मिन् तथाभासुरंदीप्यमानंयत्सुरचापंचक्रभि
द्धनुर्मंडलंतत्बिभर्त्तीति।भासुरचापचक्रभृत्।तस्मिन्।तदानीमेवतस्योत्पत्तेः॥ तथामयूराणांहर्षंकरोतीतिमयूरमद
त।तस्मिन्।मदोरतस्यहंकार।मेघहर्षभदान्वयोरित्यनेकार्थः॥तथामहिषाणांशोषंहरतीति महिषशोषहृत्।तस्मि
न् तथाविस्तराः पानीयप्रचुराः सरितोनद्योयत्रतस्मिन्तथाशाद्वलानीलाहरिततृणानियत्रसतस्मिन्।तथावि
द्योतमाना जलप्राचुर्याद्भासमानाः विद्युतोयत्रसतस्मिन्॥तथावहतवान्मदः शनैर्मेघकरोजलदवर्षणानुकूलो
मरुद्वायुयत्रसतथा।तस्मिन्।मेघान्तिभयप्रकृतिसचूरित्वान्मुमागमः॥तथाहृष्यंत्यः प्रमोदंप्राप्नुवत्यः कर्षक
णांरूपीवलानांयोषितः स्त्रियोयत्रसः तस्मिनतथापुष्पंत्याविकसंत्योयाः केतक्यस्तासांगंधपानेनसौरभ्यग्रहणे
नमत्ताहृष्टामधुकरालयोयत्रसतस्मिन्॥तथाप्रोद्भूताः रुजाताः भूरुहस्तरवोयत्रसतस्मिन्।तथाद्दरिद्राणाम
किंचिनानांनिद्रायैःद्रुह्यतीतिदरिद्रनिद्राध्रुद् तस्मिंतदानींतेषांदारिद्योपहतत्वेनाच्छादितगृहत्वाभावाकुतःश
यनमिति।तथासगर्वाद्दसाः गोदुहोगोपालायत्रसतस्मिन्।तथाकदंबककलंबान् कदंबगुच्छान्।आलंबंते आश्र
यतइतिकदंबस्तबालंबिनः। ईदृग्विधामधुलिहोमधुपायत्रसतस्मिन्।तथामुदितोहृष्टोयोमदनः कामस्तस्य
अट्टहासइव।चरत्।अट्टहस्मायमानोयोघननादोमेघध्वनिस्तंमुंचतीति।मुदितमदनाट्टहासायमानघनना
दमुक्तस्मिन्।तदानीकामस्याधिक्यात्।असौमेघोनगर्जति।मन्येमदनएवहसतोऽट्टहासंविधत्तइतिभावः।
तथापच्यमानानिपच्यंते परिपाकंगच्छंतियानिजंबूफलानितैः श्यामलितामेचकितावनांतराणांमध्यभागानां
ककुकांतिर्यस्मिन्सतस्मिन्जानांकृष्णत्वात्।तथारचिताकृतापांथसार्थस्यपथिकसमूहस्यशुक्शोकोयेनसतस्मि
न्प्रियाविरहितत्वात्।तथाश्रूयमाणाः आकर्ण्यमानामदनहर्षेणमधुरामृष्टामयूरवाचःतस्मिन्।तथाकोशातभ
क्याः पाटलिकायाःकाष्ठलानिकोशातक्यः विनिद्राविहसितायाः कोशातक्यास्ताभिः शालयतेशोभतेवश्यमितिविनि

च० र०
२८

इन्काशातकीजालीतस्मिन॥ ल्वेत्रेऽः कस्त्राघ। हरीतक्यादिभ्यश्चेति फलप्रत्ययस्य लुप॥ तथायूथिकानांमागधीनां
जालंमन्दरेविद्यतेयस्मिन्सयूथिकाजालीतस्मिन॥ अतऽनिरनौ॥ तथानवमालिकानां सतलालतानांमालापंक्तिः
विद्यतेयस्मिनसनवमालिकामालीतस्मिन। व्रीह्यादित्वादिनिः। तथाकंदलानिप्ररोहान्भजनीति कंदलाभा
क्तस्मिन। कडंगदनाम्नानयाः। मदिकंदिकुंडेत्यादिनाकंदेरलः तदानीं कंदलोत्पत्तेः॥ तथापच्यमानमिक्रमं
कर्मरियक। तथाभिक्षाक्षणे भिक्षावसरेभिक्षार्थंक्षपिताः इतस्ततः प्रेरिताः परिव्राजोयेनसतस्मिन् तदानींहि
तेषांभिक्षादुर्लभावर्षाधिक्यात्क्षणप्रेरणेचौरादिकः॥ तथाभ्रांतानिरक्ता सारंगाणांहरिणानांरुरूणांगोयस्मि
न्तस्मिन तदानीमवतेषांतृषानिवृत्तेः तथानीडानांकुलायानांनिर्माणेनिष्पादनेआकुलाविहस्ताबलिभुजःका
कायत्रसतस्मिन॥ तथासांद्राः घनायेइंद्रगोपाः क्षुद्रारक्तजंतवः तान्युनक्तितैःसहिताभवतियः ससांद्रेंद्र
गोपयुक्तस्मिन। तथाश्वानक्षरत्नमालानांसंबंधियद्धाराग्रहंजलयंत्रगृहंतेनसदृक्तस्मिन। तमालानांधा
रागृहस्यकुल्याभत्वाज्जलक्षरणाच्चसाम्यंजीमूतसमयस्य॥ तथाध्यामायमानाः ध्यामीभवंत्योदशादिशःसंस्त्याः
दिशाहशीयत्रसतस्मिन। तथादिवापिदिनेपिश्रूयमाणाआकर्ण्यमानारजनीशंकयाआकुलाव्यग्रायेचक्रवा
काश्चक्रवाक्यश्चपुमांस्त्रियेत्येकशेषचक्रनामकारथांगास्तेषांयच्चकवंदंतस्य कुटीविरहशब्दोत्रसतस्मिन। तदानींमे
घावृतत्वेन दिनेपितेषांरात्रिभ्रांतिरुत्पन्ना अतएवविरहितापरस्परमाक्रंदयंतइतिभावः॥ क्रोशानंकुरुविंवतः॥
तथाअकल्यनांरथानांसंचरणंसंचारंरुणद्धीतिनिरुद्धसंचाररुत्। तस्मिन भुवःपंकिलत्वात तदानींमनसांगतरसंभ
वः॥ तथापल्लविताः संजातकिसलयावीरुधोयत्रसतस्मिन। पल्लवितइतितारकादित्वातइतच। तथाविश्रांतानिव
नागयन्नशीलाजिह्वबोयेक्ष्मापालाराजानस्तेषांयुतसंयामोयत्रसतस्मिन तथाक्षीणानष्टउक्ष्णांबलीवर्दानांस्
द्भुमुक्षायत्रसतस्मिन। तथाक्षीरसमुद्रेक्षीराब्धौनिद्राणः शयितोबाणबाहुच्छित्विष्णुर्यस्मिनसतस्मिन तथा

राम
२९

167/1933

सिंधूनांनदीनांरोधांसितटानिभिनत्ति विदारयतीतिसिंधुरोधोभित् तस्मिन्तदानींपयःपूरेणतटभेदसंपद्यते।
तथास्वदहनंवनवह्निंनुदतिप्रेरयतीतिदवदहननुत तस्मिन। तदानींवर्षाणाम्नशांते॥ तथाविरहिणांमनांसिनुदति
पीडयतीति विरहिमनस्तुत तस्मिन। तथाजनितानन्दनानांमुत्हर्षोयेनसतस्मिन तथातापिछानांतमालतरूणांछायो
शोभांअनुछिनत्ति अनुकरोतीति तापिछछायानुच्छिदतस्मिन तमालानांछायाकिलकृष्णाभवतितथा जलदसमय
स्यापीति॥ तथाच्छन्नात्तृणादिभिराच्छादिता याकुटीतस्यामध्येबध्यमानाः संयम्यमानावाजिनोअश्वायत्रसतस्मिन
तथाविकसितानिविहसितानियानिबकुलवनानिकेसरकाननानितैःविराजितेशोभतेवश्यमितिविकसितबकुलवनविरा
जीतनस्मिन तदानीमवतेषांविकसनात। तथासमीरहलेवसीमंतिताद्धाभाक्तेग्रामसीमानोग्राममर्यादेयत्रसतस्मिन तदा
नींकर्षकः सीरेणग्रामसीमाक्रीयतेऽयमस्माकमियंभवतामिति॥ सीमंतइतिकेशविन्यासेअन्यत्रसीमांतोग्रामइतिका
तंत्रचंद्रिकायां। सीमन्तकरोतिसीमंतइतिमत्करोतीतिणचततःकर्मणिनिष्ठा। यद्यपिसीमंतशब्दोहलफालबद्धेषु अंत
रामार्गउच्यते तथाप्यत्रोपचारिकोवसेयः॥ तथाविज्ञयमानः प्रकर्षेणवर्त्तमानोमनोजन्माकामोयत्रसतथातस्मिन।
तथाजगतविश्वंजीवयतीतिवर्त्तयति जगज्जीवीतस्मिन। तदानींसस्योत्पत्तेः॥ अथविज्ञप्तिमाह॥ देवेति॥ हेदेवनृपदे
वक्तनृपतौतायेदस्फुरस्त्वनेकार्थः॥ किंस्यादिति॥ आईलविक्रीडितवृत्तं॥ ईदृग्विधः कोलसूकरःकुतोपिकस्माच्चिद्
नादागत आयातः किंभूतः दंष्ट्रायुग्मेनकरालंउग्रंकालं कृष्णंवदनंमुखंयस्यसः मुकुगल्करणेन हृमवतनीत्यादिनो
णादिकआलप्रत्ययः। किंकुर्वनइतिभ्रांतिसंदेहंजनयनउत्पादयन। इतीतिकिंदीर्घयोरायोरायतयोःस्फटिकयोर्द्वंद्वं
दधतबिभ्रत्किमितिवितर्केअंजनपर्वतःस्यात॥ तद्वपुषःकृष्णत्वात् अंजनगिरिसाम्यंदंष्ट्रयोःश्वेतत्वात्स्फटिकयु
ग्मोपमानं॥ उत अथवाकिंश्लिष्यद्बलगद्धकाद्वयंयस्यसईदृग्विधः अंभोभिर्मेदुरःपीवरोम्नतोयोमेघः। अंभोमेदुरमेघः
सएववर्त्ततिबलाकाद्वयान्वितः सजलोजलदइति॥ भ्रांतिरूपसंधतइत्यर्थः। तुरथवार्थः। अथवाकरेणशुंड्याशून्यः किं

चं० र०
२९

कुंजरोल्लीवर्त्तते॥हस्तिनो दंष्ट्राद्वय मस्येवातस्तं दंष्ट्रोपमानकस्यनानक्षता अंजनमेघयोश्च शूकरदंष्ट्रोप
मानस्यभक्त्वा असत्वाप्रसरिकस्यनाकूतमि॥कोलस्यमेघकुंजरयोरुपमानंदंष्ट्रयोर्बकादयकरिदंतयोरु
पमानं अत्रयुग्मपदं द्वंद्वंशब्दं कश्चित्पठति।तदयुक्तं।स्फटिकयोर्द्वंद्वमित्यत्रकथितस्यद्वंद्वपदस्यपुनःप्रयोगेपु
नरुक्ततास्यात्।तेनदंष्ट्रायुग्ममितिपाठःश्रेयस॥४१॥मतश्चतानंतरं।असौकिंकिंकुरुतेतदाह॥भिदन्निति।शा
र्दूलविक्रीडितंवृत्तं॥क्रोडःसूकरःक्रीडतिरमते॥किंकुर्वन्भुवःपृथिव्याःकंदाश्चस्फुरणाःकंदारूणिवकंदविशे
षाः।कंदलानिप्ररोहाःतानविभ्रतीति।कंदकसेरुकंदलभृतस्तान्स्निग्धप्रदेशान्सजलभूभागान्भिंदन्दंष्ट्रा
भ्यांविदारयन्।यथा अंजनशैलशृंगे अंजनगिरिशिखरैःसदृशाःसमानाः अंजनशैलशृंगसादृश्यस्तान्उच्चत्वे
ननीलत्वेन चततमदक्षान्फुल्लुलतानांविकसतविरुद्धांमंड्यान् आश्रयविशेषान्भजन्आमर्दयन्।तथाच
पुनर्मदंशानेभयाभावात्मंदरस्यमेरोःयालीलाविलासःतयाअब्धिमदृशंलीलासरःक्रीडासरस्सामश्नन्वि
लोडयन्तथामेरुणाक्षीराब्धिर्मथितस्तभायंउच्चत्वात्मेरुतुलनांप्राप्य भवल्लीला सरोब्धिसदृक् मथ्नन्वर्त्त
तइतिभावः॥एतादृशीभिर्विविधचेष्टाभिर्भवक्रीडावनेरक्षकान्गोप्तॄन्भाययन्निवभयमुत्पादयन्निवभाव
यन्नित्यत्रभयोत्पत्तौपूर्वोक्तभेदनादिक्रियाणांकरणत्।आध्याहार्यायद्वाघंटालालान्यायेनपूर्वार्थसंबद्धायामंद
रलीलायाःकरणतायोज्या।नचकोलस्यभयहेतुत्वंअतोबिभेतेर्हेतुभयेइत्यात्वंआत्मनेपदंचनभवति।मुंडोजाय
ते इत्यादिवत्॥४२॥राजातुलद्वराहगमनमाकर्ण्यश्रुत्वा चिंतितवान्विचारितवान्॥किंचिंतितवानित्याह ॥अ
घार्च्छोरिति॥शार्दूलविक्रीडितंसंप्रत्यधुनातृणैर्हारीभिःछन्नाआच्छादितास्तेवनांताःवनानिसेव्याःआश्रयणी राम
याः अत्रअंतःशब्दःस्वरूपार्थःयदनेकार्थः।अंतःस्वरूपनिकटप्रांतेनिश्चयनाशयोरितिकिंभूतैस्तृणैःअच्छ २९
छःएकार्थौद्विरुक्तःशब्दस्तस्यातिशयत्वंद्योतयतीतिवचनात्।अतिशयेनविमलैःरजोनवगुंडितैरित्यर्थः॥

अतएवशुकानांयःपिच्छगुच्छपक्षकदंबकं॥तद्वद्धरितैर्नीलैःएकस्यतत्त्विषस्यनीलत्वंतथाविधंनप्रतिभासतेतेनस
पिच्छगुच्छेत्युक्तं॥दार्थान्यत्राद्वेवर्त्तमानेपिथदस्योपादानंमदनुप्रासरसिकत्वेनेति॥यद्वाशुकपिच्छानिकीरपत्राणि
गुच्छास्तबकाःतद्वद्धरितानितैः॥गुच्छागुच्छहारकलापयोरित्यनेकार्थः॥किंभूतावनांताःउत्तांडवैःउत्कृष्टंतांडवंनृत्य
विशेषोयेषांतैस्तैर्नृत्यंकुर्वाणैःसांद्राणिबहुलानियानिचंद्रकिकुलानिमयूरकुटुंबकानितैर्मंडिताःभूषिताः॥येषु
वनांतेषुविनिद्राणिविकसितानिकेतकानिकेतकीपुष्पाणियेषुदृशानियानिवनानितेषांस्कंधपृष्ठेलग्नंतःपरिवर्त्त
मानावातावायवःशनैर्मंदंयथातिवहंतिएतेनवायोःसौगंध्यमाद्योक्तिःवाताः॥किंकुर्वंतःपल्वपयःअस्त्वांतसरःपानीयं
मनाकईषत्कल्लोलयंतःतरंगयंतः।शनैःशनैःवानात्ययसांतरंगीकरणंअनेनतस्यशैत्यादिःकिंभूतंक्षीरवद्दुग्धपांडु
उज्वलं।कृतकृतिष्कचिन्वंतिवचनात्सुप्प्रत्ययस्यनलुप्॥४३॥एतेषुवनांतरेषुचसंप्रतिप्रार्थिनःसूकरामाद्यंतिम
दोन्मत्ताभवंति।ततस्माद्धेतोःविहर्त्तुंवनांतरेषुक्रीडितुंयुज्यतेघटतेयुज्जिचसमाधौदैवादिकः॥अइतिअवधारयन्म
श्चवीक्ष्यस्व। नखंडिताः स्फोटिताः प्रवालाः पल्लवाः यत्र तत इदृशं बालमालवनं नवीनशालतरुकाननं वर्त्तते किमिव गूर्जरग
णां गुर्जरदेशोद्भवानां नराणां कुर्वमिव स्मश्रु इव किंभूतं तत्र अखंडिता क्षुरादिना अछिन्नाः अतएव प्ररूढाः बालाः केशा य
थात थाविधं भवति हेदेव इतश्च अनेकविधैः नानाप्रकारैः वकुलैः संकुलं व्याप्तं कूपकूलं वीक्ष्यते। किंमिव भवतां वैरिणां नगरमि

चं०टी० वकिंभूतंतनत्र अनेकविधवामतभर्तकायपुकुलपुंतेः कुलैः पात्रैः संकुलं। तद्भूतृणां त्वयाहतत्वात्। हेनृपइत्तश्चपुनागैस्तरु
४४ विशाषः वेष्टितः परिक्लिम्नावापीसरोवाध्यते। कुरवधूर्जटीजटाजटइवईश्वरकपर्दइवसचकीदृशः पुमानूनागावासकिः
तेनवेष्टितइद्ग्रथितः॥ हेदेवइतश्चप्रदेशाकृताउत्पादिता अश्वत्थाः पिप्पलायस्यांसातथामहिताचचार्वीक्रीडासरि
तः कूलिनद्याः पुलिनपालिस्तटप्रांतोवर्तते। अत्रपालिशब्दः प्रांतार्थः तथाचानेकार्थः पालिस्त्र्यंकाश्रिपंक्तिषुजा
तश्मश्रुस्त्रियांप्रांतेसंताकल्पितभाजने। प्रशंसाकर्णलतयोरुत्संगप्ररूढचिन्हयारिति॥ केवकुरुसेनेव। कुरुक्षत्रियच
मूरिवशांकिंभूतान्नूतंअश्वत्थाम्निद्रोणसुतायहितंयथामा॥ ईदृशेनवनमार्गेणत्वलोकक्रियदप्यंतरंअवकाशंव्यवधानं
अतिक्रांतउल्लंघितवानेषनत्वस्तयावनपालिकयापुनर्बभाषे॥ कीदृशेनवनमार्गेणचलंतीयेचकोराचलवंचनस्तेषां
याश्वंचवस्याटवः ताभिस्तथाचंपलाः चंचलायचंचरीकाअलयस्तेषांचरणैः चाघ्रिभिश्चूर्णिताः खंडितायेचंपकाकु
राः हेमपुष्पकप्ररोहास्तथामरिचानांमंजर्योदलानिचपत्राणितैर्दंतुरः संचारयोग्यस्तेन॥ हेदेवपुरंदरं त्राक्रमानंदय
तीतिपुरंदरानंदि यन्नंदनाद्यानं नंदनवनंतत्रस्पर्द्धतेसंहृष्यंति तदनुकारंभजंतीत्येवंशीलं यत्तत्पुरंदरानंदिनंदनाद्या
नस्पर्द्धितथाविधस्य अस्यवनस्यकिंवर्ण्यते। किंश्लाघ्यते। सर्वस्याप्यस्यवर्णनीयस्वरूपत्वात्॥ तदेवाहयत्रेतियत्र
वनेतरवोवृक्षाः लंकेश्वरंरावणंसमुपहसंतितिरस्कुर्वंतिकथं। किंभूतंरावणंत्रिजटाराक्षस्याः आश्रयआ
धारोयस्य। धारणत्वात्। मतं। किंभूतास्तरवः अनेकाः जटामूलानियेषांतेतथाविधाः पुनः। किंभूतंरावणंस्फुरद्दी
प्यमानमेकं उत्कृष्टं पुष्पकं विमानंयस्यसतं। किंभूतास्तरवः अनेकानिबहूनिपुष्पाणियेषुतेतथाविधाः॥ तथाकिं
भूतंरावणंसमुद्रजितः सीतापहरणात् उद्वेगंप्रापितारामोदाशरथिर्येनसतं किंभूतास्तरवः अनंदिताः प्रमोदिताः रामाः
स्त्रियोयेस्तेतथाभूताः। हासमस्तुतुल्यार्थमथित्यकसंचवंसतिरूपणांजटामाश्रयः अमीअनेकजटाः सस्फुरदेकपुष्पकः राम
स्फुरदेककुसुमः अमीअनेकपुष्पकाः ससमुद्रजितरामः पीडितवनितः अमीआनंदितरामाइतिसमाधिपक्षस्तूक्तएव॥ ४४

197/1933

अनेकजटाइतिएकशब्देन संख्याउपलक्ष्यते। ततो अनेकशाखो असंख्यातवचनः॥ तथायस्मिंश्चवनेवस्फुटद्वयंतालीतालद्रुमः
द्वयं। चविविधा अनेकप्रकाराजातिमालतीदृश्यतेहअपिविशेषयति। कीदृशीमालापंक्तिः स्रगवाअस्याः अस्तांमालिनीतथाशि
खरिणीशीरवस्युक्ता तथापुष्पितंअग्रंशिखरंयस्यासाकुसुमिताग्रभागा। किंभूतेवनेमत्तस्ताःवनावलाकनान्मयूरा(?)
श्चयेमयूराम्तः हारिरम्यंतस्मिन्तथाभद्रंमनोज्ञंभुजंगानामर्दनोविटानांचप्रयातंगमनंयत्रतत्तथाविधेतथाविचित्राविवि
धायेक्रौंचाः पक्षिविशेषाः तेषांपदंस्थानंतस्मिन्तत्रक्रौंचानांबाहुल्यात्। कस्मिन्निवछंदः शास्त्रइव। यथाछंदः शास्त्रइव
यथाछंदः शास्त्रेवनालियंमालिणीशिखरिणीपुष्पिताग्राचेतिछंदोनामानिदृश्यंते। विविधाः अनेकधाः जातिश्चउक्ताद्ि
रूत्त्यंनादृश्यंते॥ किंभूतेछंदः शास्त्रेमत्तमयूरमत्येनछंदसाहारिणिमनोहरे। तथाभद्रभुजंगप्रयातंयत्र। तथाविचित्रा
क्रौंचपदायत्रतस्मिन् हेदेवयस्मिंश्चवनेवीरुद्लताः कुरुवीरान्कुरुक्षत्रियभूरान्बहुमन्यंतेनगौरवयंति अस्माकंपुरस्त
त्कुउत्येवंलाघवयंतीत्यर्थः। अथलाघवप्रकारमेवाह। किंभूतान्कुरुवीरान् एकेनमुख्येनभीमेन अर्जुनेनपार्थेननिर्जितास्ता
न् किंभूताः वीरुधः आक्रांता अधउपरिच आलीढा अनेकवदेवाभीम। अम्लवेतसा अर्जुनाश्चवृकुभायकाभिस्ताभिः
यद्विश्वः भीमोऽम्लवेतसेद्रांभोघोरेचापिवृकोदरे॥ अर्जुनः पार्थेहैहयेककुभिद्रुमे। मातुरेकसुतेचेत्यनेकार्थः। द्रुमः ककु
भास्यः॥ पुनः किंभूतान्कुरुवीरान्कोपितः कुपाउतएकानकुलःपांडवोयैस्तेकोपितैकनकुलास्तान्किंभूताश्रीरुद्धः आल्हा
दिता आनंदिता अनेकेनकुलाजीवविशेषाः याभिस्ताः तथाविधाः पुनस्तान्कीदृशान् एकेनसहदेवेनपांडवेनसहस्पर्द्ध
मानान्स्पर्द्धांकुर्वाणान्। किंभूतास्ताः अनेकैः सहदेवैरोषधीविशेषैः संगताः अन्विताः लाघवपक्षस्तु तुल्यार्थएवव्याख्येयः ते
एकेनभीमेनअर्जुनेनचजिताः अभिस्तु अनेकभीमार्जुनाआक्रांताः पराभूताः। तैर्यएकोनकुलःसोपिकोपितः आभि
स्तुअनेकनकुलाआल्हादिताः तैर्येकेनापिसहदेवेनसहस्पर्द्धते॥ संहृष्यंतिकलहयंतेएताश्चअनेकैः सहदेवैः सहसंग
तामीलिताः तिष्ठंति। किंपुनः अन्यद्रमणीयंदेवान्नृपावलोकयअनुवीक्षतां॥ पटलमिति॥ मालिनीवृत्तं॥ मयूरः केकीपुष्पिता

चं० वृ०
४५

नांकुसुमितानांतरूणामुपरि उन्नमनवर्षार्थंकृतप्रयत्नोयोमेमघस्तह।नीलंकृष्णवर्णंभ्रमतकुसुमेमधुपानायपर्यटत्।
अलिकुलानांपटलंवृंदंविलोक्यमंदंमंदंशनैर्नृत्यमकस्मात्कस्मात्रनःसनकलापंपिच्छवलयतिकंपयतितांडवायस॥
ज्जीकुरुतइत्यर्थः।किंभूतामयूरःमृद्गीश्राचसकस्वामहदामदनकलारम्यायाकेकामयूरध्वनिःतयानिर्भरोभृतस्तांकुर्वन्नि
त्यर्थः॥तस्मिन्उद्यानेपुभ्रमदलिकुलंदृष्ट्वामयूरस्यमेघभ्रांतिरभवद्यदयंमेघइतिततःकेकायतन्नृत्यतिवेतिभावः।मयू
रइतिजात्येकवचनं।कालविरुद्धनृत्यंतुमधुपटलंघनभ्रांतिरेवनिबंधनंअपिच।पुनःहेदेव।भ्राम्यतिउपजातिरवृत्तं
॥इहवनस्थितःमनपुष्पशरःकामःसर्वजगज्जयायत्रिलोकीविजयायधनुश्रमंकरोतिसाप्यकांतवनादीकरोति॥त
थायमपिकिंकृत्वापुष्पाणिशिलीमुखपुंखेषुसंयोज्यमीलयित्वापुष्पाणिबाणस्थानीयानिविधायेत्यर्थः॥किंभूतानिपुष्पा
णिभ्राम्यंतोमधुलिलिक्षयापर्यंटतोद्विरेफाःयेषुतानितथाविकासप्रफुल्लतांभजंतियानितानिविकासभांजिविकस्वराणि
उहत्कघ्राणस्याहीपनविभावातिशयात्कामस्यरिक्तिनिरूप्यतेएतावतासुरभिकुसुमसंपदुक्ता।।वनपालिकापुनर्वि
नोदस्थानंदर्शयतिइतश्चेति।हेदेवइतश्चअस्मिन्प्रदेशे॥हरतीतिमालिनीवृत्तं।हरिणयूथमृगवृंदंवहरतिशाशाद्वल
यूथिकाजालस्यमाग्धीलता समूहस्यमध्ये अधःप्रदेशेमधुकरश्रोत्रसुखकारियन्मधुकराल्यामधुपपंक्तेगीतंझंकाररव
स्तम्भिवदत्तं।अवधानंचित्तैकाग्र्यंयेनतच्छ्रंसत॥दूर्वापल्लवान्दूर्वाकिसलयानि।नउल्लनातिनखादति।उत्प्रेक्ष्यतेहरिणयू
थंकिमिव।लिखितमिवयथाचित्रितंहरिणयूथंपल्लवान्।नखादति।तथेदमपिकिंभूतेयूथिकाजाले।कुसुमजायेमधुबिं
दवोमधुबिंदवोमकरंदस्पृशतास्तेषांयस्पंदःक्षरणंतस्यसंदोहसमूहंभजति॥यत्तत्तथाविधंमधुबिंदुसंदोहःसंबंधातस्पृ
हणीयेपिगीतरसिकृतयामृगाणांदूर्वांकुराग्रहणमुक्तं॥५८॥इतोपीति॥हेदेव।अस्मिन्नपिप्रदेशे॥सोयमपि॥अनुष्टुपवृत्तं।
हेभव्यदेवलोभवत्समनंबंछितसोयंक्रीडाचलःक्रीडागिरिर्वर्त्तते।यस्मिन्नृक्रीडाचलेकिन्नरीसारमुत्कृष्टंगायतिकिंभूताकिन्न राम
रीआसन्नाःनिकटवर्त्तिनःसारंगाःमृगाःयस्यासागीतप्रवृत्तोत्कृष्टत्वान्सारंगाणामासंनता॥राजा॥तदिति॥अनुष्टुप्॥वृत्तं॥ ४५

199/1933

अयंसानुनाशिखरेणक्रीडागिरिःराजतेनरजतनिर्मितेनसानुनातटेनराजते।यस्मिन्गिरौगायंतंकिंनरंनिशम्यश्रुत्वाकिंनरंस्यते।न
यानक्रीडिष्यते।अपितुरंस्यतएव॥६॥इतश्चेहेदेवजनयतीतिमालिनीवृत्तं॥इहक्रीडापर्वतेअयंप्रत्यक्षेणवीक्ष्यमाणः
स्फाटिकस्फटिकमणिनिर्मितोभित्तिभागकुड्यप्रदेशःबालाअर्भकायेलीलामृगाःकेलिहरिणास्तेषांजलबुद्धिंपानी
यमतिंजनयतिकरोतिकिंभूतोभित्तिभागःएहीमलाभावादुज्ज्वलाकांतिच्छविर्यस्यसतथाविधश्चेतांस्फटिकच्छविंवीक्ष्य
बालमृगाःपानीयमितिमत्वापातुंप्रवर्त्तंतइत्यर्थः॥हेदेवइहपर्वतेकदेशहरितमणीनां।उल्लसंतःवर्द्धमानाःमयूखाःकिरणाःबा
लकेलीमृगाणांमरमास्वादवतीनवासाद्रांयानृणालीतस्यालोभंगाढंअभिलाषंउत्पादयति॥तन्मणीनांनीलानश्रूनूवी
क्ष्यतेषांतिविर्नर्कयति।यदमीतृणांकुराइतिततःतद्भक्षणायप्रवर्त्ततइत्यर्थः॥इयंचेति॥गौरेति॥हेदेवइयंचभ्रमरीअकूलत
नेअकुलितमव्यक्तेनशब्देनइदंआस्यतनवगौरस्यआगतस्यप्रतिपत्तिविशेषंकुरुतेअन्योपिधन्यःकश्चित्कुतश्चित्कुतश्चिद्यदागच्छत्
तदातस्यस्वागतमित्यादिमधुरस्वरेणवाचिकप्रतिपत्तिःक्रियते।तथाभ्रंग्यपिविधत्तइत्यर्थः॥किंभूतस्यतेगौरोतिविशुद्धवं
शोन्वयोयस्यसतस्यगौरःश्वेतारुणपीतविशुद्धवंशमस्यपीत्यनेकार्थः॥पुनःकिंभूतस्यतपर्वतस्थलेपर्वतागच्छतः।अतएव
भ्रमेणदहेवक्लांतेनभ्रमीसंजातेनश्रमेणस्यखिन्नस्य॥अपिचपुनः॥इहेतिमालिनीवृत्तं॥इहपार्वतीयकंदरेदर्याक्रोडयूथंवराह
वृंद।क्रीडतिस्खलतिकिंभूतंदलिताःग्रस्ताःकंदाःमरणाःयेनतत्॥तथाकंदलिन्यांप्ररोहबहलायांभुविविरचिताकृताके
लिःक्रीडायेनतत॥तथाविधंहेदेव।इहसरसिकासारंकुरंगाःकंधरांग्रीवांसरलयंतःऋजूकुर्वंतःसंतःकंपनीयंधयंतिपिबं
तिधयुपानेकिंभूतंसरसिसरसिजानांगंधेनसौरभ्येणभ्रांताःइतस्ततःपर्यटिताभृंगायत्रतत्तथाविधंतस्मिन्॥१०॥इहेतिहेदेव
इहक्रीडागिरौपुनर्भूयःअनित्रांनिरंतरंरणंतिझंकुर्वंतिषट्पदानांकुलानिसमूहानिनिशम्य।श्रुत्वाकिन्नरेंद्राःतदनुगुणांभृं
गरणितस्यानुगामिनींवीणांक्वणयंतीतिवादयंति॥किंभूतानिषट्पदानांकुलानिभिन्नानिमुखचरणैःश्लिष्टानि॥द्रुमाणां
मुकुलानिकुड्मलानियत्ततानि॥किंभूताःवीणाःश्रुत्योःकर्णयोःसुखकरणआल्हादकारिणींकारणमत्रआविष्टलिंगःक्रियावि

नं०२०
४९.

शपणं वारणंनीतिरणत्रादेन न्यस्यंयरूसंपुष्पिताग्रा ॥ ७ इत श्चेति। देवदत्तश्च अस्मिनप्रदेशे क्रीडावलरूढो। याः कमलदी
र्घिकाः सरोजवाप्यस्तासांतीरेतटेयनरवस्तेषांतलमधोभागं अनुसरतु आश्रयतु। बहुखेल्या श्रांतत्वात्। तरुछायायामुपविशति
त्यर्थः॥ यश्चवति। तरुतलं वरमीतिवत्तं॥ हृदवचनकारिणावनहस्तिनामदगंधंस्पर्द्धते। मंत्रुष्यंति यामावनकरिमदगंध
स्पर्द्धिनी यामतरुदालीसमरुदव्रक्ष्यपतिस्तस्यायकुसुमजकणामकरंदलवास्ते ःआरः आवलः॥ समीरोवायुः वहतिवाति॥ शा
रः आवलवातया ः घातस्यबापकरणइत्यनेकार्थः। किंकुर्वन्समीरः अज गर्जी ः पंकजश्रेणीः नर्तयनकंपयन। तरलनमेवात्र
नर्तनं किंभवात अन्कारागीः नवविकासेनस राजानां अभिनवाङ्कुरेन उल्लासि विभ्रमरम्यकिंजल्कं केसरं तस्मिन लभ्यंतो गार्थ्यम
भिलाषं कुर्वंतायमधूकराः भृंगाः तैः कृतं गीतं झंकारगानं। यास्कताः। तथाविधः पुनः किंभूतः समीरः शारदिभवानि शारदानिमु
कुदीनि तानिविद्यतेयेषांते शारदिनः। रूपीवलाः तेषां ईनः स्वामी तथा सस्यसंपत्तिहेतुत्वात्। मालिनीवृत्तं॥ ८॥ राजातुनलस्तस्य
वनपालिकायाः तेनमकुल्लाः कल्याः खलितामनोज्ञाः येवनप्रदेशाः काननविभागास्तेषांप्रकटनंप्रदर्शनेयः प्रियोमधुरआलाप
प्रपंचः॥ वाग्विस्तरस्तेनपरितोषितः आनंदितः सन्। भो मारमिके स्मभाषितानां स्म्कानां मंजरिरिव यासा तस्याः संबुद्धौ हस्मभाषि
तमंजरि माधवचारुत्वयाभणितमिस्याभ्याह्रियते। परितोषभवंपारितोषिकं प्रीतिदानं वासनां माधवगृहाण। आदत्स्वेति॥ अभिधायउ
ल्लुतांसारमिकां सर्वांगानि व्याप्नुवंतिइति सर्वांगीणानि यानिआभरणानि केयूरादीनि॥ तेषांप्रदानेनप्रसंनं विकस्वरं आननंयस्याः
सातयाविधांअकरोत्। पारितोषिकमितिअध्यात्मादित्वाट्ठञ्। सर्वांगीणेति तत्सर्वादेः पथ्यंगकर्मपत्रपात्रंव्याप्नोतीति सर्वस्वंका
दंगानव्याप्नोत्यर्थेख ः। खस्यईनः। ततश्चततोनंतरं नलः एवंविधं भुवोभूमेः भूषणायमानं मंडनोपमे। सर्वर्तु निवासनामनि सर्वर्तु
निवासाभिधानं। वनेविहर्तुं विचरितुं आरभत्। प्रयत्नं कृतवान्। किंभूतवनं संचरंतोमधुपुष्पफलाद्यास्वादनायप्रवर्तमानाश्चद् राम
लाश्चंचलायभृंगाश्चविहंगाश्चतेर्वल्गंतः कंपमानाः येबकुलाश्चचंपकाश्चचूताआम्राः। चंदनाश्च वृक्षास्तेभ्यो अमंदाः ४९
अनल्पाः स्पंदमानाः क्षरंतोयमकरंदबिंदवः कुसुमजकणास्तेषांसंदोहेनसमूहेनआडंबरिता आरब्धा अकांडेअसमयेप्रावृ

201/1933

षकालश्चयस्मिंस्तत्तस्मिन्। यद्यपितदानींवर्षासमयोनास्तितथापिमकरंदबिंदुवृंदस्यंदनेन। तदानीमसमयेपिवर्षाः
प्रादुरासन्। इति॥ मंदमंदेडुनोरागिण्यस्तेभाग्यवर्जिते। गजजातिप्रभेदेल्पेस्वैरमंदतरबले। इत्यनेकार्थः पुनः किंभूते
निंबाश्चकिंबाश्च जंबीराश्चजंबाश्चस्तासांयानिस्तबकानि गुच्छास्तेषांकदंबकं वृंदंयत्रतत्तस्मिन्। तथाकुसुमिताः पुष्पिताः
करवीराणां हयमाराणां वीरुधांल्लताय यत्रतत्तस्मिन्। तथाकोरकिताः कलिकाप्राप्ताः येकरंजाश्च अंजनाश्चतेषां निकुंजे कु
टुंगेनिं जाताः कूजनशीलाः शुकाश्च कपिंजलाश्चपक्षिविशेषायस्मिनसः तस्मिन्। तथाजलदसमयस्ययोनाशंकामेघस्तद्धुली
लाः कृष्णाः येतमालस्तरवः तेषांतले जलदभ्रांत्या तांडवितानृत्यंकुर्वंतः शिखंडिनोमयूरायत्रतत्तस्मिन्। जलदसमयइति॥
परंदनीरदस्यजलभृतत्वंद्योतयति। नदाचनीलत्वंघटनएवेति। तथामंडलिताः पंक्त्याव्यवस्थितामदेनदर्पेणकलामधुरस्वराः
येकलहंसाः स्तत्पथेवातंसः शोभारम्यासांईदृश्याया कमलवाप्यस्ताभिर्मंडिताभूषितं यत्ततस्मिन्। तथामंजरिताः संजातमंजरीकाः
येसिंदुवाराः निर्गुंडीतरवः तेषांमकरंदेन रम्यआमोदपरिमलोयस्मिंस्तत्तस्मिन्। तथामंदतरोतिशयेनअल्पोयामारुतोवायुस्तेन
यदंदोलनं वपनं तेनविलोलानि यानिकदलीनांकोडाफलानांकुड्मलानि चापफलानिच॥ तथानालिकेराश्चलवंगानि। पूगाश्च
क्रमुकाश्चपुन्नागाश्चनारंगाश्चतेषुसंगिताः क्रीडिताः विहंगायत्रतत्तस्मिन्। पुनः किंभूते भृंगाणांधम्याटपक्षिणांमुखैश्चंचुभिः
नखपंजरेणचनखजालेनजर्जरिताः खंडिताया ः खर्जूरमंजर्यस्तासांरजः पुंजेनपरागसमूहेनपांसुलारजस्वलाभूर्यत्र। तत्
तस्मिन्। तत्रवनव्यतिकरे। तस्मिंश्चावसरेराजहंसाः। संपदि शीघ्रंपतनसमकालमेव धरामंडलंभूतलं। उत्फुल्लानिविकसितानि
पांडुनिधवलानि यानि पंकजानि पद्मानि तेषां यः प्रकारः समूहस्तस्यप्रकारेण निर्देशस्यभावप्रधानत्वात्। प्रकारत्वेनसादृ
श्येन उत्फुल्लपांडुपंकजप्रकरइवमंडयन्तः। यथाभूतफुल्लाब्जैः शोभतेतथाविभूषयंतस्संतः। कुतोपि कस्माचित्प्रदेशान्निपेतुः
पतंतिस्म॥ प्रकारसदृशेभेदइत्यनेकार्थः॥ किंकुर्वंतः प्रलयकालस्यप्रभंजनः पवनस्तेनउल्लालिताउच्छालितास्तेनवोल्लघवो
येतुहिनाचलस्यहिमालयस्यगंडशैलाः गिरिश्चनरस्थूलपाषाणास्तेषांलीलांशोभां आकलयंतो बिभ्रतः मन्येमीहंसानिति

निपेतु: किंभूतं चंडमरुता उच्छलिनास्तुहिना चलस्य गंगाया: श्राविंति। तथा मंदमरुता अल्पवातेन तरंगितानि जाततरंगाणि
उपचारात् तरंगाकूनी निमनुतराणि अतिलघुनि यानि ज्ञावद‍्याणि। तद्दविभ्रमवंतो विलासवंतो भवंतो विभ्रमाणमाणा
येन मंदमरुत्तरंगिततनुतरद‍्यविभ्रमाय्यमाणा:। तरंगिनेति तारकादित्वादितच्। तथा करवारणेन ऐरावतेन विक्षोभि
ता गाहिता या गगनमंदाकिनी नभ:सरस्सरित। अत एव तस्या: पतंतियानि पांडुरडिंडीरपिंडपटलानि श्वेतफेनपिंडजाल
निनानिविडं चयंत: अनुकुर्वंत: तथा उत्फुल्लानि खंडानि उदितानि उद्गतानि इंदुमंडलानि तेषां यन्नूसहस्रं तेन संछादितं
आवृतमिव गगनं आपादयंत: संपादयंत: स्वंडानि ते ताहंससदृशा एव भवंत्यत्तेषां भ्रम:। तथा मंदरगिरिरेव मेरुरेव परि
क्षेपो मंथा तेन क्षुभितानक्षुभितामथितायः क्षीरवारिधि: क्षीरसमुद्रस्तस्मादुद्गरसमुच्छलिता उल्लसिता उल्लसितायदुग्ध
कल्लोलास्तेषां लीलां शोभां दर्शयंत:। ताहंसा अमीनभवंति। किंतु क्षीराब्धेरुच्छलिता: पय:कल्लोलाउति। तथा शेषाहे: शे
पनागस्य फणाचक्रवालवत् स्फटिकमयहवनकवल्ला: श्वेता: उत्प्रेक्ष्यते मूर्त्तिमंत: संदेहा: पतंत: प्रमुदितस्य हरस्य त्र्यंबकस्य अट्ट
हासलवाइव। हासस्य श्वेतनया वर्णनमिति कविसंकेत:। पुन: किंभूता अमंदेन अनल्पेन मदेन हर्षेण बहलो मनोज्ञो य: को
लाहल: कलकल: तेन भरितपूरितं भुवनांतरालं भुवनमध्यं यैस्ते तथाविधा:। तथा पुंडरीकवत् सिता भोजवत् पांडु: श्वेता
पक्षपत्रराजिर्येषां ते। तथाविधा:। यद्यपि पक्षपिच्छयोरभिधानकृतानभेद: प्रत्यपादि। तथापि महदेवांतरायत: पक्षन्नाम्ने
न पक्षताएवपिच्छत्वेन तु दंतत्वाभिधायते। तथाविधव्यतिकरायस्मिन्नवसरे तेनिपेतुस्तस्मिन्नेवावसरे सपरिजन: स
परिच्छद: नरपति: नल: तान् अवलोकयन् वीक्ष्यमाणो निश्चल एवावतस्थे स्थित:। किंभूतो नरपति: विस्मयेन तत्समागम
नोत्पन्नाश्चर्येण विस्मृत। नष्टो निमेषो नेत्रयोर्निमीलनं यस्य सद्भावस्तत्ता। तथा हेतुभूतया निर्वातेन वाताभावेन निश्चलेय
। नीलोत्पलस्य पलाशं शंपत्रं तद्वत्। अशोभावती शोभावती। भवति शोभायमाने लीलायमाने लोचनेने त्रेयस्य स: यादृग्वा
ताभावे नीलोत्पलदलं निश्चलं वीक्ष्यते। तथा कौतुकाकुलितया निमेषाभावेन नेत्रे निश्चले वीक्ष्येनेत्यर्थ:। शोभायमाने राम
४१

त्यत्र शोभाद्राद्वा वर्त्तिवर्त्तमानादयि:। एवं विभ्राप्यमाणेत्यादयोपि व्याख्येया:। पुन: किंभूत: कौतुकाकुलेन प्रत्युहल्लाभि
प्रायेण तरलितो चांचल्यापितं मनो यस्यासौ तथाविध:। अथ तेषां केलिलीलामाह। ते चलत्खंडा अरुणा नेत्रयुक्ताहंसा धा
र्त्तराष्ट्रा तथा ऊन: पांडुपक्षाणां शुभ्रपक्षतीनां पातान्यासांस्ते तथाविधा: तथा द्विजानय: पक्षिण: तथा सप्तुराजिता: शोभि
ता: सुराजिता:। अपि किंशब्दो यथार्थे धार्त्तराष्ट्रा: कुरवो भवंतिते। अथ च रत्या मदिरया जिता आयत्तीकृता: सिताभवतीत्यर्थ:। तेषां
मध्ये केचिद्धंसा: उच्चचंचुपुटेन उन्नतचंचुसंपुटेन विघटितानि वियोजितानि निकटनलसदसमीपबालानां नवोत्पन्नानां रु
वालानि कवलयंत: भक्षयंत: तथा केपि हंसा: स्वंव्योमआलोकयंतो वीक्ष्यमाणा: किंभूता: संत: उन्नमिताउर्ध्वीकृताः सरला ऋ
ज्वी गलनालि: कंठकांडं यैस्ते तथाविधा: पुन: नलिनवनाभिमुखा: अनग्ववोडीयनाया का शावलोकनं कुर्वंत:। तथा केचिद्धंसा:
उत्क्षिप्ता उच्चै: कृता या पक्षा पक्षतीतयो विक्षेपणविधूननेन संजातो य: पवन: तेन कंपितानि दोलितानि कंदलानि अंकुरा हा
यैस्ते तथाविधा: संत: सलीलं लीलया सहितं यथा स्यात्तथा उत्पतंत: उड्डीयमाना:। तथा केचिदुन्मदेन उत्कृष्टहर्षेण मधुर:
श्रोतानुकूलो यो निजनिनाद: स्वनस्तेन निर्जितं जितं जानं रणत्कारं कुर्वाणं नूपुरं तुलाकोटिर्यैस्ते तथाविधा: संत: अस्य नलस्य पु
र: अग्रतो अग्रतो धावंत: प्लवमाना क्वचित् क्रीडितुं क्रीडितुमारभंत। राजापि नलोपि विहसन्नेव तेषां हंसानां मध्ये अन्यतमं हंसं
ग्रहीतुं हठस्तेन व्यग्रा व्याकुला: समग्रा निखिला: परिजना यस्य स: तथा परिहासेन लीलापूर्वकहास्येन उन्मीलिता विकसंतीया
दंतकांति दंतद्युति धवलितयालंबलितं कर्बुरितं अधरपल्लव उष्ठकिसलयं यस्य स तथाविध: श्वेतारुणवर्णयोगात् कर्बुरित
त्वं किंकुर्वंतं हंसं उन्नाउन्नता चटुला चपला या चरणचारी पादन्यासस्तया या चर्या गमनं तया चारु यथा स्यात्तथा संचरंतं गच्छंत
तथा ईषन्मनाक् उत्क्षिप्ता उच्चै: कृता यापक्षा। तयोर्विक्षेपविलासेन विधूननलीलया विहसितास्थगिता विलासिनीनां गम

203/1933

णीनां लास्यलीला नर्तनविलासो येन सतं। तस्य शिक्षिपलीलायाः पुरः कापिलासिनीनां नर्त्तनलीलेति पुनः। किंभूतं। उन्न
मिताउच्चैः कृता यग्रीवा कंधराग्रभागो येन सतं। तेन नलेन रक्तकमलगर्भवत् शोणपद्ममध्यवद्विभ्रमवान्। विलास
वान् भवन् विभ्रमायमाणाय पाणिपल्लवः करकिसलयं तस्मिन् उत्क्षिप्त उच्चैः धृतः स चराजहंसो व्यराजत। शुशुभे।
कस्मिन्निव पद्मरागमणेः लोहितमणेः शुक्तितले। शुक्तिकायां पाण्डुपद्म इव श्वेतकमलमिव। यथा पद्मरागशुक्तौ
निहितः पाण्डुपद्मो राजते। तथायमपि। पद्मशब्दः पुंनपुंसकः। पुनः कस्यां क इव॥ क्षणं मुहूर्त्तं यावत् उदयशैले उदया
द्रौ शोणमाणिक्याभां लोहितमणीनां या शिखरशिला तस्यां इन्दुरिव। यथा इन्दुरुदयाद्रिशोणमणिशिलायां राजते त
थायमपि शोभतस्म। पाणिपल्लवस्य पद्मरागशुक्तिः शोणमाणिक्यशिला चोपमानं हंसस्य तु पाण्डुपद्म इन्दुश्च। पाणित
लस्य रक्तत्वात् हंसस्य श्वेतत्वात् इयं उपमा॥ ततो गृहीतः सन् एष हंसः विस्पष्टवर्णविशेषं व्यक्ताक्षररचनं यथास्यात्तथा राजानं न
लमुपश्लोकयांचकार। श्लोकैरुपस्तौति स्म॥ उपश्लोकयांचकारेति सत्यापपाशरूपवीणातूलश्लोकसनालोकत्वचवर्मवर्णचू
र्णचुरादिभ्यो णिच्। किंभूतः सन्। भद्रं यथा भवति तथा बाध्यमानाः शब्दं कार्यमाणा गेयः कलधौतमयो घना निबिडा या घर्घरं क
ण्ठ मणिकारिणां रागः स्वरो ध्वनिः तेन वक्तुं शक्तिः शब्दाय येन स तथाविधः॥ अथ श्लोकानेवाह। पाण्डिति। पाण्डुः श्वेतं यत्सरोज हंस
राजं तस्मिन् संलीना आश्लिष्टा या मकुपालिकाअलिश्रेणिः तया समं सदृशं गले कंठे यो बिभर्त्ति धारयति स नाम पुमान् कपालीकपा
लमाली अर्थात् शिवः सततं मंगलं कल्याणं विधेयात्॥१॥ अपि च पुनः। सरलेति आर्यावृत्तं॥ हे नृप एतत् प्रत्यक्षतो दृश्यमान
तव वपुः वनमिव अस्य जनस्य लोकस्य कथं अवनं कथं वनं नाभवत् अवनशब्दस्य वनप्रतिषेधार्थत्वात् पक्षे अवनं रक्षकमभूत्॥
कथमिति विरोधे॥ किंभूतं तव वपुः वनं च॥ सरला अकुटिला प्रिया यस्य तत् तथा गुणैः शौर्यधैर्यादिभिः राढ्यं। समृद्धं तथा लविं
तालं वायमानं वृतामाल्या लक्षःयस्य तत् तथा विचित्राणि विविधानि तिलकानि पिशितकानि यस्य तत्॥ तथाविधं च॥ वनप राम ४८
क्षे सरलाश्च देवदारवः प्रियंगवश्च फलिनी लतास्ताः समाहारे द्वंद्वे सरलप्रियंगुः तेन आढ्यं तथा लवलिनः प्रलंबाः तमालाः

205/1953

यत्र तत् तथा विशिष्टाश्चित्राश्चित्रकाया श्च तिलकाश्च वृक्षविशेषा यत्र तत् तथाविधं च॥१०॥ अपि च पुनः वीरेति। आर्या
वृत्तं॥ हे कृत सहकार वराः महकारका सचिवादयो यस्य स तस्य संबुद्धौ हे वरसहकारक। तथा रंजयतीति रंजकः तत्संबुद्धौ हे रंज
कः॥ तथा वीराणां सुभटानामिव नरो बलं यस्येति तत्संबुद्धौ हे वीरतर संबुद्धौ न दीर्घः॥ तथा न विद्यते शोकः शोकनं यस्य स तत्संबुद्धौ
न दीर्घः हे अशोक। एतेन धीरत्वोक्तिः। तथा मदनवत् स्मरवत् कामदेव इव सः तत्संबुद्धौ हे मदन। तथा हे पुन्नागपुरुषश्रेष्ठ नागशब्दः
प्रशंसायां इति विविधद्रुममय राजन् कथं कापि न विभीतकः कलिनासि। यो हि विविधद्रुममयो भवति स विभीतकोपि स्यात्। त्वं
च न तथा नासि प्रकृते तु विशेषेण भीतो विभीतक भीरुनामि कुत्सायां अनुकंपायां वा कः विविधद्रुममयेति। पदार्थद्रुमार्था प्य
भ्युदयस्य यामरकारश्चाम्रः करंजा नक्तमालः। वीरतरुः नदीसर्जः। तथा चामरसिंहः। नदीसर्जो वीरतरुरिन्द्रद्रुः ककुभोऽर्जुनः
॥ अशोकः कंकेलिः मदनः शल्यः यत्फलं विवाहे वधूवरपाणौ बध्यते। पुन्नागः स्फुरपर्णिका इति विविधद्रुममयत्वं कथमिति
विरोधे॥ अपि च पुनः॥ बाणेति आर्यावृत्तं॥ बाणः कुरबको दमनकः शतपत्रकं बंधुजीवकं। जातिश्चेति विटपिनः संबोधनप
देयाद्याः॥ हे नृप राजन् अस्मिन् विविधविटपिरूपो विचित्रतरुमयः शब्दतो नार्थतः अर्थतस्तु बाणाः शराः करे यस्य तत् संबुद्धौ हे
शतपत्रकः शोभाधिकः। तथा बंधून् स्वजनान् जीवयसि पुष्करोर्पयसि बंधुजीवकः तत्संबुद्धौ हे बंधुजीवक॥ तथा शोभना जाति
क्षत्रियाख्या यस्य स तत्संबुद्धौ। हे सुजाते। तथापि विटपः शाखा वा कथं न यो हि विविधविटपिरूपो भवति स कथं न विटपः स्यात् प्रकृते तु
त्वं न विटपः खिद्गः। यद्वा न विटान् पासीति विटपः। अपात्रभर्तानेत्यर्थः॥ असीत्यव्ययं त्वमित्यर्थः। कथमिति विरोधाद्वा वनेविट
पः पल्लवः स्तंबो विस्तारः खिद्गः शाखयोरित्यनेकार्थः। विस्तारो अर्थाद्वृक्षस्य। राजा तु नलः तद्गं श्लेषोक्तिरूपं वाक्यं सविस्मयं सा
श्चर्यं यथा स्यात्तथा आकर्ण्य श्रुत्वा इति चिंतयन् विचारयन् तं हसं स्वागतं सुखागमनवार्त्तां। अपृच्छत्। पप्रच्छ। इतीति किं॥ अहो
इति विस्मये अस्य हंसस्य मनुष्यगं भिधो पुरुषमतिधियापि धैर्यं धीरत्वं अहो इति अग्रे पि योज्यं तथा अस्य रूपे आकृतौ आश्चर्यं
अद्भुतत्वं॥ तथा वाचि वाण्यां। माधुर्यं मधुरता। तथा प्रज्ञायां बुद्धौ प्रावीण्यं चतुरता तथा अस्य अर्थे व्याख्यायां औदार्यं उदारता

नं०र०
४०.

तथा अस्य वर्णव्यक्तौ अक्षरविवेचने गांभीर्यं गांभीरता। अर्थं दृष्यात्मकत्वात्। प्रायेण बाहुल्येन आहारो भक्षणं मैथुनं कामा
कलिर्निद्रा स्वापः भयं परस्मात् भीतिः भ्रमणमितस्ततः पर्यटनं। तन्मात्र एव तस्मिन्नेव विवेकः आनुपूर्व्या मता तास्तथाविधा अस्म
पक्षिजातिषु कथमेतत् प्रागल्भ्यं धाष्ट्यं॥ तत्तस्माद्धेतोः एषकोपि विहंगेन पक्षिरूपेण बाह्यीकृत्य व्यज्यते इष्यत इति विहंग
व्यंजनो विहंगलक्ष्मी कामचारी गीर्विद्या यशादिर्भविष्यति। व्यंजनं श्मश्रु चिन्हयाः। तेन मनेवयवे कादाचित्यनेकार्थः। सर्वथा सर्व
प्रकारेण मनसापि प्राणिनो जंतवानावान्नयान अवगणनीया। यतो यस्माद्धेतोः भूतानि प्राणिनः कामतः स्वेच्छया तथा क
र्मतः कार्यात्। तथा शापतो वा ऋषीणां शापात्। मंत्र तन्त्रकाणि। आहृतप्रकृत्या कागणि विविधानि आश्रयाणि भजंतीति ता
दृशानि भ्रमंति। एभिः कामादिभिः कारणैः स्वीयं रूपं परित्यज्य अन्यरूपेण प्राणिनः पर्यटंतीति किं भूतागजाउचितायोग्यं यस्मि
न्समये यानि भयं। तज्जानानीति उचितज्ञः॥ पुनः कुंदपुष्पविशेषः तद्वत्कांता उज्ज्वला या दंतदीप्तिर्या दंतच्छवयस्ताभिः रचय
न् पुंजयन्॥ उपेक्ष्यते। ताभिः काभिरिव। ईषन्मनाक् उद्भिन्ना॥ विकसिता मंजुलाः स्यन्निर्गुच्छाः यामंजर्यस्ताभिरिव। अन्योपु
चितज्ञः आगतमतिथिं सिंदुवारमंजरीभिरर्चयति॥ तथा राजहंसमपि दंतकांतिभिः वसिंदुवारमंजरीभिः पुंजयन्॥ दंतकांतिः
तद्वर्गसंक्रान्त्यर्थः। असौ अपि हंसः प्रणयेन स्नेहेन प्रणतं नम्रं शिरो यस्यासौ ईदृशः॥ शुचिरोचिषा निर्मलकांतीनां यश्रय: स
मूहः तद्गुणपांडुलो धवलाय: पुष्पप्रकारो विकीर्णकुसुमानि तेन प्रतिपूजयन्निव राजानं नलं रंजया चकार साल्हादमकरोत्। किं
कुर्वाणः हे दवभवरजो नवदावन्योकनेन आल्यादितं दृष्टं मनायस्य मनस्य मम अद्य अत्रागतं त्वां भवमागतमायातं यद्भवान् दृष्टः
नि ब्रुवाणो वदन्॥ अत्रांतरे॥ अस्मिन्नवसरे हंसी द्राग्झटिति प्रदेशात् अवनिपालं नृपमवाप्य रूप्यमयी या घंटा तस्याः ष्टंकारः त
द्वत्कोमलया मधुरया गिरा वाण्या श्लोकद्वयं अपठत्॥ किंभूता इदृशं चक्षुर्वहंति धारयंतीति किंभूतं त्रासेन भयेन तरलाच्चंचला
तारका कनीनिका यस्मिन्नेवं तत्। उत्प्रेक्ष्यते अकांड असमये आडंबरितः आरब्धो यो बाष्पप्लवः अश्रुप्रवाहः तस्मिन् प्लवमानमि राम
व मज्जदिव असंनने अश्रुबाहुल्यात्। पुनः किं कुर्वंती सहचरे सहाये हंसमग्रहीत् गृहाते राज्ञा कुररुद्धे कृते सति। पक्षोच पक्षती पत्रा ४०.

चपि ध्वानितान्येव कोमलतालपल्लवाः पक्षपत्रपल्लवा उत्क्षिप्ता ऊर्ध्वीकृता यया पक्षपत्रपल्लवाः तेषां व्याजेन मिषेण आरवाद्धुरं
अन्यायपूत्कारचिन्हं आस्वा गृहणगृहणमिव दर्शयंती अन्यस्यापि कस्यचित्केन चित्किंचिदपराद्धं भवति सोपि तदन्याय
पूत्कारचिन्हं आस्वा गृहणं राज्ञः पुरो दर्शयति तद्वयमपि हंसी पक्षतीऊर्ध्वं विधाय मन्ये आरवाद्धुरमेव दर्शयतीति॥ अयं भा
वो हे देव त्वया मत्पति ग्रहणान्महानन्यायः क्रियते उत्क्षिप्तपक्षाभ्यां ज्ञाप्यत इति॥ श्लोकद्वयमेवाह॥ एकांत इति॥ अ
स्य विष्णोरपत्यं उः इश्वरः कंदर्पप्रतिमल्लत्वं बुद्धोत्र एइतिदेवइतिव उपछंदयितुं संबोध्य मुमोचयिषुः पतिं हंसीनृपमा
ह। हे एहदेव मुक्ताहारो मौक्तिकहारः तद्वत् सच्छिद्रो पक्षती यस्य शुभ्रत्वात् मतथाऽक्षुः॥ तथा कस्य जलस्य अंते अवसाने
वर्त्तमानं अगंडुमंयः सेवते तथा मोक्षस्य मार्गेनस्य योग्योपि उचितोपि सहंसः पक्षितया किं कमर्थं बध्यते उत्कृष्टार्थः
अथवा यः कांत इति ममस्वं विज्ञनार्थः अथ च हंसः आत्मा पुरुषः॥ हे देव स हंस आत्मा मोक्षयोग्योपि निर्वाणार्होपि किं ब
ध्यते। न बध्यत एवेत्यर्थः। क्वयाल्वयात्वत्सारः सर्वनामगणमध्ये अन्यार्थः अतः पुरुषापेक्षया अन्ययाप्रकृतत्वर्थः। क
स्मान्न बध्यत इत्याह। यः कांते विज्ञने यत्रा अः कृष्णस्तस्मिन् एकांतकमनीये परमानंदस्वरूपे त्य क्लाहारपरिवारः सन्
यागमध्यात्मं ध्यानं समाधिमिति यावत् सेवते अत्र पक्षे अ उत्यस्माद्विष्णुवाचकात् सप्तम्येकवचने ए इति रूपं। यदि वा
समो मोक्षयोग्योपीति समः समदर्शनः शत्रुमित्रसमानदृष्टिः रागद्वेषाकरणात् तथा अक्षयोग्योपि इंद्रियसंबद्धोपि॥ १३॥
नीरमिति। जनानां पदस्थानं पुरग्रामादौ अतिष्ठन् अवसन् यः सरस उदं सारसं तथा अवसंतीति श्वसाः वयः पक्षिणः अ
भाः प्राणिनो यत्र तत्तनत्वात्तं नीरं जलं गतः स हंसः किं क्वापि बध्यते अपि तु न बध्यत एव स इति कः यस्य हंसस्य नाल्पं
तृणसंबंधि वनं काननं प्रियमभीष्टं नलस्य इदमिति इदमर्थः एणू अथ च अध्यात्म पक्षे नीरंजनपदं नीरागपदे तिष्ठन् हंस आ
त्मा किं क्वापि बध्यते न बध्यत एव। यस्य विश्वेभ्यः समस्तेभ्यः संसारसंगेभ्यः आलंबनमासक्तिः न प्रियं विश्वसंसारसंग
त इति पंचम्यास्तसिल्॥ यद्वा यस्य विश्वेषु संसारसंगेषु आलंबनं आसक्तिर्न प्रियं तत्पक्षे सार्वविभक्तिकस्तस्। अन्यच्च॥

207/1955

पुनरपिहे राजन् जलपक्षिणो मुनयइव यतयइवमी नो मत्स्यमस्याहारं वांछंति। इहते। तथा बहुधावेन अतिशायिभ्र
मणव्यसनं आसक्तिं विंधतेयुपातबहुधावनव्यसनिनः तथा बिसं पद्मिनी नालं आधाराजीवनंयेषांते बिसाधाराः। मु
निपक्षे। अमी मुनयो न आहारं वांछंति तथा बहुधा अनेकधा वनव्यसनिनो वनरुग्णः व्यपेतः साधाराः अन्यलोकसाधार
णस्थितिपूर्वोत्सवादिर्येभ्यस्ते लोकोत्तरवृत्तान् विसादनाइति। नृपावैबिसमदनं येषांते। पक्षेविगतं मादनं पीडनं
येभ्यस्ते अपीडकाइत्यर्थः॥ यतएवं ततस्माद्भूताः आग्रहेण ग्रहणहठेन अलमिति वारणा अव्ययं माग्रहाणेत्यर्थः
राजानुनस्य मस्यादंस्यात्तेन श्लेषश्लाघिना श्लेषप्रकाशनशीलेन एतेन एकांतइत्यादि वचसां श्लिष्टार्थत्वमुक्तं श्रो
कांक्षानांयारमामाधुर्यतेन श्लोकांक्तिरसेन आल्हाद्यमानः नर्मालापानां परिहासं पूर्वकमधुरवाक्यानां यालीला
विलासस्तया नाहंसी प्रतिबभाषे। अनेकधेति॥ उपेक्ष्यावज्ञं॥ हेहंसिक। यः सदाजगतो पिसर्वस्यापिसदं भोदं
भिकः। तथा अनेकधा उक्तोपिप्रणतिमत्स्यप्रकारादिनापक्षपातं ममत्वं करोति। तथा दारेषु परस्त्रीषु विहारशीलः क्रीडा
परः॥ अब्रह्मचारी॥ तथा बहुन् नाडासत्येवंविधः कृतायस्यातिहिंसापापरतः। सकथं न बध्यते संसारकारायामिति शे
षः इतिहंसी प्रतिवचनाचित्यसमपक्षे व्याख्या। यद्वा यो दांभिकः सदाजगतोपि पक्षस्य मित्रवर्गस्य पातं नाशं करो
तितथा जगतोपि दारपुक्रीडापरः। तथा बहुयातकृतास्त्र्यः समूहापरा। धीबध्यत एव नर्मणैवहंसीवचसोन्यथात्वं त
त्वतस्तप्रामाण्यं। तद्यथा हेहंसिकिं बहुनाकिं बहूक्तेन सदंभात्संसत्संगतः प्राप्तः सन्। यः पक्षतिपातं करोति। तथाके
दारविहारं केदारेषु संचरणं शीलयति निषेवते यः सः केदारविहारशीलः सशकुनः पक्षी न बध्यते किंतर्हि मुच्यत एव
। तस्मात्युक्तमुक्तं त्वयेति। वास्तवोर्थः। एवमुत्तरत्रापि॥ अपरपरिभोगप्रतिपादनर्थ्याउत्कृष्टदोषदर्शनेन हंसं प्रति
हंसीकुलयन्नाह॥ किंचान्यदपिहेहंसिक बंधस्यकारणं श्रयताचकारः पराभिप्रायाक्षेपपूर्वकं विशेषएवंनामा॥ सौ
दुरात्मा निर्भयादेनिः शंकश्वेतन आमतोलोकदारः॥ ममापिराज्ञः परिग्रहे स्वीकारे मृणालिका नां पद्मिनीनां अवने राम
५०

2-09/1933

रक्षणे नायिका स्वामिनी सानतो अपरागान् स्वगितं संवृतं मुखकमलं वक्त्राब्जं यथा साइदृश्यपि बलात्। बलात्कारे
ण अनेन तत्क्षत्रं विना शिताविनाशाचशील खंडनं कथं विनाशितं तितदेवाह॥ विनिपत्येति। उपरिविनिपत्य संरुद्ध
येयं नखैर्जर्जरिता॥ तथा अस्या अधरदंदउष्टपल्लवः खंडितं सक्षतं कृतं। तथा अस्या अलिकं ललाटं तस्य। तथा
अलंकानां चकेशानां मंडनं तिलकपुष्पादिदलितं लुप्तं तथा अस्याः स्पष्टकुमारभावः अर्थात्कन्यात्वं अपनीतः उद
स्त। वा अथवा॥ अनेन पीवेरणस्थूलेन किं न कृतं। अपितु पूर्वोक्तं सर्वं कृतमेव तदिलकपसंहारे। तस्मादीयोपराधीपं
जरस्थ बंधनस्यापकरणस्येदंपांजरं। सथं बहुधा अनेकप्रकारेण यावन्नावगाहते ना ध्यास्ते मममतावत्कुतः संतोषः
अथायं द्विजन्मत्वादनिग्राह्यइत्यतआह॥ नचेति॥ द्वाभ्यां सकाशात् जन्म यस्य सः द्विजन्मा॥ नद्विजन्मा अद्विजन्मा॥
तथाक्त अर्थात्क्षिज्ञात निगृहीतेपि अपरुद्धपि गर्गाद्या गरिष्ठं पातकं नचनैवास्तितस्मिन्। कीदृशे। नदीक्षिते। दीक्षा
व्रताचादिमतपरिग्रहः संजाता अस्येति दीक्षितस्तस्मिन् एतेन लिंगत्रिज्ञातोप्यवध्य एव। अपिः समुच्चयार्थो भि
न्नक्रमः। सचद्विजन्मनीत्यनेन संयोज्यः। तद्यथा। दीक्षितव्रतीनि द्विजन्मनि च ब्राह्मणे निगृहीते पातकं न इति। न
चपातकं भवत्यर्थः॥ वास्तवं तु॥ मत्परिग्रहे मृणालिका पद्मिनी नामेति संबोधनेन धनस्य नायिकेव मुख्यत्वात्। वर्त्त
तमाम्रणालिका परागा मकरंदस्तेन छत्रमुखानि कमलानि यस्याः सा इदृशी बलादपि अनेन विना पक्षिणा आत्रिता
सक्षिता अत्र भोजनार्थत्वात् कर्मणिक्तः तथा उपरिविनिपत्य नखैर्जर्जरिता। तथा अस्या अधरदलं अधः पत्रं खं
डितं तथा अस्या अलयएव भृंगाएव कालंकृत कस्यशिरसं। उपरिभागस्य मंडनं दलितं। लुप्तं। एतदागमनेतस्
मुड्डीयनात् तथा अपनीतः सुकुमारभावोमृदुभावः नखसंजर्जरितत्वात्। अनेन हंसेन बाप्यां वरेण प्रधानेन मंडनत्वा
त् किं न कृतं अपितु पूर्वोक्तं सर्वं कृतमेव तत्तस्मात् एषः त्वसतिस्त्र्यां जलानां मध्यं जरत्या बतवार्द्धक्या वधिबहु
धा नावगाहते। तदेव तावन्मकुतः संतोषः तथा न दीक्षिते द्विजन्मनि विहंगे निलरां गृहीतेपि पक्षेद्वात्वीकृतेपिग

चं०३०
५१

रियोत्यर्थं नचपातकमक्षिश्रयएवाम्नोत्यर्थः गरीयइति क्रियाविशेषणं। अपिर्विरोधोभावेन यदानिगृह्यते तदापातकं कथं नभवेदपितु भवत्येव गृहीतशब्दस्यदंडितार्थत्वात्। अर्थीतिप्रश्ने नुनयेवा। हेमुग्धे कलहंसिके त्वं मानेन पूजयासंगतापि विमाननां अवगणनां सहसे। पक्षेमानसं सरोगताप्राप्ता॥ नथाविधुपक्षिषु मानननांप्रज्ञां सहसे यतो यस्मात्कारणात्विपरीतो विरुद्धवृत्तः खलुनिश्चितं एषः हंसपक्षेभावि पक्षिभिः परीतः परिवृत्त:। कादंबकदंबकश्चरात्तथासद्वास्य मदत्वयस्य याः कांताः तासुयोगेगानुरागः तस्मात्सरागमुख॥ नथामधुपश्रेणिभिः मधुपपंक्तिभिः श्रयणीयां। सेव्यां गुरुयाजीवति यासातां कांतं कामयंते इच्छति। पक्षेशोभनावंशाम स्करायेषु ईदृशानियानि कांताराणि विपिनानि। तेषु ये अगावृक्षाः तेभ्याविमुख मधुपश्रेणिश्रयणीयांभृंगपंक्तिश्रितांमृदुशोभनंराजीविनीं कांतां कमनीयकामयते तत्समाश्रिताः अनेनदंसेन अलंमृतं हेवत्से। हंसीयथाप्रियं गच्छप्रियस्यानति क्रमेण यथाप्रियं। प्रियोभर्ता इष्टप्रदेशश्च यस्मेश्वरत्वं नृपइति अभिहितवति॥ उक्तवतिसतिसापिहंसीसपरिहासं सस्मितं तथास्यात्तथा इत्युक्तप्रकारेण आकलितोमनसावधारितः कलहः परस्परं राटिर्यस्मिन्। कर्मणितद्यथास्यात्तथा कलहं समवादीत्॥ हंहोइतिप्रश्नपूर्वामंत्रणे हेहंसविहंगभुजंगविलासिन्। तावत्त्वं निवेदितां मृणालिकांपद्मिनीपालननायिकां। अरसान्वितः स्नेहां तरसा बलेन नुकिंरागेण स्वासक्त्यारंजितं हृष्टं मनो यस्यासौईदृशः सन् कामयसे इच्छसिनु किमर्थं नचायंविलासिधर्मः वस्तुतस्तु हंसहंसः मृणालिकांपद्मिनीं रंजितमनाः रंजितचित्तः कामयसे इच्छसितु। किमर्थं। नचायंविलासिधर्मः। वस्तुतस्तु हंहोहंस। मृणालिकांपद्मिनीं हितामरसांतरसानुरागः तामरसानि अंभोजानि तेषां रसोनिर्यासः तत्र अनुरागो यस्येतिसंबोधनं अंतःशब्दः स्वरूपार्थः यद्वातामरसस्य अंतरमध्यमानुरागेतिसंबोधनं॥ वाअनवापीनदेहस्थूलांगेनीरसेनिःस्नेहेनिर्वीर्या। वावके वकभार्ये त्वयि किंनसंभाव्यते अपितु सर्वं नृपोक्तंसंभाव्यतएव। पक्षेत्वयि किंभूते। वाप्यश्च नद्यश्च तेषां दावांछायस्य सतस्मिन्। तथानीलंजलं। सेवनेयः सः तस्मिन् किंनसंभाव्यते। इतिसंभावना अत्र प्रशंसाविषया शम
५२

2/11/1933

एकमेवद्विवाक्यं प्रकरणादौचित्याच्च। प्रशंसां निंदां च प्रतिपादयति। नथात्वमस्माकं किंकिंनकरिष्यसीति प्रसन्नेनोक्तं प्रशंसांगमयति। दुष्टेनचनिंदां॥ अथसोपिहंसः इतिवक्ष्यमाणं राजानं नलमवादीत्। इतीतिकिं। वैदग्ध्येन चातुर्येण धुरंधरः सर्वेषां मध्येमुख्यः तस्य संबुद्धौ हेवैदग्ध्यधुरंधर। तथाधूर्तानां च स्तरीवाक्यवक्रणामालापेषु वाक्येषु पंडितो धूर्तालापपंडितस्तस्यसंबुद्धौ हे धूर्तालापपंडित अन्यथाएतादृशानां वाक्यानां कुतउल्लापः। तथाप्रज्ञाप्राग्भारेण बुद्धिबाहुल्येन गुरुः गरिष्ठो बृहस्पतिप्रतिमो वा तस्य संबुद्धौ हेप्रज्ञाप्राग्भारगुरो॥ तथाहे चातुर्याचार्य। चातुर्यशिक्षक हे नृप मेममामपि यां हंसीं सकोपयसे ईर्ष्यां कुरु। यतोयूयंवयं च सदृशा। एवसमानाएवराजहंसाः राजमुख्याः। पक्षेलोहितैश्चं चुचरणैर्युक्ता हंसाराजहंसाः। नथायूयं सरसांजनानुरागकरीं श्रियं राज्यलक्ष्मीं अनुभवथ॥ तथापात्रेषु धर्मपात्रादिषु दीनां स्थितिव्यवस्थां नकुरुथ। औदार्यंभजथेत्यर्थः। तथारणचर्यांयां रणविधौ नन श्लाघ्यध्वे। अपितु श्लाघ्यध्वएवचः समुच्चय। वयं च सरसां तडागानां श्रियं अनुभवामः तथानदीनां सरितां पात्रेषु कूलमध्येषु स्थितिमवरुद्धानं कुर्मः पात्रं तु कूलयोर्मध्ये पर्णनृपतिमग्निणीत्यनेकार्थः॥ तथाचरणं चर्यागतिविशेषः तस्यां नन श्लाघ्यामहे। लोके रीतिशेषः अपिश्लाघ्यामहएव। तत्तस्माद्युक्तप्रकारेण। सपक्षेषु समानपक्षेषु नदक्षेषु। पक्षैपक्षतिसहितेषु अस्मासु विपक्षो विरुद्धपक्षो माभूः अत्रास्माभिः अर्थवशाद्विभक्तिपरिणामं विधाय व्याख्याव्यधायि सूत्रकृता तु युष्मदस्मदोर्युगपद्योगे अव्यवधानाच्चपुरुषवचनादस्मत्प्रयोगएवोक्तइति। एवेति॥ अनुष्टुप्। एषाएषैव मेममहृदयं मनः अभिन्नभावत्वात्। तथाजीवाजीवितं। तत्सद्भावेजीवनात्। तथाउच्छ्वास: श्वासोबंधकचिंतादिदुःखभरापगमहेतुत्वात्। तथाप्राणः प्रधानभूतो वायुः देहधारकत्वात् प्राणो बलमिति। यत्प्रशस्तपादः प्राणोंतःशरीरे रसमलधातूनां प्रेरणादिहेतुरिति॥ हियस्मात्कारणात्तु। प्राणिनां प्रयोजनोवल्लभोलोकः संसारः कस्यसर्वस्वं धनं एतस्मादधिकं संसारेकस्वं न किंचिदस्तीत्यर्थः॥२॥ तथारूपमितिश्लोकः। ईदृशं कलशंस्त्रीकेनलभ्यते अपितु आनुकूल्याप्यर्थाद्रूपयस्त्वेन केनापि भाग्यवताजनेन प्राप्यते न तु येनकेनचिदित्यर्थः॥ किंभूतं रूपसं

चं० टी०
५२

पन्नं संपद्युतं॥ तथा अग्राम्यं अप्राकृतं। तथा प्रेमप्रायं सदृशं प्रेमप्रायं ममस्नेहमित्यर्थः॥ यादृग्ममैतस्या उपरिस्नेह
स्तादृग्गतस्या अपिममोपरीति॥ यद्वा प्रेम्णः स्नेहस्य प्रायो बाहुल्यं विद्यते यस्मिंस्तत्स्नेहलमित्यर्थः। प्रायो वयस्य त
त्तानमृतो बाहुल्यतुल्ययोरित्यनेकार्थः॥ तथा प्रियंवदं मधुरवादि। तथा कुलीनं सत्कुलोत्पन्नं। तथा अनुकूलं अनुगामि
॥२१॥ ततस्मोद्धतः अलीकः अन्योक्तिकथनरूपो यः कलहारंभस्तेन अलं अलीककलहारंभं माकुर्वीत्यर्थः॥ भवा
नप्येवं विधायथावयोर्दंपत्योस्तथाविधायः प्रेमप्रपंचः स्नेहविस्तारः स एवनाटकं तस्य नायकः शिक्षयिता॥ नातिचि
रादेव स्वल्पेनैव कालेन यथा भ। वतिवर्तमान सामीप्ये वर्त्तमानवद्वेति वचनाद्भविष्यतिलट्भविष्यति। तथा कमपि
अभीष्टं उपकारं करिष्यामि कांचनराजपुत्रीं भवता सह संयोजयिष्यामीति भावः॥ इत्युवाच। अत्रांतरे अस्मिन्नवसरे
अंतरिक्षमंडलात् आकाशात् अतिस्पष्टा अतिशयेन व्यक्ता या वर्णव्यक्तिरक्षरविवेचनं तया मनोहारिणी मनोज्ञा वाक् श्रु
यंत॥ तथाहि॥ राजन्निति श्लोकः॥ हे राजन् राजीवपत्रवद्विशाले अक्षिणी यस्य सः राजीवपत्राक्षः तस्य संबुद्धौ हे राजी
वपत्राक्ष अयं हंसः क्षिप्रं विमुच्यतां॥ यस्माद्यं हंसोदयंमत्याः प्रलोभनत्वयि सरागीकरणे एतावता इतो भविष्यति
॥ असौ दमयंतीं त्वयि विषये रागिणीं करिष्यतीति भावः॥२२॥ राजा तु नलस्तस्यां नभोवाण्याः सकाशात् कर्णांतरं कर्ण
मध्यं अवतीर्णेन प्राप्तेन तेन दमयंतीति नाम्ना तित्तिरिरिदं तेन तित्तिरिकामलं मंडुयन्तेत्तिरंतित्तिरिसंबंधिपिच्छपत्त्रं तस्य स्व
उत्विपुष्पाश्लेषयत्सर्वं तदनुभवन्निव आस्वादयन्निव मनाक् स्तोकं मीलिते संकोचिते अक्षिणी येन सः ईदृशः सन्
चिंतयांचकार॥ चिंतितवान्। किंभूतेन दमयंतीति नाम्ना सोप्मं श्री ‍ण्यसहितं यत्बलागंधद्रव्यविशेषः तस्यते
लं तस्यय पूरः प्रवाहः तेनेव अंगं शरीरं उत्पुलकयता रोमांचयता। यथा सोप्मबलातैलस्पर्शात्पुलकाः संजायते तथा॥
तन्नामश्रवणादेवेति॥ किं चिंतितवानित्याह॥ आल्हादेति श्लोकः॥ असतां दृष्टाः स्पृष्टा वा श्रुता अपितस्याः श्रोणीबिंबा राम
आल्हादयंति आनंदयंति उत्साहः। वयस्कृत गुरुतरादि बहुविशेषात् बहुत्वं किंभूताः श्रोणीबिंबाः॥ सौख्यमेव अंभोजलं ५२

213/1933

तस्य शातकुंभीयाः सौवर्ण्याः कुंभ्यइव कलशा इव यास्ताः सौख्यसर्वात्मना आधारभूता इत्यर्थः॥ पुनः किंभूताः कांचीकला
पेन मेखलावृंदेन सश्रीकाः शोभमानाः॥२३॥ ततस्मोद्धतः नामेति प्रसिद्धा सा दमयंती का। तथा कश्चायं आश्चर्यभूतो मा
नुषभाषाभाषकत्वेन चेतः चमत्कारकारी विहंगपक्षी॥ तथा काचेयं राजन्नित्यादिरूपा नभोभारती व्योमवाणी। एतत्स
र्वं विस्तरेण प्रपंचेन वेदितव्यं ज्ञातव्यं इति अवधारयन् विचारयन् एकस्यां उत्फुल्लां विहसिताः पल्लविताः किसलयितायां
लतावीरुधस्तासां आधारभूतायां मंडप आश्रयविशेषस्तस्य छायां उन्निद्राणि विकसितानि यानि कुसुमानि तेषां ये मक
रंदशीकराः कुसुमजकणास्तेषां य आहसारो वेगवद्वर्षस्तेन निशिशिरं शीतलं यत्तत् तस्मिन् शिलातले निषद्य उपविश्य तं ह
ंसं अवादीत्। उचिवान॥ किमवादीदित्याह॥ हे भद्र कल्याणिन् इदं सतां साधूनां लक्षणं किं तत् सप्तपदानि गम्यंते उच्यंते
वा यत्र सख्यं तत्साप्तपदीनं सख्यं मैत्र्यं॥ तथा उत्पन्नाः संजाताः कतिपये कियन्मात्राः प्रियालापा मधुरवागुच्चारा य
स्याः ईदृशी तासां प्रीतिः प्रेम स्तोकैरेव वागुल्लापैः सतां प्रीतिरुत्पद्यत इत्यर्थः॥ तथा सतां दाक्षिण्यं अनुकूलता प्रयोजनं
कार्यं तन्निरपेक्ष्यं तदधीनं अन्येषां हि प्रयोजनसापेक्षं आनुकूल्यं सतां च प्रयोजनाभावेपि। तथा सतां वात्सल्यं वत्सल स्नेह
वत्वं न कारणेन प्रगुणसज्जं अन्येषां वात्सल्यं कारणेन प्रगुणं भवति। सतां तु कारणं विनापि वात्सल्यं प्रगुणं तथा सतां मैत्र्याः
प्रीतिर्भावोभिप्रायः मैत्रीभावः न निमित्तेन सुंदरः अन्येषां हि निमित्तप्रयोजनेन सति मैत्रीभावो भवति सतां तु निमित्ताभाव
पि॥ अस्ति च ततः सर्वसतां लक्षणं भवन्मूर्तौ त्वच्छरीरे अंतःकरणात्। त्वं निःशंकेन शंकाभावेन मया अभिधीयसे कथ्यसे
यः मल्लक्षयलक्षितो न भवति तस्य पुरः कथनेन त्स्यात् किमुत्वं कथय कयं दमयंती कस्य नृपस्य सुता कीदृक् रूपं आकारः
सौंदर्यं वा॥ रूपं तु श्लोक शब्दयोः पशावाकारे सौंदर्ये नाणके नाटकादिके ग्रंथावृत्तौ स्वभावे चेत्यनेकार्थः। तथा कुत्र देशसन्नि
वेशादौ सा वसति। कश्च भवान् त्वं अस्माकं उपकर्तुं उपकारं विधातुं इच्छति। का चेयं दिव्या वाणीति एवं नलेन उक्तः कथितः सन् हं
सः कथयितुं वक्तुमारेभे॥ कथयामास शृंगारेति॥ हे देव शृंगाररसस्य शृंगाररूपजलस्य भृंगार इव कनकालुके वयः सन्धंगोत्तर

सस्य श्रृंगाररूपजलस्य श्रृंगारइवकनकालुकेवयः सश्रृंगाररसेनपूरितइत्यर्थः तत्संबुद्धौहेश्रृंगाररस श्रृंगारेनलतस्याः
सौंदर्यणवीरुदिवयासासौकुमार्यात। सौंदर्यवीरुत्तस्याः सौंदर्यवीरुडोदमयंत्यावार्त्तयाविस्मयत्त्राश्चर्यंवार्त्ताविस्मयः
सएवपल्लववार्त्ताविस्मयपल्लवः। सकर्णेआरोप्यतां श्रोत्रंनिधीयतांतद्वार्त्ताश्रूयतामित्यर्थः। श्रृंगाररसेनसिच्यमानाः सौं
दर्यवीरुदुद्दैत श्रृंगारापिकर्णकृतेनाहितेनपल्लवेनशोभतेइत्यभयसमागमोचित्योक्तिः श्लोकः॥२४॥ अथसप्रपंचदेशव
र्णनपुरस्सरंदमयंतीस्वरूपमाह॥ अस्तीतिगद्यं। विंध्याद्रिणाविंध्याचलेनमुद्रितालांछितायामातस्यां अर्थाद्दक्षिणस्यांदि
शिदेशामामुत्तरामुख्योदक्षिणादेशोस्तिवर्त्तते। अपिविरोधेयउत्तरउत्तरदिग्देशवर्त्तीसकथंदक्षिणदेशवर्त्तीस्यात्॥ उत्त
रशब्दस्यदिग्देशार्थत्वात्॥ किंभूतोदेशः विस्तीर्णपृथुयन्मेदिनीमंडलंभूतलंतस्यमंडनमिवअलंकारइवाचरत॥ यःस
तेनकृत्वाभूतलंशोभनइत्यर्थः॥ तथानगाश्चपर्वताः नगराणिचपुराणिचविहाराश्चचैत्यानिआरामाश्चकृत्रिमवनानितैः
रमणीयोरम्यः नगरपूरश्चयोगुरुलघुत्वकृतोविशेषः॥ यद्वापुराणिगृहाः यदनेकार्थः॥ पुरंशरीरेनगरेगृहपाटलिपुत्रयोरि
ति॥ तथासीतासहीयोजानकीसहितसंचरितः प्रवृत्तोयोरघुपतिःदाशरथिस्तस्यपादपद्मेनचरणांबुजेनपवित्रंशुचि
अरण्यंयस्यसःतथाविधः। तथापुण्यतराः अतिशयेनपवित्रास्तंरगावीचयोयस्यासाइदृशीयागंगाचगोदावरीचतयो
र्यद्वारिजलंतेनवारितोनिवर्त्तितोदुरितमेवपापमेवदावानलप्रसरोयस्मिनसजलेनहिदावाग्नेःशमनमुचितंतत्सरित्तोःस्ना
नेनतत्रस्थजनानांपापतापापगमात्॥ तथाबलिनाबलवताराज्ञाभीमलक्षणेनजनितंपरिसमंतात्वर्त्तनंपरिपालनंय
स्यसकइवमंदरइवमेरुरिव॥ सचकिंभूतः बलिराज्ञादैत्येनजनितंपरिवर्त्तनंभ्रमणंयस्यसः॥ पुनःकिंभूतः महानईश्वरः
समृद्धोयोलोकस्तेनकृतावसतिर्निवासोयस्मिन्सः समृद्धलोकैःभृतइत्यर्थः॥ कइवकैलासइवरजताद्रिरिव। सचकीदृशः
महेश्वरस्तस्यलोकेनपरिजनेनकृतावसतिर्यस्मिन्सः तथासद्वर्णाद्विजातयः प्रकृतयोअमात्यास्तैःकमनीयः राम
सुंदरः कइवमेरुरिवसचकीदृशः सुवर्णप्रकृत्यास्वर्णस्वभावेनरम्यः॥ तथादृष्टःशूर पुरुषाणांविक्रमशालिनराणां ५३

अवतारोजन्मयस्मिन्सः तथाविधः कइवयदुवंशइव। सचकीदृशः बुधेनग्रहविशेषेणप्रधानस्तस्यतत्पुत्रत्वात्॥ तथा
दृष्टःशूरपुरुषस्यवसुदेवपितुरवतारोयस्मिन्सः तथाबुधैःपंडितैःप्रधानःकइवसोमान्वयइव। सोमवंशइव। सचकिंभूतः बुधेनग्रह
विशेषेणप्रधानःतस्यतत्पुत्रत्वात्। तथासदेशःअनेकैः बहुभिर्वनैःकाननैरुपेतःसहितःकइववटपादपइव। सचकीदृक् अनेकैःसवनैर्यज्ञैरु
पेतःतद्यंतेषांप्रकरणात्। तथायोदेशःपर्वतेरुद्राणुभिःकालैः॥ तथापुरेपुरेपुराणपुरुषैःवृद्धनरैः। जलेजलेकमलोद्भवैःकमलोत्पत्ति
भिः तथापदेपदेस्थानेस्थानेदेवकुलैःदेवगृहैः॥ तथावनेवनेवरुणैःवृक्षैः जलैर्वा॥ तथास्थानेनंदयतिआनंदयतीतिनंदनानितैःउ
द्यानैर्वनैः॥ कुलास्वर्गस्वदिवाअर्गलाःधिकः। अत्रस्थाण्वादयोबहुत्वविशिष्टाःस्वर्गेहिएकएवस्थाण्वादिः। तथाहि॥ एकएवस्थाणुरादि
॥ तथाहि॥ एकएवस्थाणुरीश्वरः॥ एकएवपुराणपुरुषोविष्णुः एकएवकमलोद्भवोब्रह्मा। एकमेवदेवानांकुलंवृंदं। एकएववरुणःप्रचेताः
सत्यांवा। एकएवनंदनमुद्यानं इंद्रवनं॥ अतःस्वर्गाभ्यधिकदेशइति॥ तथातापीनदीप्रायेणबाहुल्येनयत्रसंतापीप्रायस्तथानतापयस्त
वश्यमिति। अअतापीजनस्यअपिविरोधे। सचतुल्यार्थव्यास्थेयः तथाहि॥ यस्तापीप्रायोभवतिबाहुल्येनजनस्यतापकृत्सःअता
पीकथंस्यात्। परिहारस्तुकृतएव॥ तथायत्रदेशेईदृशाःशोकःशोकरहितालोकानिरंतरंवसंति। कीदृशालोकाः शास्त्रेव्याकरणादौचा
स्त्रेधनुर्वेदादौतथावेदसामादौवेधेच। आयुर्वेदादौतथाभरतेसंगितशास्त्रे॥ तथाभारतेचमहाभारतादौ। तथाकल्येयज्ञकर्मणा
मुपदेशकशास्त्रे। तथाशिल्पेचवास्तुकादिशास्त्रेप्रकर्षेणनंधारणंयस्यसप्रधानः। शास्त्रशस्त्रादीनिप्रकर्षेणधारयतीत्यर्थः॥ ए
वंसकलस्यचलिंगतामुख्यार्थस्यहिप्रधानशब्दस्यआविष्टनपुंसकलिंगत्वात्॥ तथा धनीधनवान्। तथाधन्यःपुण्यवान्। तथा
धान्यवानसस्यबहुलः॥ तथावाचिवाण्यांविदग्धःचतुरः। तथामुखमुखारम्यः॥ परमर्मातुद्घाटनोत्॥ अदनकार्थः॥ मुग्धाःमृदु
रम्या। तथामनसिस्निग्धःस्नेहलः॥ तथायत्रदेशेकुद्धः कुपितायाधूर्जटिःशंभुस्तस्ययोललाटलोचनानलस्तस्यज्वालाभिःयत्के
वलंभक्षणंतेनआकुलाःमकरकेतनःकामोविलासिनीनांस्त्रीणांअंगेषुकुचादिष्ववयवेषुस्वोपकरणानिश्रृंगारादीनिनिधायरक्षा
पयित्वाआत्मानभयात्किंकुचस्थानोनिलीनः किंकिंकुत्रकुत्रनिधायेत्याह॥ उच्चकुंभयोःउन्नतपयोधरकिसलयोःश्रृंगारसर्वस्वं

215/1933

चं॰ वृ॰ ५४

शृंगाररूपं सर्वं धनं निधाय। तथा अधरपल्लवेषु आम्रपल्लवेषु मकरंदं पुष्परसं च। निधाय। तथा भ्रूभंगेषु भ्रूविलासेषु
धनुश्चापं निधाय तदाकृतित्वात्तेषां। तथा कटाक्षेषु अर्द्धवीक्षणेषु पुष्पबाणान् निधाय किंभूतस्तासां जघनस्थलेस्थापिता
तिः स्मरकांतारूपं तं च येन सः। ननु किमिति शंभुभयात् तत्रैव निलीन इत्याह॥ किंभूतानां तासां अपांगेन नेत्रप्रांतेन यद
वलोकनं वीक्षणं तन्मात्रेण तेन वृनिर्जितं परमेश्वरगणां धनवतां मनोरथकाभिलाषा तासां। अथ च परमेश्वरो धूर्जटिः सो
पि ताभिर्निर्जितः इत्यक्लिशः एतेन शरणागतत्राणवैभवं कामस्य जनाशंभुः। शंभो अश्वतात्तेभ्यस्तासां सविधे गच्छन् कामो
निर्भयो भवत्येव जेतृजत्वात् तासां॥ तेन तद्देशे कामाधिक्यं दर्शितं॥ तथा यासां स्त्रीणां तारुण्यं यौवनमेव सर्वांगेषु सर्वा
वयवेषु शोभार्थमाभरणं मंडनं तथा यासां उत्तुंगमुन्नतं यत्स्तनमंडनं पयोधरयुगलं तस्य यत् लावण्यं तदेव मुखकमल
स्य यदवलोकनं वीक्षणं तस्मै दर्पणमादर्शः॥ तथा यासां तारतरातिशयेन उज्ज्वलया नयनकांत्यैव मुखमंडलमंडनाय
चंदनस्य श्रीखंडस्य ललाटिका ललाटभूषणं॥ तथा यासां भ्रूभंगा एव विभ्रमाय विभ्रमाय विलासाय। मृगमदस्य कस्तू
रिकायाः पत्रभंगाः पत्रलताः। तथा यासां कटाक्षा एव अक्षिविकूणितानि जनजयाय युवजनवशीकरणाय परमास्त्राणि प्र
कृष्टशस्त्राणि॥ तथा यासां बंधुककुसुमवदरुणा कांतिर्यस्य ईदृशो यो दंतच्छद ओष्ठः स एव लोकानां युवजनानां लोचनं
च मनश्च तयोर्मोहनाय वशीकरणाय मोहनमणिः मोहनमिंद्रजालं तत्र बलेन अविद्यमानवस्तुप्रकाशनमिति यावत् त
दर्थं मणिः मोहनमणिः। तथा इंद्रजालिका लोकस्य लोचनमोहनाय मोहनमणिं प्रकटयंति॥ तथैतासां ७ दंतच्छद एव
जननयनमनोमोदकृत्। तथा यासां मुखकमलस्य यः परिमल आमोदस्तेन आगताय मधुकरास्तेषां झंकार एव विनोदकृत्
नवीणाध्वनेः प्रयोजनमिति भावः॥ किं बहुनाकिं बहूक्तेन॥ ताएवेति अनुष्टुप्॥ अहमेवं मन्ये संभावयामि ता एव दक्षिण
देशीया मृगेक्षणा नितंबिन्यः शर्मणः स्थानं। पक्षनिष्ठत्रिरवसुभिरवस्थानं॥ कथं येन प्रकारेण तासामेव मृगेक्षणानामेव स्त राम
नांतरं स्तनमध्यं मुक्तानां मौक्तिकानां आस्पदं आश्रयः पक्षे मुक्तानां मुक्तात्मनां आस्पदं निर्वृत्तिर्हि मुक्तानां स्थानं भवत्येवेति ५४

मन्ये इति भावनार्थे तिङंतप्रतिरूपकं अव्ययं॥ २५॥ मन्ये चेति॥ चो विशेषे। अहं मन्ये विशेषेण ताभिरेव भगवान्। कुंभोद्भ
वोपि अगस्तिमुनिः अपि प्रलोभितारंजितो भविष्यति॥ येनाद्यापि दक्षिणां दिशं न मुंचति किंभूताभिः विविधमनेकप्रकारं
वृथिवनुत्थानतमर्कटादिरूपं यन्निधुवनं कामकेलिस्तदेव निधानं तस्य कुंभीभिः कुंभीषु निधानस्य निक्षेपात् तद्वत्स्फुरता
स्पदं वर्त्तन इत्यर्थः॥ अथ वेति। पक्षांतरे देशादिति। असौ दक्षिणो देशः कस्य न वल्लभः न प्रियः किंभूतः स्त्रीभिः संकुलो व्याप्तः
पुनः किंभूतः कृतस्थिताश्च वस्थिता कामकोटिर्देवी। कंदर्पकोटिश्च यस्मिन् सः यस्मिन् देशे कुमारः कार्त्तिकेयो रतिमास्थां च
कारकिंस्तत् त्रिदिवं स्वर्गं विहाय त्यक्त्वा किंभूतं दग्धः एक एकसंख्यः कामो मन्मथो यस्मिन् तत् त्रिदिवे यः एकः कामः सोपि शं
भुना दाहि। अत्र कामानां कोटिरपि प्रस्थिता॥ अतस्तत्परित्यागः। अपि विरोधेय कुमारो डिंभः स कथं रतिं स्फुरतं कुरुते।
एतावता यद्देशे कामकोटिनाम्न्याः देव्याः कुमारस्य च आयतनमस्तीति ध्वनितं॥ तस्य दक्षिणदेशस्य अंतर्भूतं मध्यवर्त्तिय
द्विदर्भमंडलं॥ तस्य अलंकारभूतं मंडनोपमं। एवंविधविशेषणापन्नं तुंगतरंगेषु उच्चा वीचिषु रंगति शोभमानानि तरुणानिवा
नि अर्जुनानि धवलानि यानि राजीवानि तद्वद्राजमानाये गजहंसाः तैः विराजितं वारि यस्याः सा तस्या वरदा आस्तीरे कुंडिनं
नाम नगरं पुरं वर्त्तन इति शेषः॥ किंभूतं कुंडिनं। अनाकुलं॥ स्वपरचक्रादिभिरव्याकुलं। तथा अमरपतिपुरं। अमरावतीपुरं
स्पर्द्धते। संदृश्यति इति अमरपतिपुरस्पर्द्धि। तथा परितश्च नस्त्वपि दिक्षु परिखया खातिकया आक्रांत आलीढः प्रांता इव
मानं तत्र रूढानि उत्पन्नानि प्रौढानि गुरूणि हृद्यानि हृदयहारिणि॥ यान्युद्यानि वनानि तेषां या माला श्रेणिस्तया वलयित
वेष्टितं यस्य पुरस्य परित उद्यानमालाशोभित इत्यर्थः। तथा अदभ्राणि बहूनि अभ्राणि धवला नि अभ्रं लिहानि नभ आलि
खंति उच्चानि यानि प्रासादशिखराणि तेषां शिखराभोगेषु अग्रविस्तारेषु भग्नो रविरथतुरंगाणां वर्गो येषां यत्र तत् आसाद
नां अत्युच्चत्वेन अंतरापतितत्वात् तद्गभंगः। तथा एकत्र एकस्मिन् प्रदेशे आस्मेर अध्यासितं निषेवितं कैः द्विजैः ब्राह्मणैः
अग्निहोत्रस्य अग्निहोमस्य ये मंत्रास्तैः पवित्रा शुद्धा या। आहुतिर्होमं तत्र्यइव्याहवनं तया हतो ध्वस्तः समस्तानां दिव्यानां

217/1933

चं०रु० दिविभवानां व्यंतरादिरूनानां भार्यादीनां अंतरिक्षाणां चआकाशोत्पन्नानां अद्दष्व्यादीनां भौमानांच शुषिरभवानां वागादिक
५४ नानामुत्पातानां मुपद्रवाणां संघातः समूहो यैस्ते तथाविधैः आहूनिहतोपद्रवसंघैः तथाकृतामन्यवो यज्ञायैस्ते तथावि
धैः कृतक्रतुभिः तथामनुभ्रून्यैः कोपरहितैः अपिविरोधेयेकृतमन्यवः कृतकोपास्तेकथंमन्युभ्रून्याइति ।। तथाउक्ता
निसूक्तानिसुभाषितानि यैस्तैः ।। तथानिरुक्तंग्रंथविशेषः तत्रपरैः पठनादिनासावधानैः विरोधस्तुयेउक्तसूक्ताभवंति ।
तेकथंनिरुक्तंवचनाभावः तत्परा भवंति । किंतुवचनपराएभवंति ।। तथासन्मार्गः सदाचारः तस्मिन्लग्नाः प्रवृत्तास्तैः त
थागृहस्थैः गृहाश्रमरतैः विरोधस्त्वेवंयेसन्मार्गश्रेष्ठकर्मनिलग्नाभवंति मार्गविलग्नतीत्यर्थः तेकथंगृहेतिष्टंतीतिमुक्त
गृहाएव भवंतीत्यर्थः ।। तथासकलंसर्वंत्रायंतइतिसकलत्रास्तैः तथाब्रह्मवेदंचरंत्यवश्यंजानंतीतिब्रह्मचारिणः तैः ब्र
ह्मचारिभिरपिसकलत्रैरितिपावब्रह्मचारिभिः निषिद्धकामैः सकलत्रैरितिसएवार्थः विरोधेपियेसकलत्राः सस्त्रीकाः
भवंतितेकथंब्रह्मचारिणइति ।। तथाअभ्यस्ताज्यातिः शास्त्राध्ययनातिथिः प्रतिपदादियैस्तेतथाविधैस्तिथिरित्युप
लक्षणंनक्षत्रवारादीनां । तरिथाअभ्यस्ता थाअतीथीनांगतुनकुशांश्चदर्भान्लांति स्वीकुर्वंतिभोजनानिर्थंचयेतेअति
थिकुशलास्तैः विरोधेतुयेअभ्यस्ततिथयाभवंति तेकथंतिथिषुकुशलानभवंति ।। तथासामवेदस्यप्रयोगेपठनादिव्या
पारप्रधानानिमुख्यास्तैः दंडआज्ञाद्स्तंअवलंबते करेगृण्हंतीत्येवंशीलादंडावलंबिनः तैः विरोधेतुयेसामप्रयोगेसांत्व
व्यापारप्रधानानिभवंति । तेकथंदंडेदमनंतदवलंबिनाभवंति । तथासतपथोयजुर्वेदः तमनुचरंतिजानंतीतिसतपथा
नुचारिणः तैः तथाएकमार्गैः अद्जभिः । विरोधेतुयेज्ञातसंख्याः पंथानस्तेषुअनुचरंति ते एकमार्गाः कथंभवंति एको
मार्गोयेषांतइति ।। पुनरप्यकुत्रविपणिवणिग्जनद्रोणोमानविशेषः सपुरस्सरोअग्रेसरोयेषांते तथाविधैः कैरिव । कु
रुभिरिव । कुरुक्षत्रियैरिवतेश्च किंभूतैः द्रोणः कौरवगुरुः सपुरस्सरोयेषांतेतैः ।। तथातुलासूत्रादिमानंतांधारयंतो
तिकुलाधारिणैः । कैरिव । प्रासादैरिव । तेः किंभूतैः गृहादीनांतीर्यक्धारणः स्तंभस्तुलतांधारयंतीतितैः । तथाअनुमे राम
५५

219/1933

यंकुणादितस्यअनुमानंउद्देशज्ञानंतत्रनिपुणैश्चतुरैः । कैरिवनैयायिकैरिवयोगैरिव । तैः किंभूतैः यदनुमीयतेतदनुमेयंयेन
चअनुमीयतेतदनुमानंयथापर्वतोयंवह्निमान्धूमत्वात् आदित्यत्रधूमानुमानंवह्निरनुमेयः तयोनिर्पुणैः दक्षैः तथाद्रव्यस्वरू
पकादिरनुगुणसकलनात्कर्मविशेषपुपंडितावित्ज्ञास्तैः कैरिववैशेषिकैरिव । तैः किंभूतैः द्रव्यानुगताः द्रव्यसंबंभतायेगुणा
श्चकर्माणिचविशेषाश्चपदार्थास्तेषुपंडितास्तैः । तथारूपटंककरूपकादिनाणकंतस्यथासिद्धिः निष्पिष्यत्तिः तत्राप्रधानानितैः
कैरिवयाकरणैरिवव्याविकैरिवतैः किंभूतैः रूपाणिशब्दास्तेरामादयस्तेषांयासिद्धिः विभक्त्यादिसंघटनेननिष्पत्तिस्त
त्राप्रधानैः ।। रूपंतुनाणकंद्राविरयारित्यनेकार्थः । तथाअनेकेवहवोग्रंथिषुवद्धाः कंदर्पकावराटकायैस्तैस्तथाविधैः कैरिवरु
द्रमिवत्रांभुभिरिवतैः किंभूतैः । अनेकग्रंथिभिः बद्धः कपर्द्दकोजटाजूटोयैस्तैस्तथातैः तथाएकत्रप्रदेशेकर्णाटचेटीभिः कर्णाटदे
शदासीभिः भगिनंप्रविनं । किंभूताभिः कुत्रया रूपणसौंदर्येणलोभितामाभिलाषत्वमापादितालोकायाभिस्ताः तथाविधाभिः
। काभिरिवविटाः स्विद्गायकोलास्तेषांयादंभदिक्षाः कपटदीक्षाः ताभिरिवपल्लवकुशादंभदीक्षाभिरिव । किंभूताभिस्ताभिः
कुत्सितेनचकरुणामांसपाकादिनाउपलोभितालोकायाभिस्तास्तथाताभिः । तथाभद्रंयतिगणस्यमुनिवृंदस्यवृत्तंशीलंयाभिस्ताः
। तथाविधाभिः । काभिस्विकुकवेः कुत्सितकाव्यकर्तृयाः काव्यपद्धतयः काव्यपंक्तयः ताभिरिवपद्धतिमार्गपंक्तयोश्चनेकार्थः ।। किं
भूताभिस्ताभिः यथावदन्यागातभग्नाअपास्तायतयोविरतयोगणाश्चभगणादयोयेषुईदृशानिवृत्तानिपद्यानियाभिस्तास्तथावि
धास्ताभिः ।। तथारजनीदरिद्रतस्यागरावर्णातरागोपाविद्यतेयासांताः तथाविधाभिः कर्णाटदिहमिंडश्चांगरागः काभिरिवनिशा
चरीभिरिव । राक्षसीभिरिव । ताभिः किंभूताभिः रजनीरात्रिस्तस्यांरागआसक्तिविद्यतेयासांताः तथाताभिः । तथासर्वतः सर्वस्मि
नपिकालेमुखजघनेच चपलाश्चंचलास्ताभिः । तथाआर्य्याः साध्व्यानआर्याअनार्यास्ताभिः अपिविरोधोयामुखचपलाज
घनचपलाश्चभवंतीताः ।। कथंआर्याः मात्राछंदोभेदः नआर्याअनार्याभवंति । तथानकिंतुआर्याएवभवंति । तथाएकत्रप्रदे
शेकुलालैः कुंभकारैराकीर्णंव्याप्तंकमिववालकमिवतं किंभूतंकुत्सितलालयाआकीर्णं । तथाएकत्रकुंजैस्तरुभिः राजितंकमिव

शक्तमिवकिंभूतंतंकुलितजरयाश्रितंआयत्तीकृतंजरयाव्याप्तमित्यर्थः॥तथाएकत्रप्रदेशेईदृश्याभवनमालयागृहपंक्त्याअलंकृतं
मंडितंकिंभूतया॥प्रवर्द्धमानैःप्रतिदिनंवयस्त्वादिभिःअधिकीभवद्भिःसकलैःकलावद्भिःशिशुभिःभीमैःशोभितातयातथावि
न्यस्ताररचिताःस्वस्तिकामाक्तिकादिक्षोदान्विताश्चतुष्कायस्यांसातया॥तथासर्वतःसर्वस्मिन्प्रदेशेभद्राणिसुंदराणिवास्तुशा
स्त्रख्यातानिभूषणानियस्यांसातयाअथवास्वस्तिकवर्द्धमानौगृहावयवविशेषौ।कायवचित्रविद्यायवतयाकिंभूतया।प्ररूढ
वर्द्धमानसकलशिशुशोभितया।तथाविन्यस्तःस्वस्तिकोयस्यांसातया।तथासर्वतोभद्रंभूषणंयस्याःसातथा।एतावताशिशुःस
कलःस्वस्तिकोवर्द्धमानःसर्वतोभद्रइत्याख्यानिपंचपत्राणि।भवंति।तानिचित्रकरविद्यायांप्रसिद्धानि।तथाएकत्रप्रदेशेईदृशंदे
वगृहंसंकुलंकिंभूतंदेवकुलैःपताकाध्वजनामः।सर्वांकश्चिन्हंयेषांतानि॥तथासंधिपुभित्त्यादिश्लेषेषुसंगतानिमिलितानि
अविभाव्यसंधीनीत्यर्थः।पश्चात्कर्मधारयस्तैःकैश्चनाटकैःरचितैःकिंभूतैःमुख्यनायकोपरिउपनायकचरितंपताका॥तथाअं
कःप्रबंधविभागः॥तथामुखप्रतिमुखगर्भअवमर्शनिर्वहणाख्याःपंचसंधयस्तैःसंगतैःसंबद्धैः।पुनःकिंभूतैर्देवकुलैःदृष्टंकट
स्यशिखरस्यकर्मघटनोल्लक्षणंयेषुतानि॥तथातैःकैश्चिद्दुष्टाःयेकिराटाःसिंधुप्रदेशप्रसिद्धावणिक्जनास्तैरचितैः।किंभूतैः
दृष्टंकूटंकपटंयेषुनादृशानिकर्माणिक्रयविक्रयादीनियेषांते।तथातैःकिरोलश्चावतिकिरतेःकिराटःप्रत्ययःकिराटःभक्ष्यवि
शेषःवणिक्मल्लपश्चेत्यणादिवृत्तौ।तथालंबालंपविशेषाभयंतिप्राप्नुवंतियानितानितथातैःस्वप्नयालिप्तैरित्यर्थः॥कैरिवच्चा
स्त्ररिवायुधैरिवतैःकिंभूतैःशोभनाधारा:अग्रभागायेषांतानि।तथातैः।तथाविचित्रैःअनेकप्रकारैः॥तथासचित्रवालेख्यसहि
तैःअपिविरोधेयानिविगतचित्राणिभवंति॥तानिचित्रसहितानिकथंस्युरिति॥तथानविद्यतेतुलासाम्यंयेषांतानितथातैः
अनुपमैरित्यर्थः॥तथासदतुल्यया:धारणस्तंभनवर्त्तनेइति।सतुल्यानितैःविरोधस्तुयानितुलयारहितानिभवंति॥तानिकथंतु
लयासहितानीति।तथाविशालंविस्तीर्णंतथाशालाभिर्गृहैःसंपन्नंसहितं।अपिविरोधे।यद्विशालंशालारहितंभवतितत्क
थंशालासंपन्नंस्यात्॥तथाचत्वारश्चरणाऋग्वेदादयस्तैः।संयुक्तं।तत्स्वाध्यायैरधिष्ठितत्वात्।तथारणेनयुद्धेनरहितं।अपि

221/1933

चेतिविरोधे।यश्चतुर्भिश्चरणैःपादैःसंयुक्तंस्यात्तत्कथंचरणैःरहितंभवेत्॥तथावह्निवंशैःमनुष्यैर्वाभृतंपूरितंतथाशुचिमार्गे
पवित्रपथंविरोधेतु।यद्वह्निर्विह्वाभिभृतंभवतितत्कथंशुचिमार्गस्यात्।तथासर्वस्मिन्अपिभूभागेचत्वारःरंगणश्चतुः
पथैर्वाअधिष्ठितंआश्रितं।चत्वरंस्यात्स्थंडिलेपि।स्थंडिलांगणमारपीत्यनेकार्थः॥तथास्थिरानिश्चलाःप्रकृतयोअमात्या
दयोयस्मिन्तत्तथाविधंविरोधेतुचकारस्यसमुच्चयार्थत्वात्पूर्वपदेनयोगस्तदासर्वत्रचेतिभिन्नंयत्त्वराधिष्ठितंवेगाश्रित
भवति।तत्कथंस्थिरभावंस्यात्।किंभूतायाःवरदायाःमजंत्यःस्नानंकुर्वंत्यःयामहाराष्ट्रकुटुंबिन्योमहाराष्ट्रदेशीयपुरंध्र्यः
तासांमुखमंडलैर्वक्त्रांभोजैर्विधीयमाना:क्रियमाणाउत्फुल्लकमलखंडस्यविकसिताब्जवनस्यशोभायस्यांसातस्याःमन्येत
सांमुखान्यब्जानिभवंतिकिंत्वतत्प्रफुल्लकमलवनमिति॥वस्तुतःसौरितिकमलानुसक्तिरतस्तत्रतदारोपः।तथायस्यकुं
डिनपुरस्य।नातिदूरेसमीपपयो।ष्णीनाम्नीनदीवहतिकिंभूतादर्शनेनैवदूरीकृतोनिराकृतोदुरितोपप्लवः।पापोपद्रवो।यया
साअतएवकिंकुर्वाती।आप्लवनेन।स्नानेनजनितःपातकभंगोयस्यासातथाविधांगंगांसुरसरितं।उपहसंतीतिरस्कुर्वंती॥
गंगाहिस्नानात्पुण्यहेतुः॥पयोष्णीतुदर्शनादपीत्यस्यविशेषः॥पुनःकिंभूता।स्वर्गमार्गस्यआश्रयणेआरोहणेनिःश्रेणीव
अधिरोहिणीव।यामाश्रयनिश्रेण्याप्रासादादेरुपर्य्यधिरुह्यते॥तयानयास्वर्गेगम्यतइत्यर्थः॥तथापुण्यंपवित्रंपयःपानी
यंयस्याःसापुण्यपया।तथायस्यकुंडिनपुरस्यपश्चिमप्रदेशेपश्चिमभूभागेभगवतोभार्गवस्यशुक्रस्यआश्रमोवर्त्तते।इतिशे
षः।किंभूतस्यभार्गवस्य।प्रणताःपादयोःपतिताःयेसुराश्चअसुराश्चतेषांयेमौलयःकिरीटानितत्रयेनीलमणयःइंद्रनीलाद
यस्तेषांयेमरीचयःकिरणाःतएवचंचरिकचक्रंभ्रमरवृंदंतेनचुंबितंआलीढंचरणांभोजंयस्यसःतस्यसुरासुराअपियस्यसदाप्रसंप्र
णताइत्यर्थः॥पुनःकिंभूतस्यभोजकटकूपेतिअधिष्ठाननामतत्रजन्मास्येति॥तथाचश्रुतिः॥शुक्रोभोजकटःभवत्कूपादिप्रसि
ध्यादिअधिष्ठाननामानिदृश्यंते॥तथाचमरुदेशेशिवरूपःकिराटकूपःजांगलकूपःइत्याद्यधिष्ठानानितथाराजयापातितःशप्तो
ययातिर्नृपतिर्येनसतस्य॥वृषपर्वदैत्यसुतांशर्मिष्ठांशुक्रसुतांदेवयानींचययातिर्नृपतिःउपयेमे।ततोसौशर्मिष्ठाप्रीत्यादेवया

चं॰२॰
५७

नीमवज्ञानेन नवांगेनरापतत्विति शुक्रेणशप्तः॥तथाप्रचंडयादाडिक्यदंडनोदांडिक्यनृपतेः शाज्ञानानस्थेआडंबरिताः पा
तिताः यगंडपाषाणाःपर्वतच्युतस्थलदृषदस्तैविदलितंविध्वस्तंवैदर्भमंडलंयेनसतस्य।दांडिक्योनामभोजकुटदेशाधिपः
शुक्रसुतामरजःसंज्ञां॥स्वेध्यावसरःप्रसभाद्दृप्येमततःक्षत्रियःकिलदर्गाद्विजकन्यांपरिणीतवानइतिपरिभूतंमन्येन
शुक्रेणमन्युनापातितगंडशैलवर्षिणा सवैदर्भमंडलोहतःतदाप्रभृतिदंडकारण्यमितिख्यातं॥यत्रचेति॥यत्रचकुंडि
नपुरेविपदस्थायंतइतिपवित्राःसाधवःसंतोवर्त्तंतेनतरवोविपत्राःविपर्णाः।तथायत्रविज्ञंभमाणानिविकसंतिकम
लानियपुनानिईदृकशरांसिवर्त्तंते।नजनमनांसिलोकचित्तानि।कुत्सितोविज्ञंभमाणःप्रसरन्मलःपापंयेष्विति ईदृशि
वर्त्तंत निर्मलानीत्यर्थः॥यद्विश्वःमलकिट्टपुरीषंच।पापेनकृपणमलःकुत्सितेक॥तथायत्रपुरेकुवलयान्येवसरोजान्येव
अलंकारमंडनंयासांताईदृश्यःकमलदीर्घिकाःसरोजवाप्यःसंति।नसीमंतिन्यःकुत्सितवलयालंकाराःकिंतुसौवर्णकं
कणभूषितकराःसंति।तथायत्रपुरेवीथ्नांपक्षिणांपदश्वरणैराक्रांतानिअंकितानिसरित्कूलानिनदीतटानिसंतिनकुलानि
अन्वयाःनिपदाविपत्त्याआक्रांतानिव्याप्तानिसंतिनिरापदीत्यर्थः॥किंबहुनाकिंबहूक्तेन।देशानामिति॥अनुष्टुप॥देश
नामध्येदक्षिणोदेशःप्रधानमितिगम्यते।तत्रदेशेवैदर्भमंडलंप्रधानं।तत्रापिवैदर्भमंडलेपिवरदातिरस्यमंडनंभूषणंकुंडिनं
सत्यश्चिरकालं चिरं निर्वांतु नाम। तिष्ठंतु अमृतप्रपामंडपेहि ग्रीष्मोपतप्ता अंजलिभ्यामृतं पीत्वा निर्वांति तथेमा अनंगतापतप्ता
श्रवणाञ्जलिभिः नलकथामृतं पीत्वा सुखिन्यो भवंत्वित्यर्थः। इत्थं परिहासशीलया उक्तः सोऽपि हंसः इत्यभाषत उवाच इतीति किं हे सुंदरि
तस्य मम मत्स्त्रोत्रोमिः हृदयमेव प्रासादो देवगृहं तत्र प्रतिष्ठापिता निहिता प्रतिमा प्रतिबिंबं यस्य तस्य सर्वासामपि स्त्रीणां हृदये संक्रांत
स्येत्यर्थः। नलस्य अन्यदपरं किं स्तूयते। किं श्लाघ्यते। तथाहि यत्र नले श्रूयमाणे वेणुश्च तंत्रः वीणा च वस्तुतस्तयोः क्वणशब्दो न मधु
रिमरवकारी। यदस्य प्रतिध्वानः श्रूयते तदा वेणुवीणारवो न मृष्टो लपन इत्यर्थः तथा यस्मिन् नले दृष्टे कामो नाभिरामः न सुंदरः नस्य तनो
र्यस्य कदर्पवस्तान तथा यस्मिन् नले संभाषिते वदति सरस्वती भारती न सारा न प्रधाना सरस्वती भाषितादपि तद्भाषितमत्युदारमित्यर्थः
तथा यस्मिन् नले परिचिते परिशीलिते अमृतं न श्लाघ्यं तत्सौख्ययस्त्वमृतादप्यधिक इत्यर्थः॥ तथा यस्मिन् नले आश्रयस्ते सन्निहिते इंदु
श्चंद्रोन आनंदिन आनंदजननशीलः तत्संनिधानं तु चंद्रादपि अधिकानंदजनकमित्यर्थः। तथा यस्मिन् नले प्रसादिते अनुगृहीते धनदः
कुबेरो न प्रसादास्पदं न श्रयंस्य धनदप्रसादादपि तत्प्रसादोऽधिकफलप्रदानत्यर्थः॥ किं बहुना किं बहुक्तेन भवतीति। हे कमलमुखी पद्मवदने
यदि वाक्सिवाण्यांपटूनि समर्था मि वाक्यदूनितपां वाक्पटूयं कंचन सुगंभ्यानां मुखानां सहस्रं भवति॥ अपि च निरूपमं अत्यद्भुतं अवधानं तद्गुणव
र्णने चित्तैकाग्र्यं यदि भवति। अपि च दीर्घं चिरं जीवितं प्राणधारणं यदि भवति। तथापि तस्य क्ष्मापतेः नलस्य सकलगुणानां विचारो विमर्शः कर्तुं
वा शक्यते न वाक्ये न वेति॥ एतावतामुना नामावं त्वं दर्शितं॥१॥ अपि च पुनः॥ संसारेति॥ हे दमयंती संसारवृत्तिर्भौ नदे तन् स्त्रीपुंसां वैव

323/1933

चं० कां० १०८

रत्नद्वयं अजनि जातं स्त्रीपुंसेति अचतुरेत्यादिना अजंत्यो निपात्यते। अध्यावेवरत्नोत्पादात्॥ किं तद्वयमित्याह॥ नारीणां मध्ये भवतीरत्नं॥ नृणां मध्ये पुनरसौ सौभाग्यस्य सर्वजनवाल्लभ्यस्य सीमा मर्यादा यत्र स सौभाग्यसीमा अतो धिकं सौभाग्यं न कस्याप्यस्ती त्यर्थः ईदृशानुजारत्नं फलितमाह कुरंग शावनयनवत् मृगार्भकनेत्रवत्तरलं चंचलं नयनं यस्याः सा तस्याः संबोधने हे कुरंग शावनय ने शाकपार्थिवादित्वान्मध्यमपदलोपी समासः। सा त्वं दमयंती तस्य पृथ्वीपतेः नलस्य योग्या सी॥ भवत्याएतावत्पूर्वकं कथितं अ स्मात् पूर्वं कथिता न अन्यत्तु अपरमुत्तरं किं न किं वदसीत्यर्थः भवता योग एव श्रेयान् इति भावः। अथ वयं यामः ते तुभ्यं स्वस्ति क ल्याणमस्तु॥२॥ अन्यत्र इति इदं वंद्रमुखी मृगाक्षि वदने अन्यदपरं च। ईदृशं व्याकरण शब्दशास्त्रं विचार्यमाणे अपशब्दाः साधुत्वादः तस्य संबंधः सम्यक् बंधो रचना सन भवति साधुशब्दप्रयोगो भवतीत्यर्थः। ईदृशं च दूत प्रेष्यमाणे मुच्यमाने अपवादः अपवादस्तस्य संबंधः संश्ले ष सम्यक् बंधा रचना सन भवति। साधुशब्द प्रयोगो भवतीत्यर्थः॥ ईदृशं च दूतप्रेष्यमाणे मुच्यमा सन भवति अपवादेन भवतीत्यर्थः किं भू ते व्याकरणे। महान्नाम यस्मिन् तत् तस्मिन् नाम प्रातिपदिकं। तद्विषयं प्रकरणमपि नाम इत्युच्यते सति महदिति तद्विशेषणस्य सफलत्वं नाममात्रस्य नुमहत्त्वं नत्वं तद्द्योतनाभावात्। तथा कृत संधि वर्णसंश्लेषः कृत्वं कृत्प्रत्ययो यत्र तत् कृत्संधि कृत् तस्मिन् कृतसंधि कृतितथा समास समासः न सुरूपाद्विरास्व्यातं क्रियातिद्धिवाः आदिर्यत्र तत् तस्मिन्। स समास्व्यात तद्धिते। तथा स वर्तमानं कारकमपादानादि यस्मिन् तत् तस्मिन् कारके न थापिभाषान्याय समाज्ञितया कुशले भद्रे। तथा बलाबलं पूर्वं परविधानां बाध किं वाक्यस्य विचारो विमर्शो विद्यते यस्मिन् तत् तस्मिन् बला बलविचारिणि॥ इतपक्षे महत्नामाभिधानं यस्य स महान्नामा तस्मिन्। तथा कृतसुसंधि संबंधं पणबंधं करोतीति। कृतसंधिकृत् तस्मिन्। कृतसंधि कृति॥ तथा कृतसमासेन संक्षेपेण आख्यातं कथितं। तस्मिन् नलायहितं येन मतं तस्मिन्॥ तथा सत्कारके सत्क्रियाजनके। तथा परितो भाषाः संस्कृ त प्राकृतद्याः कर्णाटादिदेशभाषा यातासु कुशले दक्षे तथा बलाबलेशजयशालौ तयोर्विचारो विद्यते यस्यासौ एतस्य त्रि किंरस्तीए तस्य नास्ती त्यवं विमर्शके॥ तत्र स्मात्तता: तस्य नलस्य अंतिकं समीपं तथा विधः पूर्वोक्तिस्वरूपोद्गतः प्रेष्यतां मुच्यतां ननु यद्यहं दूतं प्रेषयिष्यामि त दास्वच्छंदचारिणी यामिति किं वदंति भविष्यति। इत्याशंक्याह॥ नचेति॥ एवं विधं छंदसि पर्यालोच्यमाने विचार्यमाणे। स्वलं पदं तस्य भंगो न भवति छंदो जाति परिरक्षणात्। तस्मिन् निषधेश्वरे नले वहत दूत सार्थ्यमाने अभिलष्यमाणे च जस्य शीलस्य भंगो न भवति किं भू राम १०८

325/1953

ते छंदसि। बृहती जगती शब्दो छंदो जातिवचनौ। तृतीयां तास्यात पदेन प्रसिद्धार्थेनयो ज्यौ। बृहत्यां जाते प्रसिद्धे। तथा जगत्यां ख्या ते प्रतीते। तथा संगतैः पदैरन्विते॥ अथ च पदे सिकृथं भूते पदान्विते कथं यथा भवति बृहत्यासं। बृहत्यां जातो असौ १ स्वस्थानं यस्ये ति पदान्वितक्रियाविशेषणं यद्वा बृहत्या जात्या हेतु भूतया या सो संपत् शोभा तयान्विते। तथा गुरवो द्विमात्राव क्राकृतयः सत्कृते गुरूणां गणा यस्मिन् सन्मथा विधौ। तथा तु शार्दूलविक्रीडितं नाम छंदस्तस्य आडंबरो गौरवं। यत्र तत् तस्मिन्। तथा पुण्यः श्लोकः पद्यं यस्मिन् स तथा किं इह यद्यपि श्लोको नुष्टुप्॥ छंदस्तत्र लोके प्रसिद्धस्तथापि केचित् सर्वमपि पद्यं श्लोकमाहुः। नलपक्षे किं भूते नले बृहत्या गुर्व्या संपदा श्रिया अन्विते। तथा जगति लोके आख्यातकीर्तितथा सत्कृतः सन्मानितो गुरूणां गौरवार्हाणां आचार्या णां गणो वृंदं येन स तस्मिन्॥ तथा शार्दूलविक्रीडितं सिंहविलसितं नद्द्राडंबर आटोपो विद्यते यस्य स तस्मिन्। तथा पुण्यः पवित्रः श्लोको यशो यस्य स तस्मिन्। इति पूर्वोक्तिमभिधायोक्त्वा गंतुं यातुमुद्यतवत्। प्रावर्तत। उच्चलितं च तं हंसं परिहासशीला स्वरवीपु नर्वभाषे हे मरालु ॥ हंस। यथेयं दमयंती अनुरागाय प्रेम बंधाय कुंदला इत्यत्र रोहाइव। नत्तनकत्वात्। येन तथा विधे रालापैः त्वया उक्ता तथा सापि नलः। तथा सो पि नलः स्पृहणीयात्र अभिलषणीया याउक्तयस्ताभिः अभिधातव्योवाच्यः। यथा यं तस्मिन्ननुरक्तां तु ना विद्यते तथा सो प्येतस्यामनुरागवान् विधेय इति कंदल भयो पिरागस्य रक्ततायाउत्पत्तिः भवतीति भावार्थः॥ यतो नह्येक हस्ततले न नालिका वाद्यते। नवैकं तसंलोहं अपरेण अन्येन अतप्तेन लोहेन संधीयते। संधानं संश्लेषं प्राप्नोति कर्मकर्तरि यक् तथा नाप्येकं रक्तमपि वस्त्रं अन्येन रक्तेन वाससा संयोजितं संधितं सत् शोभां लभते। केवलं परं वियुगलमेव भवति। विरुद्धमेव इत्यादि लेवं चतुंशी लं यस्याः सदैवं वादिनीतां परिहासशीलां प्रतिदमयंती अलपत्॥ हंस त्वं अस्य निष्कारणस्य वत्सलस्य कारणाविना स्निग्धस्य हंस स्याकिमेव मुक्तनीत्या अभ्यर्थनं किं याच्यते॥ यस्मादेतस्य अस्मात् निरपेक्षः अपेक्षा प्रयोजनं विनैव पक्षपातो मित्रादुपष्टंभः अन्येषां हि अपेक्षामपेक्ष्यैव पक्षपातो भवत्य सत्वन्यथापि॥ तथा अस्य सौजन्यं सज्जनतास्वभावतः अकृत्रिमं। अन्येषां हि सौजन्यं कृत्रिमं स्याद स्यतु न तथेति। तथा अस्य स्नेहभावः अकृत्रिमः स्वभावतः तथा अस्य उपकारित्वं उपकारजनकत्वमुपचरितं अगौणं मुख्यमित्यर्थः। तथा अस्य प्रीतिः प्रेम अपरिचयापरिचयं विनैव अन्येषां हि प्रीतिः अपरिचया महती वा सा द्भवति अस्य तु परिचयं विनापि तथा अस्य सौहार्दं अ

चं०उ० नभ्यामं अभ्यासो भावप्रत्ययनिर्देशात् ॥ सामीप्यंनास्त्यभ्यासोयत्रनथाविधं अन्येषांहि सामिप्यात् मोहार्द्रभवति अस्यत्वन्यथापि तथाअ
१०१ भ्यासे वानप्रवर्त्ते दृष्टंदर्शनंयस्यां। सा अदृष्टपूर्वाभावत्क: आहिताग्न्यादित्वान्निष्टांतंप्राक्प्रयोज्यं अन्येषांहिमैत्रीदर्शनपूर्वाभवति अस्यतुपू
र्वमदृष्टावा अपिमथिमैत्रीकरणशीलतायां॥ तदित्युपसंहारतस्मादेवंविधो निर्निमित्तबंधुनिमित्तं विनैवबंधुस्वजन: किमर्थमिति किंयाच्यते
यत: केनयाच्येत चंद्रचंदनसज्जना: परोपकारस्य। यदुनभवंत उपकुर्वन्त्विति किंतुस्वतएव उपकुर्वंति। नत्राथिता: किंतुकपिययात् क्रियता
मुहूर्तांनयावद्यो मैत्रीरसस्तेनरंजितं अस्माकं मनोयेनस: नस्यदुस्त्यजस्यत्यक्तुमशक्यस्य अस्यहंसस्य अकांडएव गंतुमुत्सहमान
स्य अकांडएव अप्रस्तावएव गंतुं उत्सहमानस्य आवर्तितं अभिलपन: किंब्रूम: किंवच्म: मागाइत्यत्राकुन: गच्छतिनिष्ठुरता कर्कशत्व
अमयतस्त्वं वांछितंनाधीयतामित्योदासीन्यं उदासीनता॥ अथ आदर्शनातदर्शनंयावत्प्रियापिवल्लभासि इति किंयाशून्य आला
प आभाषणं॥ अथकस्त्वंएवंविधोदिव्यवाकूमधुरगी: पक्षिरत्निमिति अप्रस्तुत: अप्राकरणिक: प्रश्न: अथकेनाधिकेनवस्तुना अर्थी
अर्थी: स्यान्नीति अर्थीकिंवस्त्वर्थयसे इत्यसंक्रांतं अनावसरिकं। अथकिंतेप्रियमिष्टमाचराम: कुर्म इत्युपचार वचनं से वावाक्यं
अथकृतउपकारो येनसकृतोपकारस्तथाविधो सि इति प्रत्यक्षा साक्षात्कृतिप्रत्यक्षे कृतिरनुचितानदिक्उपसंहारे तस्माद्धेतो: हेव
त्याणबंधोभद्रत्वनंजानीम: किमुच्यसे॥ कथंकथ्यसेयत्रतथापिवाक्येबाधासंभवात् भवादृशामुत्तमूर्तिना मदर्शनं मवीक्षणमे
वबरं। मनागिष्टं नतुलयमानाक्षिप्यमानाच्यंगावयवाल्लदु: सह: सोढुमशक्योदर्शनव्याघातो दर्शनविच्छेदोवरं एकत्रामिलितावपु
नर्वियोगस्त्वतितरांदु:खंजनयतीत्यर्थ:॥ अमृतंअनास्वादितं अपितमेवकंनतुसकृदेकवारंपीत्वापुन: अलाभेन अप्राप्त्यादु:खंव
रं नतत्फलं प्रार्थ्यसेयाच्यसेयाच्यसभूयोदर्शनार्थं। पुनर्दर्शनंदेयादित्यर्थ: अस्माकमनुस्मरणमेव नाटकंन्यस्यंतस्य सूत्रधारीवस्त
चित्तरंगाचार्यपि अनयादृष्टयास्माकं स्मरणंभविष्यती त्येवंरूपा। इयंचहारलताभवता प्रियस्येष्टस्यकस्यापिउपायनमात्रं ढौक
निकामात्रं भविष्यतीत्यभिधायउत्फानलमुरगीकृत्याधिकृत्य इति हंससंदेशार्थं इंसकारसंदेशनिमित्तमिवद्विगुणीकृत्य द्विसरिक सम
त्वमस्कंठकंदलात् आत्मकंठपीठात्। उन्मुच्यचउन्मार्यमूर्त्तिमतींसंदेहामुक्तंगमिववाचामिवमुक्तावलीतस्यहंसस्यगलेव्यलंबयत् १०१
निक्षेपइतीतिकिं हेमस्तनुभावनलडिधाक्तासिपांथात्। अस्मास्वराजहंसात्॥ तथाद्युत्यामुद्यसे धार्यमेवचाहृदयं नचवाण्यात्वन्त

मग्राह्य मनसावसमर्पसे इति॥ तथाहिकालंस्मर्यसेदिवादिवनक्तंरात्रौ॥ तथाद्यीगतिरूपायोऽस्माकं इदानींत्वंवात्वद्प्राप्तौमृत्युर्वा॥ सो
पिहंसइतिअभिधायनवीदिंमगणेनसहवियतिव्योम्निउत्पपातउड्डीन: इतीतिकिंहेकंदरिमयामुक्तावलिच्छलेनमुक्तालतादंभन
मस्यनलस्यपुरोऽग्रेसोयंभवद्गुणनाभारस्तदीयस्तुतिसंदोह: स्कंधीकृतोगीकृत: तदीयास्तुतिस्तस्यपुरोवक्तव्येत्यादृतमित्यर्थ:
र भारोपहिउध्वनायस्कंधेक्षिप्यतइति॥ अथनभस्तलंउत्पतितेचोड्डीनेचतस्मिन्पक्षिपटलेहंसवृंदेविस्मयेनाश्चर्येण उन्मुखीसाभूप
लपुत्रीदमयंती निर्णिमेषं अक्षिसंकोचरहितं चक्षुर्निक्षिप्यसंस्थाप्यचिरंचिरकालमूर्ध्वानुपविष्टवावनस्थेस्थिताऽपनितनेत्राभ्यां राज
हंसीनवल्कमक्रयंतीनत्वअवितर्य: किंभूतपक्षिपटलउत्प्रेक्ष्यते चलंतौ यापक्षपल्लवौपक्षतीतयोव्याजतोदंभेनदूरादिक्पालानइति आह्व
यतीव आकारयतीव अनेनभाविदिक्पालागमनसूचा॥ इतीतिकिं आगच्छतभोदिक्पाल्यमूयंतयासफललोचना: सफलनेत्रा: भवंत:
संपद्यतां। नेत्रयोफलमासादयंतित्यर्थ:॥ तथायूयं अपूर्वंमद्भुतंस्त्रीरत्नंपश्यता अन्योपियादूरात्कमप्याह्वयति। सकिलविनकर
चालनयाकर्यति। नयैतं मापि। पुनरुत्प्रेक्ष्यते तीव्राउग्रावेगप्रमयूरस्वारविकरालै: संततांदिवंनभउपसवीजयतीवव्यजनकर्मकुर्व
तीव अन्योपिपक्षमेभवति सकिलशांतीकरणायवीज्यते नत्साक्षिप्तदमपिचलत्पक्षतिभ्यांरविकरतसंव्योमविजयतीतिपुनरुत्प्रेक्ष्यते
दिकुंजरै: दिग्गजै: निरुद्धव्यासा अवकाशांतरालंयामांताइदृग्विधा: ३५ आश्वासयतीव। नासांदु:खनिरुद्धंकुर्वतीव। अन्योपिय:
केश्चिन्नबलवद्भिरुद्धोभवति तस्यदु:खभिव्यस्यर्थं आश्वासनंक्रियतेतथै। तेराजहंसा अपिचलत्पक्षतिभ्यां दिग्गजाक्रांतदिशां आश्वासनं
कुर्वंतीति॥ चिंतितवतीचविचारवतिसम॥ तातत्यावदाद्ये॥ हेतातपित: प्रजापते: वेध: एवंविधैपक्षौविहितौत्वत्तथासमर्पित
पक्षौकिंवविधत्से किंमकुरुषे। किमित्यध्याहियते नहेतुनापक्षिवदुड्डीयविहायोगतिंविधायतस्यनलस्यसुखंपश्यामि ॥३५ अपिच
पुन:॥ उड्डीयेति॥ उड्डीयवांछितमभिलषितंदेशंयांतानागच्छंतएतेविहंगमा: पक्षिणावरंमनागिष्टा: नपुन: पक्षहीनहीनत्वात् पि
क्षरहितत्वात्पंगुप्रायंपंगुसदृशंकुमानुषंवरवरमितिमनागिष्टव्ययं॥ यद्यपि॥ मनोरपत्यंस्त्रीमानुषीपुमानमानुषइतिद्विनु: पदेस्याद्दि
लिंगत्वेनान्मानुषशब्दस्यस्त्रीपुंसवर्त्तिता॥ तथापिनपुंसकत्वंलिंगस्यलोकाश्रयत्वात् तथाचभवभूति: अद्वैतं सुखदु:खयो अवगतं
सर्वास्ववस्थास्वपदिश्रामोहृदयस्य यत्र जरसा यस्मिन्नहार्योरस: कालेनावरणात्ययात्परिणते यत्स्नेहसारे स्थितं भद्रंतस्यतुमानु

327/1933

नं०३०

षम्यक्‌थभेप्येनंबहिनउल्लंघ्यं ॥७॥ इत्यमुनाप्रकारेण चिंतयंती। नथातेषु हंसपुंगवेष्वपि। उन्मुखीउद्भुमुखीसती तांउत्तरांदिशामनुलक्ष्यी
११० कुर्यात्विस्मयेन आश्चर्येणा वस्फारितेनिकासितेनलोचनेनयुयासा। तथाविधा। तथानिष्पंदतयानिश्चलतयातदवलोकनरसिकत्वेनका
ष्ठकृत्यावरूकाष्ठारूमदृशावल्लिकेति। दधानामतीसादमयंतीचिरायचिरकालंसखिभिः सखीभिः हंसरिरिणीहि। गृहंयामइत्येवंसंबोध
नेनविपर्यीकृत्य। स्वगृहान्। अनीयत। प्रापिताहंसः पुंसिस्त्रिभूम्न्येवेत्यमरः णीढिकर्मकः ॥ ततः प्रभृति॥ आगमनदिनारभ्य। तस्याः
दमयंत्याः निश्वासाः सरलीभवंती। दीर्घीभवंति। नहासाः हास्यानिसरलीभवंति॥ तथातस्याः वाण्यः वाचः स्खलंति। प्रतिघातमा
प्नुवंति। नसुचः शोकाः स्खलंति। सर्वदापिनासांप्रवृत्तेः॥ तथानस्यास्तंद्रा आलस्यं वर्द्धते स्फीताभवति। ननिद्रास्वापोवर्द्धते विर
हिणीत्वान्निद्रानेत्यर्थः॥ नथातस्याः स्वेदांभो घर्मजलं द्रवतिक्षरति। नस्तंभो जाड्यं द्रवति॥ तथातस्याः स्वरो ध्वनिर्मंदायते। मंदीभव
ति। वकुंनयकोतितिनस्मरः कामो मंदायतानासवदिने २०अधिकोभवतीत्यर्थः तथातस्याः विरहतापतप्तत्वात्। चंद्रनाक्षगोशीर्षद्रवायवां
छाइदा। नस्पंदनायरथायवांछा। नस्पंदमारूढवीत्यर्थः॥ तथातस्याः संतापशांतये। तस्यनलस्यैयेगुणा औदार्योदयस्तेषां यदाद्वनग्र
हणंतद्गुणादानंसदभूत। नस्नानं। सवनंसंतानशांतयेभूत्। ततः प्रभृतिनकदापिस्नातिस्मेत्यर्थः॥ तथातस्याः प्रीतयेप्रेल्लेहरः नो
भुरवानंभतू न आरामगनक्षणे प्रीतयेभूत्। तथानस्याः अंगेशरिरेउद्यानप्रभंजनोवनवातएवलगन्। आश्लिष्यन्। सुखाय। नजनः
परिजनाः गेल्रमन्। क्लेशायेति। मुहुः मुहुः वारंवारं इदं श्लोकंपद्यंपठतिव। विश्राम्यंतीति॥ वृत्तं॥ यस्मिनदेशे सप्रियो नलआस्तेविद्यते
सत्तायामस्यास्तइति क्लिशाकल्पनंदेशं प्रतिउत्कंठयाघांजयाधावंतादुतंगच्छंतो अमीमनंसिरथादवमनोरथाः सकं ल्याः॥ कथं न
कुत्रचिनविश्राम्यंति। श्रांताभवंति। नथापुनर्मार्गेष्वपिकथंनमुह्यंतिमूढाभवंति। नचेतिसामुदायिको निपातोनिषेधार्थः॥ तथाप्रोत्तुं
गपिप्रकर्षणोच्चेपि। अंतरंतयोरंतरालेयातरुश्रेणी शिखास्ताएव अतिगहनत्वात्पंजरमिवपंजरं। तस्मिन्कथंनलगंति। नश्लिष्यंति
नथाकथंनस्विद्यंते। नखिन्नाभवंति॥ तथाकथंविषमेदुस्संचारपथिमार्गेनंस्खलंति। नप्रतिहताभवंति। यत्रगंतव्यंतत्रगच्छतीत्यर्थः
विश्रामादयास्तेधर्माः आत्माहिरथ्याविश्राम्यंति। तथाविषमार्गेषुमुह्यंति। तथाद्रुमपंक्तिशिखापंजरेलगंति। तथाखिद्यंते। स्खलंतिच
। नपुनरमीमनोरथाः इत्याधिक्यमेषांतेभ्यः इति अथतपिराजहंसावनेषुकाननेषुसरः सलिलेषुच। सरसिजलेलगंति। नथाखिद्यं ११०

ते। स्खलंतीव नपुनरमीमनोरथाइत्यादिषुचविहरंतोविचरंतः। नथानगाश्च पर्वतानगराणिचपुराणि। ग्रामाश्चसरस्तयोजनावासाः
आग्रहारा अवग्रहस्थानविशेषाः। पुराणिच पत्तनानिच पुटभेदनानितेषां प्रदेशान् स्थानानि। उल्लंघयंतोतिक्रमंतः कतिपये कियद्भिः दिव
सैः निषधाया उद्यानं आसेदुरापुः॥ नगरपुरयोः गुल्मगुल्मकृतोविशेषः यत्रपुराणिगृहाणियदनेकार्थः। पुरंशरीरेनगरेगृहपुरेच्यो
रिति। ग्रामोदेशशब्दादिपूर्वकं पश्चाद्संवसथं चरत्नेकार्थः॥ कीदृक्षु वनेषु न्नाश्चंगउत्संगे यस्याः सातथाभूताभूमिर्येषु। त्रासंकुले
ष्वित्यर्थः तथाभूताधराभूमिर्येषु। त्रासंकुलेष्वित्यर्थः॥ तथासप्रपंचा सप्रधानाः पंचाननाः सिंहायेषुतानितेषु। पुनः किंभूतेषु त्रिच
रूपेषु रूप्याणस्वरूपेषु पक्षेशिवरूपेषु त्र्यंभुस्वरूपेषु किंभूतेषु सिंवेषु। त्रासांकं चंद्रंधरंतियते। तथाविधेषु। तथासहप्रपंचैः। पृथग्मात्रा
सपादद्वालक्षणविंचेन यानितथाभूतानि॥ पंचसख्यानिआननावक्त्राणियेषांते। तथातेषुसरोजलेषु। कुमुदानामियंकौमुदीनाशो
भनशोभांदधत्सु विभ्रत्सु। तथानामस्वन्तिरं अनुरूता अनुरूता समुद्रस्यवाद्धिर्यैस्तानितथातेषु। यादृश्यआरंभसांवृद्धिस्तादृशीसरो
जलानामपि। अमृश्यतचंद्रमंडलरूपष्विव रात्रिविंबस्वरूपेष्विव। किंभूतेषुचंद्रविंबेषु शोभनाशोभायस्याःसातथाविधांकौमुदींज्यो
त्स्नां दधत्सु तथाशश्वत अनउदयानपश्चात्समुद्रस्यवाद्धिमत्सानि। तथातेषु चंद्रोदयोहिजलधिवृद्धयेच्यदिवा॥ नविद्यतेनावोय
त्रतत् अनुपमनुपाभवति। एवंरूतसमुद्रवंद्धेषु। पूराससंहितकोपिनावंक्षिपतिकोदृशानगनगरादिप्रदेशान् सत्राणिब्राह्मणादीनांभो
जनस्थानानियत्रासविधनेयषुतेसत्रिणः तेचतेपंथानश्चसत्रिपथा। स्तान् गच्छंतीतिप्राप्नुवंतीतिसत्रिपगास्तान् सत्रवन्मार्गसहितानित्यर्थः
कान्निवदृष्टिवाद्दिग्निकुंभाविव। तानकिंभूतान् सतीत्रिपथगयावर्जंतइतिसत्रिपथगास्तथाविधान्॥ चपुनस्तेहंसाः स्वछंदंस्वछयाक्रीडितुं
तुमारभंत। अथचतेषांहंसानांमध्ये अन्यतमाः क्रीडातडागस्ययानिपंकजानिपद्मानितेषांपंकजेमध्येराजहंसीमवलोक्यसरोरक्षिकः
सरसीरक्षित्रीत्वरयावेगनसमागत्यहमदंशानोलंकृ मरालावलोकनेत्वं ठितंराजानंव्यतिज्ञपत् विज्ञप्तवती॥ हे देवदेव भवान्नृराजहंसंवा
र्ता अनुदिवसंप्रतिदिनंपृच्छति। नद्यकाचितहंसी॥ कुरुत इतिवृत्तं॥ हेराजन् नृप उद्यानसरोवनतडागंगताप्राप्ता हंसी। नलस्यादिसकांड
स्य कवलंग्रासंकुरुते। तथागर्भजंबालं। गर्भतन्मध्ये याजंबालः कर्दमः तंचदूरं अनिकं विक्षिपतिपरिहरतिकेवलंदर्गिवधूगिवलदीव
अविरिस्वीव॥ साचकिंभूता उद्यानेपलायनेन। सरोगतासामर्थ्यता यस्याः सातथाविधातथा अलकानां केशानांचलनंसंमार्जनंनकुरुते

327/1433

चं०टी०
१११

तथागर्भं जात बालं इभं दरं वा क्षिपति। भीत्यादिगर्भः पतति॥८॥ अपि च पुनः अमीति हे नृपते राजन् हंसी नवरिपुवनितेव आचरति रिपुवनि तेवाचरति रिपुवनितायते। कथं याहंसी नालं कमलकांडं अन्नमाहारं अभिलषति वांछति। तथा नवा भा तल्पशयने तत्तेना तल्पते शय्यायां स्वपित्यपि। तथा नीरजले आगमनं यस्याः सा निरागमना रिपुवनितानु निरागं वैराग्यापेतं मनो यस्याः अत एव अलमत्यर्थं अन्नानाभिलषति। नापि कमलदलतल्पे शेते वा। अथवार्थः॥७॥ राज्यपितस्याः सरोरक्षिकायाः श्लिष्यर्थं द्व्यर्थं भिदमार्यायुगलं छंदाजाति विशेषनिबंधपद्यद्वयमवधार्य मनस्याकलय्य स्तोकं अल्पं यद्विमितं हास्यं। तदेव कथापीयूषं तथा धवलितः सितः अधरपल्लवो यस्य स तथाविधः कुतूहलवांश्च भिदं साध सरं समयं प्रस्तावात् चितं सत्त्वात्तं प्रधानं यथा भवति तथा। कथयति यथा तेपि हंसा आगताः। अन्यथा तेषामनागमने खलु निश्चितं॥ तस्याः एकाकिन्याः हंसाः कथं संभवः। इति न दार्न्तव्याहंस व्यात्तयायावदास्ते हंसागमनवार्त्तां वा करते। नृपस्तावन्मतिमती संदेहान्तरीदेव वनपालिका प्रविश्य राजांगणांतः प्रवेश्य विधायहे देव सोयं यः पूर्वं तडागं मरोत सएवायं रणरणककारणं। आलक्ष्यनिमित्तं अपराधी विरहव्यथोत्पादकत्वात्। कृतापराधो हंसः कथमपि केनचित् कारण आगत इत्यभिधाय उत्कायमानाभ्यां करकमलाभ्यां। ततस्तत्र गतं प्राप्तं उभाभ्यां कराभ्यां धृत्वा तं राजहंसं। राज्ञः पादारविंदयोः पुरो अग्रे निधाय संस्थाप्य प्रणामं अकरोत्। तत्रामभिकिं भूतं उपलक्ष्यंत। उत्फुल्लं विकसितं यत्सांद्रपंकजं श्वेतपद्मं। तदेव अर्घः पूजाविधिस्तमिव मन्ये पांडुकमलमपार्थी रजमिति॥ किंभूता वनपालिका नीलोत्पलवद्दीर्घं आयते लोचने यस्याः॥ तथाचंद्रवत्तुलं मुखं यस्याः सा चंद्रमुखी तथा बंधूककुसुमवत् कांता रक्ता दंतच्छदा यस्याः सा॥ तथा नीलमंशुकं वासः तस्य पटी उत्तरीयं तां परिदधाना वसाना। तथा पक्का याकलमंजरी तद्वत् गौरं पीनं अंगं शरीरं यस्याः सा परिपाके हि शालयो गौरवर्णा भवंति॥ तथा प्रकाशः प्रकटो हासो हास्यं यस्याः सा तथा हंसैः परमरालैः अनुगम्यमाना अनुस्रियमाणा। पुरतो वनपालिका पश्चात् हंसा आगच्छंतीति॥ किंभूता शरन्नीलोत्पलदलान्येव दीर्घलोचने यस्याः सा तथा चंद्र एव मुखं यस्याः सा शारदि प्रभावीतात् चंद्रमसः। तथा बंधूककुसुमान्येव कांतो मनोज्ञो दंतच्छदो यस्याः राम
सा। तथा नीलां नीलवर्णां शुका एव पटीं तां परिदधाना बिभ्रती। तथा पक्व कलममंजर्य एव गौरमंगं यस्याः सा। तथा प्ररूढाः काशाः का
१११

331/1953

काशपुष्पाण्येव हासो यस्याः सा कश्चा हंसैरनुगम्यमाना शरदि मानससरसो हंसानां आगमनात् तदानीमेव कांतानां विकसनात् उत्फुल्लपांडुपंकजार्घेतापि युक्ता राजापि नलः उवाच हे सारसिके। त्वया सार्धं कतं चारु चक्रे। न दिस्य कपक्षं करते तस्माल्वा धिकारं वनपालिकलक्ष्या निजाधिकारः अशून्यो अविरहितः क्रियतां॥ तथा यथारूढां स्वं स्वं रूढां मनतिक्रम्य यथारूढानं स्वीयेर रुढा नेइ दानीं गम्यतां इत्यभिधाय तुष्ट्या हर्षेण यत्न दानं हाराद वितरणं वा सेनया वनूतन प्रकर्षेण तोषितां आनंदितां तां सारसिकां लवंगिका सहितां विसृज्य मुक्तात् तथापरिजनं विरलीकृत्य स्तोकीकृत्य अग्रेकृतं तं हंसं आनंदनिस्पंदे निश्चल पक्ष्मपाली प्रशस्तेन नेत्रोत्पलेन यस्यतत्तथाविधे न चक्षुषा चिरं विलोक्य बहुमानयन् गौरवयन् मुग्धस्मितेन रम्यहास्येन स्वागतं अपृच्छत् स्वागमनवार्त्तां पप्रच्छेत्यर्थः। पृष्टं चकर्मकृतं। किंभूतं तं उपलक्ष्यित प्रत्युज्जीवनस्य पुनः प्राणधारणस्य औषधमिव अगद इव अनेनागतेन नलस्य प्रत्युज्जीवनमिव जातमित्यर्थः॥ तथा प्राणरक्षाया अक्षरमिव यथा प्राणरक्षाक्षरेणागच्छंतः प्राणास्तिष्ठंति तथानेन हंसेन नलस्य गच्छंतः प्राणा धृता इति॥ तथा स्वच्छीकरणस्य चेतः स्वाच्छ्यविधानस्य मणिमिव यथा स्वच्छीकरणमणिना चेतः स्वाच्छ्यं विधीयते तथानेनापि॥ तथा आश्वासनाय दुःखनिर्वर्तनाय भेषजमिवौषधमिव यथा भेषजेन आश्वासो जायते तथानेनापि। तथा आह्लादनाय प्रीतिजननाय कंदमिव यथा कंदात्तरोरासत्तिः तथास्मान्नलस्याह्लादो जायत इति सोपि हंस इत्यभिधाय नलमुपश्लोकयांचकार श्लोकाभ्यामुपस्तौतिस्म इतीति किं हे देव तव दर्शनमेव अमृतं अनुभवन् आस्वादयन्। अवलोकयत इत्यर्थः। मम स्वागतं शोभनमागतमागमनं। हे देव॥ प्रसूता॥ त्वयि कुलरूपिरुष्टे सति आसां तावद् यज्ञीतास्त्वत्ताः शत्रवस्तडागमेवं विधं नाद्रियंते नादरं कुर्वंति यावन्विजं कलत्रमपि रमणीयमपि नाद्रीयंते किंभूतं तडागं प्रसृतः प्रवृत्तः कमलानां अब्जानां गंधो यत्र तत्। तथा नीरेण संसक्तः संयुक्तः कंठः पालिप्रांतो यस्य तत् तथा धृता कुवलयानां नीलोत्पलानां माला पंक्तिर्येन तत्॥ तथा जाता उत्पन्ना भंगास्तरंगा ऊर्मयश्च कल्लोला यत्र तत्। पुनश्चतुष्टयं तडागादरहेतुः किंभूतं कलत्रं प्रसृतः कमपि भिन्नमलगंधो यस्य तत् तस्नानाभावात्। तथा निर्गतो रसो वस्त्रामृतकल्पश्रृंगारादिर्वा यस्मात्तत् तथा मलातैलग्नः कंठो यस्य तत् तथा धृता कुत्सितवलयानां स्वर्णाद्यभावात् काचादिवलयानां माला पंक्तिः येन तत् तथा ज्ञाता भंगा भग्ना ऊर्मिका अंगुलीयकं यस्य तत्॥ किंचान्यत्॥ पुनरपरं किं॥ असमेति॥ हे देव वयं इह वनांते वनप्रांते

११२ एवंविधत्वदरियुवतीलोकस्त्वदहितस्त्रीलोकं यापयामास एवंविधं सरश्च दृष्टवंतः। अवलोकितवंतः। किंभूतं त्वदहितस्त्रीलोकं हरितनेः सिंहपदेन सकाशात् उरः क्षेपस्त्रासो हरिततीरः असमो विषमो हरिततीरो यस्य सतं। अथवा मालक्ष्मीः तयास हवर्तत इति समं न समम् असमं असश्रीकं तथा हरिततीरान् रपंक्तिर्गस्यति क्षिपयतीति हरिततीरः पश्चात्कर्मधारयस्तं तथ विस्त विसतमालं तथा बाला एवं शेषा अवशिष्टा यस्य सतं हतभर्तृकादित्वात्। तथा स्फुटं कुकुलं यस्य ममेनं स्फुटंकु कुलायस्य तं स्फुटकुं त थाउऊतो पुरागस्य रागाभावस्याल्लासो यस्य स मतथा विधन्त्रा सो संपट्टिचुक्तश्च अथवा स्फुटा कुत्सिता उदरभरणादि मात्रज्ञा मुग्धस्य सस्फुटकुमुदतया एकांगता रागो ल्लासो यस्य स्फुटकुमुच्चासौ अपरागोल्लासश्च स्फुटकुमुदपरागोल्लासः सचासौ सपट्टिचुक्तश्च तथा तं। तथा बहूर्वहल्लः शोकः शुक् यस्य सतं। कीदृशं ग्रीष्मसरः। समंहरितं मीरं यस्य सततं समहरिततीरं न समहरिततीरं असमहरिततीरं विषमं गुप्तवनीरं यस्येत्यर्थः। तथा किंत्र आमगंधिका जंबालः कर्दम एव शेषो यत्र ततू। तथा विकसितकुमुदरेणूल्लास सम्हिरहितं तथा नालिकं जलमत्रेति अरूं बहुधा इति क्रियाविशेषणं॥ सा अप्युवाच॥ हे स्नेहाति निभ तथा असन्न नो गृहीत्वा गतवानसि। यथा स्मा वं कथमपि महता कष्टेन एतसुखं संपत्या सर्वसंघा॥ शून्यारहिताः तथा संतापं दुःखमारभंते जनयंतीत्येवं शीलाः संतापारंभिण स्तथा रणरणकं भवदमयंतीप्रत्यासुक्यमेव अंकुरास्तेषां प्ररोहजनकाः दिवसा अतिक्रांता। तत्र स्मात् कथय कानाम राभिनंद नीया स्तवनीया दिक्। यस्यां दिशि त्वं विहारं भ करोः। हे हंस अनतस्फूल्व चक्षुषः कृतार्थं नेत्रा जनाः येत्वं चिरमालोकितोसि वीक्षितासि। तथा तव्यः सभापिनाल्येव अमृतरस तस्य आस्वादो यैस्ते लब्ध सुभाषितामृतरसास्वादा। जनाः यैः संभाषितोसि। वा दितोसि तथा निमानं प्राणितस्य जीवितस्य फलं यैस्ते प्राप्तप्रणितफलाः यैः सह गोष्ठीसंलापं अनुष्ठितवान्। कृतवानसि गोष्ठीसंला पपरिपद्यपीत्यनेकार्थः॥ स्पृहणीय अभिलषणीयः। संगमः संबंधो यस्य सतस्य संबोधनं क्रियते हे स्पृहणीय संगम हंस त्वयि गते सति। इदमस्मा कं मनः प्रस्तुतः प्रकृतः परउत्कृष्टो मोहो मूर्छा यस्मिंस्तत्तथा विधं। प्राप्तचैतन्यराहित्यं आसीत्। मूर्छितं जातमित्यर्थः किमिव तर्कशास्त्रमिव किं भूतं तर्कशास्त्रं प्रस्तुतः परमऊहवितर्को यत्र तत्तथाविधं। तथा त्वयि गते सति अस्मन्मनः भूतनिष्टं भूता संज्ञा निष्टा कृष्णयत्र ततत्तथाविधं। आसीत् किमिव व्याकरणमिव किं भूतं तत भूते अतीतकाले निष्ठासंज्ञः प्रत्ययो यत्र तत्। निष्ठा कप्रव्यवक्तवतोः ११२

कृशांगि पत्रानात्र्यां ते निर्वाह याचनेत्रत इत्यनेकार्थः॥ ततस्मा उक्ताः हे हंस एहि एहि। आगच्छ आगच्छ इत्यभिधाय उत्कास्वयं करकमलतलेन। उत्क्षिप्या उच्चैः गृहीत्वा। सस्नेहं सप्रेमं। परामृशन्। परस्पर्श सोपि हंसः इत्यभिधाय गमनादारभ्य यद्दिने दूतो गमनं विहितं। तद्गमनदिनादारभ्य। दमयंत्या दर्शनं च अवलोकनं। आलापश्च संभाषणं। तयोर्व्यतिकरे। वृत्तांतस्तं अशेषं स मस्त हारलताया अर्पणदानं तत्पर्यंतं तदवसानं आचचक्षे। आख्यातवान्॥ इतीति किं हे राजन एष महान् प्रसादः अनुग्र हः यत एवं कस्यचिदर्शनादिनादेवा भवान् अस्मान् अनुकंपाते। दयां कुरुते॥ आख्याय च॥ उत्काच। एतेन चरणेन च तां मुक्ताव लीं हारलतां। तथा क्षितां इव द्विगुणीकृतामिव ग्रीवा दाकृष्य गृहीत्वा॥ इदमवादीत्॥ उन्मादिनीति॥ वृत्तं॥ हे नरनाथ। मा एषा मुक्तावली तव कंठग्रहं। कंठस्वीकारं करोतु। कंठ कंदलानिधायतामित्यर्थः॥ केव तस्याः दमयंत्याः भुजलतेव यथा तस्याः भुजल तानवकं आलिंगनं करिष्यति। तथेयमपि करोतु उभयो अपि कीदृश्यौ। उन्मदयति हर्षयतीत्येवं शीला उन्मादिनी तथा मदन कार्मु कमंडलस्य कुंडलीकृतस्मरधनुषां जीवप्रत्यंचेव। उभयोश्च अपि जगज्जयात् तथा सौभाग्यस्य सुभगत्वस्य भाग्यस्य च भाग धेयस्य च परमुत्कृष्टं यद्वैभवं प्रभुत्वं तेन च जयंती व पताके वयासा। अतः परसौभाग्यं च कस्या अपि नास्तीत्यर्थः। तथा कुलस्य त दन्वयस्य धनं स्वंकुलधनं तत्कुलसर्वस्वमित्यर्थः। इदमुक्तावलीमवाप्य क्षयविशेषणं॥ ९॥ अपि च पुनः प्रेमेति वृत्तं॥ हे नृप ए षा हारानवल्ली भवतां हृदि हृदयपदं अवस्थानं करोतु त्वद्धृदयमलंकरोतु किंभूता हारलता प्रेमप्रपंचएव गीतिः विस्तारएव न वं नाटकं नृत्यं। तस्य सूत्रधारीव। रंगाचार्येव। यथा सूत्रधारी नृत्यं प्रवर्तयति। तथेयं प्रेमप्रपंचप्रवर्तयतीति। तथा मनोभव नृपस्य कामभूपस्य। मूर्तासचारिणी नियंत्रणा युवजनमनो बंधनरूपा आदेशः॥ तथा तस्याः दमयंत्याः स्वयंवरे यः प रिग्रहः स्वीकारस्तत्र हस्ति कवयासा॥ यथा हस्तिनी प्रियस्य प्रियायाः स्वीकारं कारयति। तथेयमपि दमयंती स्वीकारं कारयिष्य तीति॥ १०॥ स जातु तां हारलतामादाय निरूप्य च अवलोक्य च चिरं चिंतयां चकार विचारयामास॥ आनंदीति वृत्तं॥ एषा चेयं हारलता मा च दमयंतीं कस्यचिद्वक्षसि मिव तमिव पदमवस्थानं न करोति। अपि तु सर्वस्यापि करोत्येवेत्यर्थः॥ किं भूता हारल

नै॰ च॰
११३

ता आनंदी आनंदजनकः मंदरगुणमंतर्यस्यां सा। आनंदिमंदरगुणा॥ तथा। अद्भुतमाश्चर्यकारिणं आमलकोपमानानां मुक्ता
फलानां मौक्तिकानां प्रचयं समवायं। उद्वहंती। धारयंती। तथा नयनयोरुत्सवकारिणी हर्षविधात्री। कांतिश्छविर्यस्याः सा ल
थाचेतोहरा मनोहरा किंभूता मादमयंती आनंदिनः मंदरगुणाः नार्यादर्यादयो यस्याः सा। तथाविधा। तथा मलापापात
मालिन्यात् सकाशात् आधान्मनाऽर्वाक्। मादश्यात् मुक्ताश्रेष्ठा। तथा अद्भुतं चित्रं फलानां प्रचयं उद्वहंती। परिणतुरिति शेषः। तथा
नेत्रयोरुत्सवकारिणी हर्षविधायिनी। कांतिदेहदीप्तिर्यस्याः सा तथा चेतोभिहराय्यस्याः सा चेतोहरा॥ ७१॥ इत्यमुना प्रकारे
ण चिंतयन् मनसं त्वया द्विगुणां तां मुक्तालतां एकगुणां कृत्य। एकामित्यस्य पुनः सस्पृहं साभिलाषमैक्षत॥ व्यलोकयत। हंसस्तु
विहस्य परिहासं नर्मलीलामकरोत्। नवभितवत्तं। देशजनृतयादमयस्यादत्रामयादिसनोनीतान वस्त्रयमाल्हादिनी प्रीतिजनयित्री। उ
त्थितं अनेकवारुतादयो गुणा यस्याः सा अनेकगुणा एवंविधा। एषा हारलता कथं एकगुणीकृता। एकवारत्वादिगुणसंयुतास्कृता। पक्षे एकस
रीकृता॥ ७२॥ राजापि परिहासमनलीलापूर्वकं हासे। अंतःसूत्रं मध्यगतं गुणं दर्शयन्। हे पक्षिपुंगव पक्षिश्रेष्ठ किं न पश्यसि सएक गुण वयं॥ अ
थवा इति पक्षांतरे। कः करोति इत्यत्रं॥ को गुणवान् अस्या हारलतायाः स्फुटं प्रकटं गुणसंख्यां गुणगणनां करोति किंभूतायाः अस्याः श्ला
घ्यं प्रशस्यं जन्मासत्तिस्थानं भरवर्जनं जायस्याः सा। अथ या हारलतया तस्याः दमयंत्याः कुचयुग्मपयोधरं देवैस्वरस्थे ख्या आस्यत अस्तु अय
नोऽर्भनकुचयुग्मं। कुंभिकुंभवत्। परिणाहो विशालता विद्यते यस्य तस्मिन्॥ कुंभिकुंभपरिणाहिनि॥ ७३॥ इत्यमुना प्रकारेण अभिधाय
निजकंठके दलनीत्वा विदेहरमेत। मातवपूर्वप्रणयिनी। पूर्वप्रणयः स्नेहविद्यते यस्यां सा इति पूर्वप्रणयिनी। पूर्वं मद्धारिणी दमयंती। उह्रदय
आसक्तिः अमुना न कारणेन अंतःस्थितां चिंतास्थितां दमयंतीं दर्शयितुमिव तां हारलतां हृन्मध्ये वर्तितुं शीलं यस्याः सा तां। अकरोत्। हृदये न्यधा
त्। च पुनः किंचित् अल्पं अनुस्मितं अप्रकटं हास्यं कृत्वा। मधुरं मधुरया अतिशयेन मृष्टया वाचा उवाच। हे विहंग हे पुंगव पक्षिराज पुनः
कथय तां कीदृशी स्वकीयं कारुरूपाकीदृगाकृतिः किंकृतयः कीदृशी लावण्यसंपत्। नयनल्हादं सौंदर्यं लावण्यं तस्य संपत् समृद्धिः को विनोदः स। राम
भाषितादिरसास्वादलक्षणं कौतुकं तस्याः कीदृग्वैदग्ध्यं। चातुर्यं किं प्रियं इष्टं। का गोष्ठी वर्णनसंलापो वा इत्येवं श्रुतामपि अपूर्वमिव ११३

335/1933

अश्रुपूर्वामिव। नहार्ता आदरेण गौरवेण पृच्छन्। तथा चरलकरभ्यां लघुहस्ताभ्यां कृतं त्रासस्य संधानं योजनं येन स तस्य तथा अनवर
तं अजस्रं विरचितं अद्भुतमाश्चर्यकारि भ्रमणकर्म यत्र ईदृशं कार्मुकवलयं मंडलीकृतधनुः यस्य स तथाविधस्य मकरकेतोः कामस्य लक्ष्य
तां। बध्यतां आगच्छन् कामकृतां पीडां सहमानश्च। स राजा हंसवार्ताया न विदिता ज्ञाता यः पश्चमोतिक्रमणं एषां ते तथाविधान् अतिबहून्
काललवान् कालविशेषान् अवतस्थे। नास्थिवान् अथ भास्वरमासि दीप्तिं तज्जन्मभगवति भास्वति सूर्ये मध्यमं नभोभागं विभू
ष्य अलंकृत्य स्थिते वसति मध्यान्हे जाते सति इत्यर्थः॥ तथा प्रहरस्य द्वितीययामस्य अवसाने। अंतेयः प्रहारस्ताडनं तेन भांक
रणीया भेरी तस्याः घोरवो ध्वनिस्तस्मिन् श्रवणपुरपथं श्रोत्रमार्गं अवतरति सति भेरीत्राब्दे श्रूयमाणे सति इत्यर्थः॥ हे वयस्य
मित्र हंस मंदिरोद्यानारविंदः। दीर्घिकायां गृहकाननकमलवाप्यां इदानीं विश्राम्यतां श्रांतिच्छेदः क्रियतां किंभूतायां अम
दा अनल्पाः अमंदतरतरवः स्वरक्षा। तैः परिकरितं वेष्टितं राधकं टंयस्याः सा तस्यां॥ च पुनः एष त्वं प्रार्थ्यसे। याच्यसे अविसर्जि
तेन मया अमुक्तेन त्वया पूर्ववत्। न गंतव्यं। यथा पूर्वं विसर्जितं एव आगास्तथा च अविसर्जितेन न गंतव्यमिति अमुना प्रकारेण
राजहंसं नियम्य। नयं च स्वयमपि। राजा आन्हिकाय नित्यक्रियायै उदतिष्ठत्। उत्तस्थौ। एवं च। अमुना प्रकारेण शिथिलित
ति॥ शिथिलिता मुक्ताः सकलाः समस्ता अन्या हंसगोष्ठ्या अपराव्यापृतयो राज्यव्यापाराः येन स तस्य राज्ञः हंसेन सार्द्धं दिनम
नुदिनं लक्ष्मीकृत्य एतेन णत्रिनिपथः। पक्षिणो हि निद्रां नीडे निलीयंते। दमयंत्याः वृत्तः भूताये वार्ता विनोदास्तैः। यद्वा दमयंत्या
या वृत्तवार्ता श्वरित्रसंतानानि। एवंविनोदाः कौतुकानि तैः अविदितः परिवर्त्तो गमनं येषां ते तथाविधाः ज्ञातदिभवं शारदरूपं उष्ट
त्वाति अस्वादितं ह्रियते यस्याः सौत्रारदि शारदो इनः सूर्यो यत्र ते शारदीनाः वासराः यांति। एतेन तद्दिनानां तापहेतुत्वेपि हंसवा
र्तया तत्कालातिक्रमण मुक्तं। किंभूतस्य राज्ञः परिहृतो हंसेन वसहवार्त्ताकरणात्यक्तो निजो बांधवः। स्वजनो येन स तस्य। वृत्तं वृत्ता
दृढ मतं वमिंत्रवर्तुलं। छांदस्य नीता धीनयो वृत्तेः स्तेनकार्थः। एकदा तु एकस्मिन् दिने। एवंभूते न राजहंसकदंबके अनुगम्यमा
नो अनुक्रियमाणः स विहंगमः पक्षीराजहंसः सरसीरं तीरं हाय त्यक्त्वा। उपसत्य राज्ञः समीपं समागत्य किं नराणां मधुरो मनो

चं० २०
११४

ोयांगीनध्वनिः शगवछदा स्वारस्तत्वाविर्निद्रितं। प्रबुद्धं आवश्यकं गोचावसाने अवश्य करणीय शुचिकर्म प्रांतेरा ज्ञानमि
दं वक्ष्यमाणं अवदितत्रु मतिनभमि अंधकारे। प्रस्फुरंतीदीप्यमाना प्रभातार्भिप्रत्यपादयथा प्रभादीप्तिम्नयाभिद्यमाने विध्व
स्यमाने भति किंभूतनभमि। नवं नूतनं यन्नीलांजनिका कुसुमं तापिच्छतरपुष्पं। तद्वन्नीलाकांतिर्यस्यतत नथातस्मिन्। पुनः ह्य
गत्यां उपक्षपत। प्राचोदयितदुः तस्यादिशि प्राच्यां रोने: मंदमंदविनत्लाक्षांभोभिः गलितजतुपानीयैः सिच्यमानायामिवह्य
व्यमानायामिव विकलप्रल्स्यत्वप्रभातं प्राचीलोहितामवति। स्परंकाविरसंरक्षांकुरुते। मन्येलाक्षारसेन सिच्यतदीति॥ किंभूतेन
गजदसकदंवकेन। मंदवानरनिमपात। विकसंतिय निकमल मुकुलानि पद्मकुड्मलानितेभ्यः उत्कलम्भिः मरबुलं चंचलं यत
अलिचक्रवालं भ्रमरवृंदं। तस्य कलकलेन गुंजारवेण कलाउन्निद्रित तस्यकौनिद्रेण तथातंद्रया आलस्येन मुद्रितसंकोचिते। उ
न्मीपतीविकसतीवक्षपीयेनतत्तथा विधेन। तथा चलंतीयाचलनीया चंचुकोटिः चंचुग्रं तयायत्कंडूयनं। खर्जूकरणं तस्यविरा
मनिरुमानतिविधूताकंपिनापक्षत्यागेभरणिः तनूरुहपंक्तिः येनतत्तेन॥ अथहंसायदुवाच तदाह। हेदेववयंविज्ञापयामो
निवेदयामः देवस्य भवतादर्शनं अनालेप्यं चंदनं गोशीर्षद्रवः। अन्यच्चंदनमालेप्यं। आलेपनार्हं भवति। इदंनतथा। तथा अ
स्पर्शं स्पर्शविनवकर्पूरपांसुपटलस्य घनसारधूलिवृंदस्य उद्धूलनं चूर्णं। अन्यत्तदुद्धूलनं। सस्पर्शं भवति। इदंचतदभावेपि। तथा
अपातव्यं भवति इदंच न तथा॥ तथा॥ अनास्वाद्यं अननुभवनीयं रसायनं जरामरणापहमौषधं। अन्यद्रसायनं आस्वाद्यं भवति
इदंनतथा अलक्ष्यं मधुकापिशापिनं अन्यन्मधुलक्ष्यं भवति। इदंचनतथा। सर्वत्राप्यानंदकारित्वादितिहेतुः॥ किलेतिसंभाव्य
ते पुनर्दर्शनमनुभवतां वीक्षमाणानां॥ आस्तां मनुष्याणां अस्माकमपि। पक्षिजातीनामपि कृतार्थसहस्रेणापि परितोषः संतोषः
किंनु॥ हेराजन् प्राणिनां जंतूनां परेण परिग्रहः स्वीकारः। परवशवर्तित्वं स्वातंत्र्यं स्वेच्छया प्रवर्त्तनं तिरयंतितिरस्करोति। परवशाः
किलस्वेच्छयाप्रवर्त्तितुं द्राक्षंति। एतावता ज्ञापितं। त्वया अविसर्जितेन नगंतव्यमितिनियंत्रद्रुः सहेति॥ तथाजलजन्मनोपिज राम
लोद्भवस्यापि जन्मभूमयो दुस्त्यजा भवंति। एतत्सर्वमपि विश्रब्धं विश्वस्तं यथाभवतितथा देवो नृपः अवगमिष्यति ज्ञास्यति ११४

337/1122

स्तदितिकिं। आदेशायेचवयं येनकेनचित् प्रेषिता मुक्ताः स्वलुनिश्चितं। अस्य कथाप्रक्रमस्य कथापरिपाट्याः अनवसरः अस
मयः नदिरूपसंहारो। तस्माद्देवो नृपः अस्मान् गमनाय आदिशतु आज्ञापयतु। हेराजन् वयं हंसाः प्रस्तुताः प्रकृताये अ
नुचराणां सेवकानां आलापाः कथनानि अस्माकं अयं सेवकः इत्येवंरूपाणि तेपुनश्चविस्मारणीयानविस्मार्याः यथासे
काः तथास्माकं तेहंसा अप्यनुचरा इतिस्मृतिविषयीकार्याः किमन्यत्। अपरं किं अस्माकं तदेवजन्मजीवितं च वयं श्ला
घ्यं मन्यामहे प्रशस्यं जानीमहे। यत्र जन्मनि जीविते च वर्त्तमाना नस्मान् प्रसंगेन अनुचरगणनाप्रस्तावेन भवादृशाः महा
नुभावाः सर्वेनइतिसर्वेषां मध्ये अनुस्मृतिं अनुस्मरणं कुर्वंति। सर्वेतरुतिसार्वत्रिकः त्सस तदिरूपसंहारे हेरा
जन एष अस्माकं प्रार्थनायाः गमनयाच्ञायाः प्रणामः इत्यमुना प्रकारेण उक्तवंतमि मं हंसं अवनिपालो नलः कथंक
थमपि महताकष्टेन विसर्जयामास मुमोच गतेचेति अविस्मरणीयः अविस्मार्यः प्रियासंदेशात् कथनादिरूपउपकारो यस्य
सतस्मिन् अविस्मरणीयोपकृतितस्मिन् कादंबकदंबकेश्वरे हंसवृंदेनतरिगते चसति श्रवणमाकर्णनमेव प्रणालीजलमार्ग
स्तयाकृत्वा मानसं चित्तमेव सरस्तडागं अथच मानसाख्यं देवतडागं कर्मतापन्नं प्रविश्य विदर्भराजपुत्री हंसः तस्यपुत्र्यांदमयंत्यां
पक्षसंहस्यांतरलयंत्यां कंपयंत्यां सत्यां हंसा विहंगभेदस्यान्विलोभान् पतावपि तथाआकर्णपुरीकृतैस्त आकर्षणेन कर्णांतं प्रा
पितः कार्मुकगुणोधनुः प्रत्यंचायेनसतस्मिन् अनंगधानुष्के काम धनुर्धरे प्रत्यंगं प्रतिप्रतीकं प्रहरतिप्रहारान् ददतिसति
तथा। अतिमधुरमधुलिहां अलीनां झंकारेण श्रवणपथं कर्णौ गच्छतिसति किंभूतानां मधुलिहां समीपवने विकासिनी
विकसनशीला येकुंदाः पुष्पविशेषास्तेषां योमकरंदास्वादो मधुपानं तेनयो मदो मत्ततातेन मेदुरा मांसला पुष्टागीः येषां तेते
षांतेषां सांद्राः स्निग्धकं मेदुरः मदोरेतस्य हंकारमधहर्षभेदान्नयाः। कस्तूरिकायां क्षिप्यचेलनकार्थः॥ तथारणरणकारं
भिणि औत्सुक्यकारिणि तमवसरेसति आविरिति। वृत्तं॥ उत्सुकस्य दमयंती मीलनाय उत्कंठितस्य तस्य नृपते नलस्य
तत्क्षणक्रमवस्थानां नैतरं जातं यस्मिन् क्षणके पंचमरागएव पंचमाख्यरागविशेषएव प्रयानतिशयेन क्षोभूत्। शेषास्तु
सर्वेरसाविषयानुरागा रिपवः अनिष्टाः जाताः किंभूतं क्षणकं आविर्भूतः प्रकटीभूतो विषादो मनःपीडा एव कंदो यस्मिन् त

नतया असमांतुल्यायायामोदोमर्खातनमीलत्वं कुचतउपरतविषयानुरागं मनोयत्र ततू तथाचिंतयातदध्यवसायेनउत्तंभित उच्चैः
कृतोनिर्णिमेष अक्षिसंकोचरहितनयनंनेत्रंयत्रतत्तथाविधा ।। तथा निश्वासेनविरहोष्णमुखवायुना दग्धो अधरोष्ठ्यत्रततत्
उत्तंभितमित्यादिमु: सोत्राधातु: स्वार्थिकाणिचक: ।।१६।। ततश्चेति । दमयंतीविरहात् सराजा मनागपिस्तोकमपि नक्षपितस्य तः
कृतोविश्रवृद्धावागतनिद्रः सनृपामंकृत्वंलभत्राप । नल: किंकुर्वन्निवउत्प्रेक्ष्यते दृश्चिकदंशेन अलिभक्षणेन दुःसहासाद्गमत्रा
क्या व्यथापीडायत्रउदशामवस्थांदधानो अनुभवन्निव मन्येदृश्चिकेनदष्टइति । तथाकंटकैःचरणमर्मणिपादमर्मप्रदेशे ।। विध्य
मानइवभिद्यमानइवकामव्यथयातिपीडितत्वात् । तथामुहुर्वारंवारं तापातिरेकेणक्षिप्तमात्रशुष्कत्वात् मुर्मुरः पुंजोयेषांतानि
मुर्मुरपुंजानितथाभूतानि राजीवानियेषुअंगेषुतानि च तान्यंगानि धारयन् मुर्मुरस्तुषवन्हिः यद्विश्वप्रकाशः । मुर्मुरस्तुष
वन्हीस्यात् मन्मथेरथवाजिनि ।। तथाउष्णास्तप्ताः ये ग्रीष्मानिलानिदाघवायवस्तेषांयेउल्लोलाः कल्लोलास्तैरालिंग्यमानइव
आश्लिष्यमाणइव ।। तथाहीतिविरहिणादुःखमवदद्भायतिश्वैतदिति । वृत्तं ।। सोधोत्करभुवः नृपमंदिरमध्यभूमयः
पूर्णेंदुरम्यश्रियापरिपूर्णचंद्रचारुशोभयारम्यायामपिरमणीयायामपिनिशिरात्रौहृदयंचेतानहरंति नवशीकुर्वंतिकिंउद्दुगाय
भवंतीत्यर्थः राजइतिशेषः इतियुक्तं चततउत्कृष्टानोद्वःखितानांकिंहृद्यंकिंमनोहरंनकिमपीतिभावः किंभूताः सोद्दत्संगभु
वः श्वातंतानलंदरंतायवद्रमणिप्रणालाश्चंद्रकांतजलमार्गास्तैः शिशिराः शीताः ।। तथासौगंध्यनसौरभ्यप्रकर्षेणव्याप्त
अंबरयैस्तानितथातैः सुगंधितनभोभिर्निर्गच्छतिगवाक्षमार्गेणनिःसरंतियानिनवधूपधूमस्यपटलानिवृंदानितैः
संभिन्नानिमिश्रितानिवातायनानिगवाक्षायासांताःसंभिन्नवातायनाः । तथाविकीर्णानिविक्षिप्तानिपुष्पाणियासुताः ।। प्रणा
लत्राह: स्त्रिलिंगः ।।१७।। अपिचपुनः दयंति । वृत्तं ।। एवंविधा उनैरंगेलेंगतः प्रालेयशीता अपिहिमसमा अपिपवनावाय
वः अंगारसमास्वपतंतिविरहसंतापोत्पादकत्वात् ।। किंभूताः पवनाः हृद्यानिरम्याणियान्युद्यानसरांसि वनतडागानि
तेषांयानितरंगशिखराणि कूर्म्याणितेषां यत्संखालनंतरलनंतेन आयासिताः खेदिताः खिन्नाइत्यर्थः एतेनजल

331/1133

कणवाहित्वमुक्तं ।। अमएवपुनः किंभूताः संभोगश्रमेण स्मरतखेदेनखिन्नाः श्रांताः याः किन्नरवध्वस्तासांस्वेदोदबिंदून् घर्मजल
पृषतानुच्छिंदंतिशोषयंतियेतेतथाविधाः । तथासायंसंध्यायांसांद्राणिनिबिडानिविकस्वराणि यानिकैरववनानिकुमुदखंडा
नितानिअंदोलयंतःकंपयंतः एतावताशीतोमंदः स्मरतिश्वेतिगुणत्रययुक्तस्यापिवायोर्विरहिणांदुःखजनकत्वमेवोक्तं ।।१८।।
तदाप्रभृतिचयद्दिवहंसेनगनिगतं तद्दिनादारभ्य अस्यनलस्यप्रायोबाहुल्येनदाक्षिणात्यजनेषेव । दक्षिणदिग्वासिपथिकेष
वर्णीतिरभूत ।। तथाविदर्भदेशस्यनामापिपुलकैरोमांचमकरोत् ।। तथाश्रवणयोः कर्णयोः श्रुतापिदक्षिणदिक् स्मरवमजीजनत्
उत्पादयामास किंबहुना ।। किंबहूक्तेन ।। लिखितेतिवृत्तं ।। दक्षिणादिक् तस्यनलस्यकर्णयोः मनसोदृशोरीदृशी आसीत् किंभूताउत्प्रे
क्ष्यते । अमृतपंकेनलिप्तेवदिग्धेव ।। तथा आनंदस्यकंदल्याः प्ररोहास्तैः घृष्टेवस्पृष्टेवतिप्रागंतरंपरमाल्हादजनकत्वादितिभावः
।।१८।। दमयंत्यपिहंसदर्शनदिवसादारभ्य आसन्नोद्यानलतामंडपेषु निकटवर्तिनस्यक्रीडादिलतामंडपेषु नविहरतिनविचरति ।
किंभूतेषुलतामंडपेषु भ्रमसंचरद्द्भृंगकुलं भ्रमरसमूहस्तस्यकलकलेनझंकाररवेणउन्नादितामुखरितमःपर्यंतःप्रांतोयेषांते
तेषु । तथाप्रस्यग्राणिनवानिउल्लूनानि । त्रोटितानियानिपुष्पाणिपल्लवाश्चकिसलयानितेषां आस्तराणिनिस्तरायेषुतेषु ।।
तथाविलसंतः क्रीडामिव विनोदनकौतुकवि हंगाः पक्षिणोयेषुतेषु तथानि । क्रीडासरसि क्रीडतिस्खलतिकिंभूतक्रीडासरसिविकचानि
मकासानियानिकुवलयानि । नीलासन्नानिवकस्काराणि च सौगंधिकानिकुसुमयानि कमलानितैः सारेप्रधानं वारिपानीयंयस्य
तत् ।। तस्मिन्नत थारणत्शब्दं कुर्वन् ।। चटुलचंचरीकाणां चंचलालीनां चक्रवाकाणां च चक्रवृंदंयत्रततत्तस्मिन् तथामाणिक्यमालामं
डनानि माणिक्यानां रत्नानां यामालास्ताएव मंडनानि अलंकारास्तानिपाणिनापिनस्पृशति ।। तथारुचिराः स्फुरदशा या अलकवल्लरी व
णीदंउस्तस्या अंगानरेषु विक्षिप्तंनरालेषु उन्मिषंति विकसंतियानिकुसुमानि तेषांविन्यासान् रचनानिनरचयति । नकरोति ।। तथाकोम
लोमृदुः यः कपोलयोरवष्टंभोगंडस्तंभनत्याश्रयतियत्तथाभिधाकांचिदपिकस्मिंश्चिदपिउच्चैउन्नतेयतहंसतुलीतुल्यंहंसतुली
शय्या । तस्मिन्न चनिद्रासुखं अनुभवति । नकरोतिनिद्रातीत्यर्थः केवलंपरंएवंविधासतीसादमयंती अनंगेनकामेन अभ्यंचूयत
पराभूयत् किंभूताविरहात्पांड्वांगंडपालिः कपोलोत्संगस्तां अधिकृत्य अधिपांडुगंडपालिकपोलेनिहितोन्यस्तः पाणिपल्ल

नै० ह० वोषयमादन्तकोलहस्मा एवंभूता सतीप्रतिक्षणंप्रतिसमयं उत्तरस्यांदिशिदृशंनेत्रंप्रेषयंतीददती ।। पालिर्य्यकाश्चिपंक्तिषु ज्ञातउम
११६ श्रुस्त्रियाप्रांते सेनाकेल्पितभाजने ।। प्रशंसाकूर्णलनयोरुत्संगप्रस्रुडचिन्हयोरित्यनेनार्थः ।। तथातद्देशागतान् ।। उत्तरानिवृदाया
तान । गगनपदिशांपि । सस्पृहं साभिलाषं यथाभवति तथापश्यंती अवलोकयंती । नलोक्तानिवाक्यानिश्रुत्वा ।। आगनाभ
विष्यंतीत्यभिप्रायेण । तथातत्रत्यान् । उदीच्यान ।। अध्वगानपि पथिकानपि बंधुप्रीत्या । स्वजनस्नेहेन । आलापयंतीसंभाष
यंती यथाबंधुभयकरालापेन । भाष्यते ।। तथातानपि । तथातन्मंडलागतायउदीच्यदेशागतायमरुतेपिवायवेपि अर्पनीतंदूरीकृतं
उत्तरांशुकंउपरिवस्त्रं यया सास्तंभता सतीस्वयमात्मनाहृदयंवाक्षो अर्पयंतीददतीवक्षः स्थलंनिर्वस्त्रीकृत्य ।। उदीच्यं वायुमपिस्पृ
शतीत्यर्थः ।। तदंगस्पृष्टस्तद्वायुरागतो भविष्यतीति अभिप्रायेण तथाहीति ।। तदेवं अनंगस्याभिभवनं तस्यादर्शयति ।। अरविंद
मंदरदशः कमलविशाललोचनायाः अस्यादमयंत्याः साकाप्यनिर्वाच्यादशाअवस्थाजज्ञे । ज्ञातानामेति । संभाव्यते । यस्यांदशायां
नयनयोः नेत्रयोः विषयलास्यंनृत्यं क्रियमाणंपांशुकणइव । रजोलवइव । आचरतिपांशुकणायते । अक्षमत्वकारित्वात् तथायस्यां
वल्लकीवीणाश्रुतः श्रोत्रस्यशल्यंभल्लीव । तथायस्याकुचयोः पयोधरयोः सचंदनरसाः चंदनद्रवसहिताः ।। कर्पूरवारिच्छटाः घ
नसारघनरससेचनानि नाराचाः लोहबाणप्रहारतुल्याः । तथायस्यांदशायां केवलमसहायं कथं वनलवार्त्तेव । प्राणानामसूनांत्राणे निर्व
धनं कारणं अभूत । प्रियकथैवतस्याः जीवितमधारयदित्यर्थः । नामप्रकाश्यकुत्सयोः संभाव्याभ्युपगमयोरलीके विस्मये क्रोधोत्प
नेनार्थः ।। १९ ।। एवममुनाप्रकारेण अन्योन्यंपरस्परंप्रेषिताः मुक्ताः प्रच्छिन्नाः गुप्तायेदूतास्तेषांउक्तिभिर्वचनैः विवर्द्धिताधिकीभूतोनु
रागः प्रेमानुबंधोययोस्तौनथाविधयोरनयोर्दमयंतीनलयोः । अंगानिशरीरावयवा श्वर्लंति । नमनोरथाश्वलंति । तथाचक्षुः परिवर्त्त
ते । नांदिअंनति अभिमुखीभूयनिवर्त्तते । नहृदयंचेतः परिवर्त्तते ।। तथाअंगयष्टिस्तनुलताउलातालानवं पतिप्राप्नोतिनोत्कंठा ।। कृशता
मेति । उत्कंठादिनेदिनेधिकाजायतइत्यर्थः ।। तथाउत्साहप्रगल्भतामंदता अत्यंतंयात्याप्नोति दिने २ उत्साहः स्तोकः संजायते । नाभि राम
लाषवांछा अल्पीभवती ।। तथानिस्सहताविरहस्य असहनास्फारीभवतिविशालाजायते दिने विरहः सोढमशक्यो जायते ननिद्राप्र ११६.

341/1133

मीलास्फारीभवति । विरहान्ननिद्रातइत्यर्थः ।। तथाचिंतानत्स्मरणंवर्द्धतेनरतिः । कस्मिन्नपिवस्तुनिरागोवर्द्धते । तथाअधरप
ल्लवो विरहाच्छुष्यतिन आग्रहरसः असक्तिरागः शुष्यतिदिनेदिने तयोरन्योन्यमासक्तिरसोवर्द्धतेइत्यर्थः ।। आग्रहोनुग्रहेग्रहे ।।
आसंगाक्रमणयोश्चापीत्यनेनार्थः ।। किंबहुनाकिंबहुकेन । कर्पूरेति ।। अन्यदपरंकिं तयोर्नलदमयंत्योः काप्यनिर्वाच्या अवस्थाप्र सा
भवत् यस्यामवस्थायां चंदनंश्च चंद्रश्च चंपकदलानि च चंपकपत्त्राणि तेषां याश्रेणिः पंक्तिः सा आदिर्यस्य कर्पूरादेस्तत । चंदनचं
पकदलश्रेणिकर्पूरप्रभृतिवन्हिरिवाचरतिवन्हीयते । तानिशीतान्यपिनयोर्दुःस्सायंतइत्यर्थः ।। किंभूतयोस्तयोः । कर्पूरांबुनिषेकं घन
सारद्रवसेचनं भजतियसः तस्मिन् । कर्पूरद्रवणसिक्तइत्यर्थः ।। तथासरसैः आर्द्रैः अंभोजिनीनांपद्मिनीनां दलैः पत्रैराकीर्णेपि
आस्तेपि ।। तथास्त्रस्ता विक्षिप्ताः स्रग्मालायस्मिन्सतथा तस्मिन् । एवंविधेपि स्वस्तरे । स्वास्थ्याभावात् । विवर्त्तमानं वामपार्श्वा
द्दक्षिणपार्श्वे । दक्षिणपार्श्वाच्च वामपार्श्वेपरावर्त्तनं कुर्वाणंवपुर्ययोस्तौतयोर्विवर्त्तमानवपुषाः । पुनः किंभूतयोः मंद्रोन्मेषाअल्यो
न्मीलना दृक्दृष्टिर्ययोस्तयोर्मंदोन्मेषदृशोः । दृशाम्बागुन्मीलयंतः ।। २० ।। आसीदिति । चपुनः ।। कृतोन्योन्यंपरस्परं यो गुणानांप्रश्नाक्षे
पः प्रश्नाभाषणं सएवजपोजाप्यं यकाभ्यांतयोः तथाच्छिन्नकृतावर्त्तितंवचनमुक्तंभावेक्त् । पुनः पुनः कथनेन परावर्जितं नामधेयं
नामैवस्वाध्यायोयाभ्यांतयोः नलदमयंत्योर्नामपुनः पुनः कथयतिदमयंतीचनलस्येत्येवंविध एव यः स्वाध्यायः तंकुर्वतोः
तथासंकल्पेचित्तकर्मणि । यः समागमस्तत्र आवर्द्ध्यानं यकाभ्यांतयोः ।। तथास्मरानलेकामाग्नौ स्वहृदयंस्वचेतोजुह्वतोर्हो
मयतोस्तथातप्यमानयोः संतापमनुभवतोः तथाकृतंमौनव्रतं यकाभ्यांतयोर्मौनिनोरपितयोः दमयंतीनलयोर्वियोगो विरह
एवआसीन्नयोगः योगः संबंधो ध्यानविषयश्च । अन्यस्ययःतपस्वाध्यायंध्यानहोमंतपोमौनव्रतंचकुर्वतोयोगलाभः स्यात्
अनयोस्तु वियोगएवभुवनयोग ।। इति अपिशब्देनव्यज्यते । तप्यमानेपि । संतापपक्षे कर्मकर्त्तरियगात्म अन्यत्रतुकर्त्तरिनेपदादि
नपः कर्मविषयत्वात् । कदाचित्तु कस्मिंश्चित्प्रस्तावेदमयंत्या । एवंविधांयौवनावस्थांतारुण्यदशामवलोक्य विदर्भेश्वरोभीमः कोन्य
स्याःदमयंत्याः किलेति संभावनायां अनुरूपोगुणादिभिः एतत्सदृशः । पतिर्भवेदिति ।। अमुनाप्रकारेण चिरंचिंताकुलः संचिंत
मन । स्वयमात्मनास्वयंवरकर्मप्रारंभाय । स्वयंवरविधिविधानाय । मंत्रिभिः सममंत्रनिश्चयंगुप्तवादनिर्णयंचकार । व्यधात् ।। मंत्रोहि

नै० टी०
११७

देवादिमाधनेवदांऽऽगुप्रवादेचेत्यनेकार्थः॥किंभूतांयौवनावस्थां।तरुणजनानांनयनान्येवकुरंगास्तेषांवागुरेव।मृगबंधनमिवयासातांय
थावागुरयामृगाबध्यंते।तथानयायुवनयनानीति॥तथाअनंगःकामःसएवगजेंद्रस्तस्यमदप्रवाहस्य।तेव्रवाद्यविशेषइवयासातांयथा
गजेंद्रस्यमदप्रवृत्तेःयक्कभवति।तथाइयंकामस्यमदप्रवृत्तिकारिणीअस्यांदृष्टायांकामःस्फीतोभवतीत्यर्थः॥तथाअपहसितनिरस्कृ
तास्कराकरसुंदरीणांरूपश्रीःसौंदर्यलक्ष्मीर्ययासातां।तथाशृंगाररसस्य।राजधानीवस्करवावरुढानहेतुत्वात्यासतांततोमंत्रिभिःमंत्रक
रणानंतरंविदर्भश्वरानचिरात्तत्क्षणेनैवकालेनप्राच्याःप्राच्यांपूर्वस्यांभवाःप्राच्याःउदीच्याःउत्तरदिगुत्पन्नाःतथाप्रतीच्याःपश्चिमदिगु
त्पन्नाः।तथाप्रतीच्याः दाक्षिणात्यादक्षिणदिगुद्भवास्ततोइदृएवंविधायनरपतयोराजानस्तेषांनिमंत्रणायआह्वानायसाप्राभृतानदृढ
कनिकासहितानप्रगल्भःप्रौढःप्रश्रयःस्नेहस्तयुतंतथानप्रधानांबान्नरांस्तदक्षायप्रेष्याद्दूताःतानप्रेषयामाससुमोच॥प्राच्येति॥घुप्राग
पागुदक्प्रतीचोयदितियत्॥दक्षिणात्येति।दक्षिणापश्चात्पुरसस्त्यगितित्यक्जातादौ।तेषांमध्येउदीच्यनरपतिनिमंत्रणायप्रस्थितंच
चलितं।कंचित्प्रबुद्धोपंडितोवृद्धोनलस्तयाब्राह्मणस्तंप्रतिदमयंतीआप्तसर्वामुखेन॥यथार्थवाक्यस्याद्वारार्श्लिष्टार्थंद्व्यर्थमिदंवक्ष्यमाण
मवादीत्॥नृपालेतिवृत्तं॥नातेतिसंबोधनेहेतातभूपालामंत्रणं।तथात्वयासंवर्यतां॥तथाप्रवर्त्यतां।यथागमबुद्धिःआगमावगतिः।आत्म
प्रतीतिर्लोप्यानिषधानस्यान्इतिवाद्योऽस्यर्थः।इष्टार्थस्तुनलनामापिनृपो।यथाआगमनबुद्धिर्भवेदिति।अतःपरंइतोप्यधिकंकिंप्रार्थ्यसे
किंयाच्यसेनकिमपीत्यर्थः॥२१॥सोपिब्राह्मणोदक्षत्वात्अवगतोज्ञातःश्लेषकस्यपद्यस्यअर्थस्तात्पर्यंयेनसतथाविधःसन्॥तथाविध
श्लिष्टमेवकंप्रत्युत्तरंप्रतिवचनंअदात्कनापीतिवृत्तं॥अहंकेनापिअकुतेनव्यवहारेणव्यापारेणतथाकयापिप्रौढलीलयाप्रगल्भविला
सेनआगमस्यशास्त्रस्यअर्थतात्पर्यं।नलंघनंअतिक्रमणंकरिष्यामीतिवाद्योर्थइष्टार्थस्तु।आगमनस्यार्थेनिमि[illegible]रभसेनोत्सुक्येनघ
नंविस्तरेणलंघनंनृपंकरिष्यामियथाआगमननिमित्तंअस्यत्वर्कोभविष्यति।तथाविधास्यामि।आनेष्यामीत्यर्थः॥२२॥नदित्युपसंहारे।तस्मा
तहेआयुष्मतिदमयंति।भवतीसत्वरमास्तां।सुस्वतिष्ठतु।इतिउक्त्वाकारणअभिधायउक्त्वागतवान्॥अथानंतरंनातिचिरेणस्तोकेनैवका
लेनतत्रगत्वाआगतस्तत्रस्थयादमयंत्यादृष्टवतंसमाहूय॥आकार्यसामशर्माब्राह्मणःसामसभाचंद्रवशीतलायानर्मालापलीलापरिहा राम
सवचनविलासस्तयाहेतुभूतयावभाषेउक्तः॥आहूतेति॥आहूताआकारितादीच्यभूपाउत्तरदिग्भवनृपायेनसतथाविधेन॥तथातो ११८

343/1933

देशंपिआंदशंविदधातीत्येवंशीलस्तान्नादेशकिंधार्थानेनत्वयाहेविद्वनममअलीकापिअसत्यापिवार्तानिआवेदिताकथिताइतिबाद्योर्थः
अंतरंक्नलस्यनपश्यंतीलीलावार्ता।साकापित्वयानआभ्यर्थितासापि॥ब्राह्मणःएषोअहंकथयामिहेकयापिकुंडलेद्व्यर्थवचनविलास
दक्षश्रयतांइतिअभिधाय।विरमन्किंचिद्धास्यंकुर्वन्।आख्यातुंआरब्धवानप्रायतत्।इतस्थानान्निर्गत्यनिःसत्यमयामंडलेश्वरा
णांमुदिव्यनृपाणांआमंत्रणस्याह्वानस्यय।क्रमःपरिपाटिपूर्वंतेषांआह्वानं।पश्चात्तेषामित्येवंरूपातेनपरिभ्रमता।पर्यटतासता
अन्यंकपाणिअन्यंकोणिलिहानि।अत्युच्चानि॥अनेकानिबहूनि।यानिकुटानि।शिखराणितेषांयाःकोटयोऽग्रभागास्ताभिः
यद्वाकोटिसस्व्याविज्ञापकस्तयारूक्षपुटत्वंविषमोन्नतारुक्षपुटितस्तारकादित्वादितच्॥एवंविधःकटाकोनितंबोयस्यासौएवंभूतस्य
निषधनाम्नोमहीध्रपर्वतस्य।संबंधिनीषुदक्षिणारण्यरुक्षलीषुमृगयायामासक्तोलग्नः॥माद्यादितिपद्य।एकःकोपिमनोहरःसुं
दराकृतिःपथिमार्गेसयुवाद्दष्टः।यस्मिन्यूनि।सकृदेकवारंदृष्टेसतिनष्टःकौतुकावलोकनाकृतोनिमेषाक्षिसंकोचोयस्याःसात
याविस्फारितयाममदृशाजन्मनःउसंतःफलंलब्धं।तद्दर्शनेनसाफल्यकृत्यामभूदित्यर्थः॥किंभूतायुवामाद्यन्दृप्यन्मांसलोस्तुंग
उन्नतायःपुंगवःपुमांश्चासौगौश्चपुंगवः॥वृषभइत्यर्थःतस्ययत्ककुत्स्कंधशिखरंतद्वदुन्नतंअंसरुक्षलंस्कंधौयस्यसपुंगवेति
गोरतद्धितलुकीतिगोंतात्तस्पुरुषात्टच्समासांतः॥तथाकालिंदीजलवद्यमुनानीरवत्कांतिःकृष्णाछविर्येषामीदृशाःकुंतलाःके
शाःयस्मिन्नेवंविधोशिरोयस्यस।तथापूर्णइंदुबिंबवत्राकाशशांकमंडलवत्।वर्तुलंआननंमुखंयस्यसः॥२४॥तेनापियूनादक्षि
णात्योयमिति निश्चित्यनिर्णीयसाभिलाषंसस्पृहंयथाभवतितथा।अस्मिअहंआभाषितावादितःमयापिकृतउचिता।ब्राह्मणकुशल
प्रश्नःक्षत्रबंधुनमनामयंवैश्यंक्षेमंसमागम्यशूद्रमारोग्यमेवचेति।मनुवाक्यात्क्षत्रिययोग्यआलोपेनामयत्वंप्रश्नरूपंअभाषणंयेन
सतथाविधेनउक्तः॥यथेतिहेभद्रकल्याणिनतवलोकलोचनानाआनंदमाल्हाददातीतिलोकलोचनानंददायिनी।यथायेनप्रकार
णइयंआकृतिःआकारोदृश्यते।सत्यमवितथ्यंतथातेनप्रकारेणमनशोभनस्त्यागोदानंयस्यस्यसत्यागोवर्तसे तथानलंलोभवा
न्आसीत्यव्ययंयुष्मदर्थे।पक्षेसत्यागस्त्वंतथानलोनलाख्योभवानिति॥पृथक्वाक्यद्वयंएकवाक्यतायांतुभवानसीतिमध्यमपुरुषाभाउ
लेभः॥२५॥एवममुनाप्रकारेणउक्तः॥सोपियुवामनाकृदपतमुग्धस्मितमेवरम्यहास्यमेवांतरंकल्पितवान्चिंतितवान्अब्रुवन्इत्ज

नं॰ टी॰
११८

हामित्यर्थः ॥ अथानंतरं तद्वितीयः स एव नल एव द्वितीयो यस्य न तु द्वितीयः नलस्य सखा यद्वा तस्मान्नलाद्वितीयो अन्यस्तद्वितीयः यद्वा स एव न
लएव द्वितीयस्तद्वितीयो नलसमानो युवा तेभ । सोदन्यं यस्मिन्नदेशे न नलस्तमेव प्रदेशे आयातवान् । आगतः किंभूतः प्रथमवयो विशेषेण
नवयौवनारंभेण विभूषितं अलंकृतं अंगं यस्य सः तरुण इत्यर्थः । तथा तुंगमुन्नतं तुरंगमश्वमारूढः तथा गाढमत्यर्थं ग्रथितो बद्धः प
रिकरः कटिवेष्टनपटो येन सः । तथा करे अग्रायेण कोदंडं धनुरास्फालयन् टंकारयन् ॥ आगतश्च बालाः नत्य अनीला नीलवर्णा येन ल
ता : आहुल आश्र बालतृणानि तैः आलंन इत्येवं शीलस्तस्मिन् । तथाभूते शीलो अयस्य पर्वतस्य यः स्थलीप्रदेशस्तस्मिन् । कांचित् का
चनकुंभवत् । गौर्वर्णकलत्र अवतांतो मनोज्ञो यो कुचकुंभौ तयोर्विलितापरिवर्तमाना कुसुममालिका यस्याः सा तथाविधां गोपबालिकां अव
लोक्य अन्यिदमवादीत् । हे सुवराम कुमार नृप पश्य अवलोकय ॥ नद्यायेति ॥ विभ्रमोदभौ यस्यां सा विदर्भा तस्या नद्याः सरितस्तीरे ए
पा अन्यस्याः कापि आनीरिका नाम्नी गोपालबालिका गोपीवत्से रवं नलं तृणविशेषं क्षेत्रीकृत्य केदारीकृत्य समुद् सहर्षा सती गाः धेनूः चारयती
॥ एतत्पुत्रोक्तं आकर्ण्य श्रुत्वा कश्चन को नया मयाप्युक्तं हे महानुभाव न केवलं इयं गोपालबालिका अन्यापि कापि कापि नवा इति विद
र्भा अभिधायानत्र तीरे कापि महद्भाव महिमा गोपालस्य राज्ञो बालिका सुता नलं सजानं वरं वरयितारं क्षेत्रीकृत्य आश्रयीकृत्य याः गिरः स
म्यगुच्चारयति वरई या यां पर्वत इति वरः क्षेत्रं सद्भिः ॥ २६ ॥ इत्यमुना प्रकारेण उक्तं तं मामवलोक्य भावितार्थः यदयं नलमधिकृत्यैवं व
दतीति विदितपरमार्थः ॥ स पुरुषस्तु वा सस्मितं सहास्यं यथा भवति तथा अवोचत् ॥ इयं च सा न ॥ अनुभवेति ॥ गोपपुत्री गोपालिका क्षीरस्य दुग्ध
स्य सपरिणामानि परिणताभियानि फलानि दधिघृततक्रैरादिप्रभृतीनि तान्यनुभवतु ॥ आस्वादयतु किंभूता चिरायचिरकालं चंचला लोला
गौ चारणवशात् यस्याः गोप्याः संश्लेषपधेनुरागो महासमनदेतुनाकथमपि केनापि प्रकारेण न अपसरति न निवर्त्तते । श्लेषेतु गोपपुत्रीरि
प पुत्री दमयंती स आचंचलाक्षी चंचलनेत्रा अंगनादिरसपरिपाकफलान्यनुभुंक्तां यस्याः सात्रनंमहोदयेन महाप्रयत्नवती । नैषधे नले नुरा
गोप्रबंधः कथमपि नापसरति ॥ तत्रैवानुरागः प्रवर्त्तत इत्यर्थः ॥ २८ ॥ अस्ताभिति ॥ तावदादौ अन्यदपरं वचस्तद्वचस्यांतरे आस्तां तिष्ठतु
हे अधुना कथय कुतः कस्माद्देशात् तं पृच्छ्योसि कुतो समागतोसीत्यर्थः ॥ तथा किंच कियत् । कियत्प्रमाणं अद्यापि कर्म अतिक्रमितव्यं उल्लं
घितव्यं इत्येवं पृच्छितं स्ववृत्तांतं यत् आयतं यथावद्गंतव्यमित्येवं रूपं येन स तथाविधेन मया पि इति पर्यनुयुक्तः पृष्टः स पुः श्रुतशील उक्त सम
वान् ॥ इतीशिदंचो अशेषमनुष्याणां समस्तमनुष्याणां मस्तकमणिरिव चूडामणिरिव यः स प्रधानस्तान् ॥ तथाचपुनः स्वसंज्ञाप्रकारेण स्ववुद्धि ११८

345/1933

वैभवन पराभवेनात्मनि निर्जितो पुरंदरगुरुर्बृहस्पतिर्येन ईदृग्विधो भवानपि कः ॥ हे साम्यकंदर अयमसौ समस्तानि यानि शास्त्राणि
च आगमाः ॥ शास्त्राणि च आयुधानि तेषु कोविदो दक्षः तथा विदारिता विध्वस्ता वैरिणो येन ईदृशो वीरसेनस्यापत्यं वैरसेनिर्नलः किं
मन्यत् अहमपि श्रुतशीलनामा अस्यैव आज्ञाकारी आदेशकारीत्यभिधाय विश्रांतवान् विरामान् तूष्णींभाजेत्यर्थः ॥ वैरसेनि
रिति ॥ अतइञित्यपत्यार्थे इञ् ॥ नलो पितदमयंत्यैव आश्रयो या सांतरास्तदाश्रयास्त्वामधिकृत्य प्रवृत्ता इत्यर्थः ॥ तास्ताः प्रकटि
ताः प्रकामिताः प्रेमकंदलाः स्नेहप्ररोहा यासु तास्तथाविधाः कथाः कृत्वा ॥ च पुनः स्वयंवरामंत्रणं समर्थ्य यद् दहमेष्यामीति अं
गीकृत्य उत्कंठया तत्कालं तस्मिन् समये उद्दीयस्व आगंतुमीहमानो वांछन् तथा संभाषितेन आलापितेन स्मितेन ईषद्धास्ये
न आलोकितेन वीक्षितेन च मामतवर्षणपीयूषसेचनेनेव आह्लादयन् आनंदयन् सन् अनिच्छंतं अनभिलषंतं अपि मां अनर्घा
णि बहुमूल्यानि स्वागाभरणानि हारकेयूरादीनि बलाद्धटात् मीतिग्राह्यं च ग्राहयित्वा चिरादेव व्यसर्जयन् मुमोच स्वयं च मृगयायां
व्यसनमासक्तिर्विद्यते यस्या सौ मृगयाव्यसनी तद्भावस्तया आखेटकरसिकतया मृगयालुभिराखेटकारिभिः सह ॥ धीरमिति ॥
धीरमन्नासं रंगंतं चलंतं तथा रहसि वेगं सारमुत्कृष्टमीदृशं वाजिनमश्वमारुह्य अधिष्ठाय गलकंठहयं गुणं बिभ्रत् बिभ्राणः स्वै
रं स्वच्छंदं तं कौरिं पुनरप्यगादयात् ॥ ३० ॥ तदित्युपसंहारे हे आयुष्मन् इह चिरं जीविनि स्वामिसुतभर्तृदुहितर्यथायेन प्रकारे
ण मया तस्य नलस्य यः कथाप्रश्न भवद्वार्त्ता प्रच्छन्नानुरागस्तत्कथाप्रश्नानुराग उपलक्षितो ज्ञातः तथा तेन प्रकारेण निश्चितमचिरा
त् अयं नलः एष्यतीति अभिधाय स ब्राह्मणः सोमशर्मा स्वगृहमगात् । गत च तस्मिन् ब्राह्मणे दमयंती इत्यमुना प्रकारेण चिंतयती कान्यपि
दिनानि कृयाप्यनिवाच्यया अवस्थया । दुःखावस्थानेन अनैषीत् । अतिवाहयामास इतीति किंसकः । श्लाघ्यः प्रशस्यः । कालः तथास
कतरा धन्या वासरा तथा सा कामलक्षणा लक्षणापेता शुभलक्षणेति पाठांतरं । नामेति कोमलामंत्रणे । वेला यस्यां वेलायां अस्य स्वक्षस्त
स्य नलस्य आलोकनेन वीक्षणेन कमप्यद्भुतमानंद आह्लादमनुभविष्यति । कमिति कुमिवाइंदुदर्शनेन कुमुदमिव यथा चंद्रदर्शनेन कु
मुदं कैरवमाह्लादमाप्नोति ॥ अथानंतरं नलापितत्कालमेव । तत्समयमेव विदर्भमंडलाभिमुखं दर्भदेशं प्रति । उदवलत् ॥ प्रतस्थौ किं
भूतस्तेन ब्राह्मणेन आमंत्रित : तथा रणरणकेन च । उत्कंठया च आमंत्रितः ॥ आहूतः तद्दिशायै उत्कंठापि जातेत्यर्थः । तथा मंत्रिणा श्रुतशी

चं०टी०
११०

लेनत्रमित:।यथास्वामिन नत्रगम्यतामितिमदनेनचकामेनचप्रेरित:।मदनानुगा जाता इत्यर्थ:।तथासेनयाचमापरिवृत:परिकरित:
नथाउक्तंच्याचवांछयापरिवृतो वेष्टित:।तस्यमांछा वभूवेत्यर्थ: नत्रैवचलितेचमति।चलंतौ गच्छंत: पर्याणिता:तस्ययर्नीतास्तु
रंगा: माश्चर्यमाकुतयथाभवतितथाचक्रामा चक्रु:।शुशुभिरेकिंभूतैनस्तै चतुरंगबलस्य हस्त्यश्वरथपदातिरूपसेनायाश्चलेन
नचक्रमणेनचूर्णितं पिष्टंशिलो च्चयानां गिरीणांचक्रवालंवृंदंयेनमतस्मिन्।एतावतासेनाबाहुल्यमुक्तं।तथाचक्रिचक्रस्यस्यं
दनमग्रहस्यचत्वंक्रमणंगमनंतस्मिन्यथाश्रीत्कारस्तैनबधरिता:शब्दांतरश्रवणागोचरीकृता:ककुभोदिशोयेनसतस्मिन् त
थाविषमंदु:सहंचंद्ररिपुंदंमत्यर्थिसमूहस्तदेववनंतेवघनानलइवचवन्हिरिवय:सतस्मिन् यथावेघृतानलेनवनंभस्मसा
तन्क्रियते।।तथायनेवैरिवृंदंनिहतमिति।।एतावतास्यशौर्याधिक्यंवर्णितं।किंभूतास्तुरंगा:चटुलतरा अतिचंचलायेखुरण
प्रहारा:।खुराघातास्तै:रणितंशब्दितं।धरणीमंडलंभूतलंयैस्तै।तथाकांतामनोज्ञायाकांचनस्वनामुखादिविभूषायेसौव
र्णभूषणपरिधायनेनयाशोचिर्णव:शोभनशीला:।।तथाचक्रवर्तिन:सार्वभौमस्यवाहनायधारणाययद्वाचक्रवर्त्तिनोवाह
नानीचपत्राणीवउचितायोग्या:प्रधानाइत्यर्थ:।तथाअपर्यंतविशालाहृदयादय:पर्याया:धर्मा:येषांतेयद्वाअपर्यंतोदीर्घ:प
र्याणनिर्माणंयेषांते।अत्यत्युच्चाइत्यर्थ।।यदनकार्थ:।पर्यायावसरेकर्मनिर्माणद्रव्यधर्मेषुचेति।।तथाशृंगारिताश्चविभूषिता:इभेंद्रा:
महादन्तिनोभ्रवंकंपयांबभूवु:।कंपयंतिस्म।किंभूताइभेंद्रा:चलतिचलनवल्गादेजमानेचारुणीमनोज्ञेचामरेयत्रतथाअवचुल
भ्यांअथामुखकूर्चकाभ्यामलंकृतामंडित:पश्चात्कर्मधारय:इद्यश्चधायाकपालभित्तिभागोगंडस्थलंतत्रमीलिता:समवेता:येभृं
गास्तेषांसंगीतकझंकारारवणमुखरितंवाचालितंमुखमंडलंयेषांते।तथाकथमपिमहताकष्टेन आधोरणेनहस्तिपकेनिरुध्यमानं
निर्वार्यमाणंशौर्यविस्फारस्यमदवशात्गमनचांचल्यस्यविस्फुरणंव्यापारोयेषांते।तथास्फुरद्दीप्यमानंकुंभभित्तौसिंदूरंनागजं
येषांते तथाइरअपसारिता:अपनीता:स्यंदनारथायभ्यस्तैतथास्यंदमान:क्षरनअमंदोअनल्पोयोमदोदानंतेनकर्दमितापंक्ति
कृतामदिनीभूर्यकैः।वहवोनाह:किंभूतांभुवंभूरिभारेणबहुविवधेन।भुग्नंरुग्नं।कुब्जीभूतं।अंगंशरीरंयस्यइदृशोय:पन्नग:शे राम
षस्तस्यपशिराम्।दृढ़ोनदवशिथिल:अदृढ:अवष्टंभ:आधारोयस्या:साता।।भूरिभारमसहमानेनशेषेणवपु:वक्रीकृतंतेन ११९

347/1933

आश्रयति॥ अस्तं अस्तगिरिं भाजातीत्यर्थः॥ किंभूतं उत्प्रेक्षते। भवत्या निश्वासपवनस्य या परंपरा अविश्रांतं निर्गमस्तया पर्यस्त
इव परिक्षिप्त इव अन्यापि कश्चित् बलात् पर्यस्तो भवति सोपि पतन् विविध हस्तावलंबनं स्तंभादि आश्रयति॥ तथायमपि हस्ताभ्यां अ
वलंब्यते। यत्तत् हस्तावलंबन॥ तथा हदवाउयं वासरश्रीः दिवलक्ष्मीः पिहितं आच्छादितं श्रवणानस्त्रविशेषो यस्याः एवंविधा सती राम
दूरीभवति दिगंत मित्यर्थः उत्प्रेक्ष्यते सो भाग्यनत्वालोत्रा भतदस्य शीलं सौभाग्यशालितमिन्न नलेनिलीनं निविष्टं चित्रं यस्याः एवंविधा १७९
या लवल्लोकपालश्च पार्थिवश्च आलवरुवचनयोः संबंधि नं प्रार्थना यति क्षतं याश्वासंबंधं आकर्णलज्जितेव॥ श्रीतित वासरश्री रितिचिंतय

459/1733

ति॥ लज्जितयं नलेनिबद्धरागा अयं च लोकपालाः पार्थिवाश्च मां प्रार्थयंते॥ अहो असमंजसं इति॥ लीलावतीव सती पिहितश्रवणा दू
री भवति॥ अन्यापि एवंविधा अस्त्वंभत्वापि हितश्रवण कर्णौ पिधाय दूरे गच्छतीति॥ तथा हे देवि तव विलासस्य वयस्याः सख्यः
सरसीसरोरुहिण्यः उभानि कमलानि लोचनानि नीवसंकोचयंति निमीलयंति एताः कि भवत्या विलासकरणात् विलासवयस्यात्व
मेतासां किंभूतानि कमलानि निश्चलानि भूता मिलिना अंतः प्रविष्टा ये मधुपालः निपीयमानं आस्वाद्यमानं भंगमधु अंतर्व
र्तिमकरंदाय धुतानि कमलानां लोचनोपमानं भृंगाणां चनास्कोपमानं संसर सीसरोरुहिण्यः किंभूताः उत्प्रेक्ष्यते। संविभागीकृतो वि
भज्य गृहीता विषादो याभिस्ता एवंविधा इवमन्यसरः पद्मिनीभिरपि स्वकमललोचननिमीलनाद्भवद्विषादो वेटित्वा गृहीत इतित
व विलाससखीत्वात् अन्या अपि सख्यः सखसख्या विषादे विषादिन्यो भवंति॥ तथा हे दमयंती च पुनः। इमा दिशाः श्यामायंते।
कृष्णा भवंति उत्प्रेक्ष्यते॥ अस्माकं दिशांपतयः असमसतयः अस्मल्लिया कथं मनुष्यकन्यां कामयंते अभिलषंति इति ईर्ष्या च शोक
श्च तयोर्वशादिव॥ हीनकन्याभिलाषे ईर्ष्यां तत्परिणयने च शोकः अन्यापि पूर्वप्रिया अपरां स्वलावमां प्रियां प्रत्यभिलषुकं प्रि
यं दृष्ट्वा ईर्ष्याशोकवशात् श्यामावनाजायंते। न न तस्मात्। देहवि अयं पर्वतः प्रेष्यतां प्रियं प्रतिमुच्यतो॥ तया दमयंत्या विसर्जितश्च अ
हं इति चिंतयन् अलसाल्वसं मंदं मंदं असमंजसेन। अनाश्लिष्टेन। प्रतिकुशीलये पांते असमंजसपातिनः एवंविधः पश्चिम मुखैरिव
पादैरिव आयातवान् पश्चिममुखा हि पादा असमंजसपातिनो भवंति। इतीति किं अस्मीत्यव्ययमहमित्यर्थः अहं तत्कालं तत्समयमेव
आविर्भवन् अकटीभवन् यो विशादस्तदुःखं तेन संपन्नं आतं मौनं यस्याः सा एवं विधाया भम्या न पुनः संभाषितो वादितः तथा अस्मी अहं
न पुनर्वीक्षितः नचान पुनः पूर्वप्रियवार्त्तादितश्च पुनः किमपि नलं प्रति न संदिष्टं न संदेश उक्तः केवलं परं चलन् यो नेत्र विभागप्रांतः
तस्मिन् तरंती चंचला तारा यस्यां सा तथाविध या दृष्ट्या नेत्रेण समवलोक्य समुत्तानितं उन्मुखीकृतं यत्करमंकलं तस्य संज्ञयैव संकेतेन
व कथंचिदमिति संभाषित इति इत्युपसंहारे तस्मात् हे देव॥ दमयंती इमं। देवहूतकार्यस्य यो अंगीकरणव्यतिकरः स्वीकारसंबंधस्तं आ
कर्ण्य श्रुत्वा परं प्रकर्षं विषादं मनः पीडां आपद्यत प्राप्ता॥ अन्यच्च॥ अपरं च॥ मन्ये चेति॥ न पुनरहमेवं मन्ये संभावयामि परीतिदेव्यां भैम्यां
विषीदंत्यां विषादं मनः पीडां प्राप्नुवत्यां सत्यां इदं जगदपि विषण्णं विषादापन्नं अभूत् जगतो विषणतामेवाह॥ किंभूतं जगत् परिम्लानय

चं०टी० असंकोचनन तथा छायया शोभया विरहितं उज्झितं तथा संनिद्रमिव आकुलिकूजनाभावात् प्राप्तनिद्रमिव यज्जलं। पश्चात् कर्मधारय
१११ एवंविधं कुमुदवनं यत्र तत्। तथा वियोगव्यापारात् विरहप्रयोगात् उपनदिनद्यां रुदत् अश्रूणि मुंचत् चक्रवाकाणां मिथुनं यत्र तत्। एतेति
पादस्य विशेषणं। अन्योपि विषण्णपरिम्लानो वियोगाय सनिद्रः पूत्कुरुते रोदिति च। विरहविशेषाः। इति अभिधाय उत्कापर्वतकस्थितः मतितत्कालस्य
तत्समयस्य उचितं इमं एव पूर्वोक्तं एव जगत् अनूलक्षणं अर्थं समर्थयते द्रष्टयन् अनसरपाठकः पपाठ कन्यामिति अमृतभुजो देवाः अन्यस्मि
न्नल अनुरक्ता रागिणी मानुषीं कन्यां कथमानयंते सकुटीति किं कृत्वा तन्व्यंगी कृशतनूलता तथा सस्मितं सहास्यं आस्यं यासां ताः सस्मि
तास्याः तथा स्मरणविवशाः परवशा दृशो यासां ताः स्मरविवशदृशः एवंविधाः नाकनारीः स्वरांगना विहायेत्यर्थः। दिनपतिः सूर्यः
खेदात् मनस्तापात् एनं नवं कुमिव वरुणस्यालयं पश्चिमाशां प्रविशति खेदमंदमद्भकार्यावलोकनात् किंभूतो दिनपतिः उत्प्रेक्ष्यते ॥ अ
धिकं अतिशयं यथा स्यात् एव अवनम्रः ईषन्नमनशीलः तथा कोपनेव अरुणा लोहिता अंशवः करा यस्य सः। एवंविधः अन्योपि कस्य चित्
किंचिदकृत्यं दृष्ट्वा खेदात् कमपि निकुंभपातिलज्जया अवाङ्मुखः कोपन अरुणमुखश्च स्यादिति वक्तुं खेदादित्यस्योपयोगिवस्तु
स्यालक्षमिति पदं। न चाहि श्रीतारमपेक्ष्यते मानयंत इति प्रयोगश्चिंत्य। कथं बाहिमनणक्तंभ चुरादयो मिन पदीस्त एवाभवतीत्यर्थस
वकः सत्वान्न घटते। पूजार्थस्य मानादीवस्मेपदी मानयति मननीति च। यदुक्तं कविरहस्ययोः धर्मश्रुतिनिर्मलेनमनसा मीमांसते सर्वदा
या मान्यान् बहुमानयत्यविरतं भक्त्या श्वसंमानति। तत्राभानयंनमनांसि मनुते यश्चेष्टयाहि देहिनां युद्धे विबलं लूणाय सकलं यो मन्यते तत्र
सामन्यमान यंतीति पाठः पादांतत्वघातेपि गुरुत्वस्य महाकविसम्मतत्वात्। प्रत्यंतरे तु कामयंत इति पाठस्तत्र न कापि दोषशंका सम्मुन्मिमीले
ति॥ स्रग्धरा॥ राजानुबलः वसुर्कमिति आकर्णयन् सन् सोधिराजववत्तलात् लीलया विलासेन यो पदप्रचारः रैवैणरचनातेन अवतीर्य
सरित्संगमे नदीसंभेदे संध्याया यत् अन्हिकं नित्यकृत्यातन। अथ कुतानुकिंभूते सरित्संगमे संध्याविरामे संध्यावने उपविष्टाः निष
ण्णाः जपसामं नजपं कुर्वंतो याष्टिकजनास्तैः सनाथं सहितं सकृतं पुलिनं यस्य सतस्मिन्। ततश्च संध्यान्हिककरणानंतरं पश्चिमायां दि
शि संध्यारागे मायंतनरक्ततायां। स्फुरितप्रादुर्भूतिमितिनिमिरपटलपंक्तिः नमो वदराजिर्यत्र भंतविल्लास निमिरपटलपंक्तिः केवउत्प्रेक्ष्य राम
तरुधिरयेनआसवः शीधूलसस्थापि पासया पानेच्छया प्रधावमाना शीघ्रं गच्छंती कालवेतालानां रूपा रजनीचरविशेषाणां मंडलीव पंक्ति १११
रिवैषाक। इयं तिमिरपंक्तिः किं तु पश्चिमायां रुधिरं पातुमियं कालवेतालपंक्तिः प्रधावतीति। चात्याल कंकाल्हितालवनाल जंबालशब्दा

461/1733

लसमामालादयउन आलयत्यंये वनाल इतिनिपात्यते॥ तथा पुनस्तेस्ते संतानैः श्रोतोभिः प्रवृत्तया प्रोढया गंगया सहसंहर्षादिव स्पर्धयेव अनेक श्री
नसां अनेक प्रवाहाणां सहस्रैः गगनतलमिव आच्छयंती। आपूरयंती॥ कालिंदी च यमुनेव गंगायाः त्रिश्रोण्येव श्रोतांसि अहं पुनरनेकानि श्रोतांसि विधा
स्यामीति। संहर्षण इवांक यमुना विहितैरनेकैः श्रोतोभिः गगनमापूरयतीति तत्स्रोतसामपि नीलत्वात्। अनंतरं च तिमिरपटलभवना
त्पश्चात् चंद्रमसा चांद्रिणा रक्षागर्भिणा गुर्विणी पारंदरी ऐंद्री दिक् केतकी कुसुमपत्रवत्। पांडिमानं पांडुतामागमत्॥ प्राणग
र्भिणी गर्भिणी हि स्त्री केतकपत्रवत् पांडुतां बिभर्त्ति॥ तथयमपि॥ चपुनः कपिशांकद्युतिश्चंद्रदीप्तिः उल्लास। प्रादुर्बभूव॥ शं
शांकद्युतिः॥ केव॥ उत्प्रेक्ष्यते॥ चंद्रनरा अत्यग्रायायामा रुता वायुना अंदोलिताः कंपितायेउदयाद्रिद्रुमाः। उदयाचलतरु
व तेषां यानि कुसुमानि तेषां किंजल्करेणुराजिरिव केसररजः पुंज इव। तस्या अपि कपिशवर्णत्वात्। अथ तारांककांतेः
प्रसरणानंतरं क्रमेण कियता कालेन। क्षीरस्य पदैकदेशे पदसमुदायोपचारात्। क्षीराब्धेर्यो डिंडीरपिंडः फेनपिंडस्तत्सदृशः तारा
पतिः चंद्रः रोपियं अवतार अदर्शीत्यर्थः। उत्प्रेक्ष्यते। पूर्वपुलिनात् पूर्वसमुद्रसैकतात् गगनमंदाकिनीं नभोगंगां प्रति उच्चलितः
प्रस्थितः राजहंस इव। तोके असौ तारापति किंभूतं राजहंस इव व्योमगंगायां गंतुं प्रवृत्त इति। पुनरुत्प्रेक्ष्यते। उदयगिरिगुहागह्वरात्
उदयाद्रिगह्वरकुंजात् तिमिरमेव करियूथपति गजेंद्रस्तस्य शंकया भ्रमेण पृष्ठलग्नः पाश्चात्त्यं प्रवृत्तः केसरिणः सिंहस्य
किशोर इव। अर्भक इव। तमसो गजभ्रांतिजनकत्वात्। तमसि गज इति बुध्या हंतुं पृष्ठलग्नः तोके सिंहशिशुरयमिति॥ गह्वर
शब्दात्र कुंजार्थः यद्वा कार्थः। गह्वरो बिलदंभयोः कुंजे॥ पुनः रुत्प्रेक्षते। जगतां यो विजयो जगद्विजयः तस्मै यत्प्रस्थानं प्रवर्त्तने
तस्मिन् स्थितस्य नगरीकरणसक्तस्येत्यर्थः। मकरकेतोः कामस्य मंगलाय मंगलार्थं केनापि सज्जीकृतः प्रगुणीकृतो निर्मित इत्यर्थः
स्फटिकमयः स्फटिकविकारः। पूर्णकुंभ इव॥ अन्योपि राजा जगद्विजयार्थं। यदा प्रवर्त्तते तदा तस्य मंगलार्थं पूर्णकलसः सन्मुखं केन चित्
सज्जीक्रियते एव विकारमयट् विकारत्वं स्फटिकस्य कलसत्वेन करणात्। तथा महेंद्रस्य आप्राच्या मंडनाय अंगविलेपनाय हस्तात् श्लेषणकर
पतामुद्वर्तनेन उपलालितः संस्कृतो वर्तुलीकृतः श्रीखंडपिंड इव चंदनगोल इव पिंडो वृंदे जपापुष्पे गोले बाले गसिल्हयोः कवले
इत्यत्र कार्थः॥ ॥ तथा गगनश्रियान भोलक्ष्म्या श्रवणकर्णे संयोजितो न्यस्तः शोरिवकायाः लताविशेषस्य पुष्पस्तवक इव

चंद्र
११८

कृ.कमगुरवइवतथा प्राचीनं प्राच्यां भवं यदुनं तस्मिन् विहर्तुं शीलं यस्यासौ प्राचीन वनविहारी। एवंविधायः स्फुरत्करींद्र ऐरावणस्य
तस्य प्रकटनां प्रकाशनानां स्थतांगतः प्राप्तः एक कुंभइव॥ यद्यपि कुंभयोर्द्वित्वं भवति यथा तथापि वनगहने विचरतः करिणः प्रायेण एक एव
कुंभस्थली विभागोलक्ष्यते॥ अतएक इत्युक्तं॥ तथा निशावज्ञाविरिका निशा ता विरिक्तातया वासरस्य दिनस्य योविरामो विरमणं निवृत्तिः सएव
वल्लीनां उत्पुयच्छित्वा। उदध्नत उक्षिप्तः कंद इव तस्यापि वज्ञत्वात्। धवलत्वात्। च॥ ॥तथा सिद्धवधूभिः सिद्धाः देवविशेषास्तेषां वधूभिः
स्त्रीभिः उदयाचल चतुष्पथे विरचिता विहितः पांडूनां पुष्पाक्षतानां गुंजानां चयः पुंजः उत्करः सइव॥ पांडुगुंजाहि मंगलाय स्फुः उद
याचलशब्देन श्वंद्र समागमन सत्वा॥ तथा कैलास गिरिवरात् रजताद्रि शृंगात् लुठित्वा परिवृत्य आगतो गंडशैल इव गिरेश्च्युत
स्थूलोपल इव। तथा पूर्वदिग्मुखस्य सीममाक्तिक इव कुशांतरालवर्ति मुक्तेवतथा पूर्वाशाधिपतेः पुरंदरस्य सितातपत्रमिव। अतत्रामि
व॥ तथा कालएव अनेहाएव कुमारस्तस्य क्रीडायमाक्तिनां कंदुक इव गेंदुक इव॥ तदनु च॥ उदयानंतरं। मदनयतीति अयं मृगांकः शशां
कः गगनं व्याममंदमंदं शनैः २ अवनगाहे आक्राम तिस्म॥ कथं युवानं तरुणं यौवराज्ये युवराजभावे अभिषिंचन् अभिषिक्तं कुर्व
न मदनयति मदनवंतं करोति मदनयतीति तत्करोतीति णिच् विन्मतोर्लुगिति मतुप्प्रत्ययस्य लुक्॥ तथा कुत्र कुमुदानां विकासो ये
न एवंविधः सन्दिग्मुखानि भासयन् उद्दीपयन्॥ तथा अमृतमयाः सुधास्वरूपा ये तरंगा वीचयः तैः कृत्वा जीवलोकं प्लावयन्
आपूरयन्॥ मयदतहूप इतिकर्वित एवंविधं आसीत्॥ किंभूतं उत्प्रेक्ष्यते मुक्ता मर्यादा अवधिर्येन एवंविधन दुग्धवार्द्धिना क्षीरसाग
रेण आप्लावितमिव आपूरितमिव॥ यावदब्धिः स्वमर्यादायां स्थितो भवति तावद्भुवनस्याप्लावनं न भवेमुक्तमर्यादेनेत्युक्तं॥ तथा अ
मंदा अत्यानयाश्वंदनांबुना श्रीखंडद्रवस्य छटास्ताभिः सिक्तं उक्षितं भूभागांगणं यस्य ततएवंविधमिव चंदनांबुछटानामपि श्वेत
त्वात्॥ तथा सांद्रा निबिडा ये सुधापंकस्य पिंडगोला स्तैर्विलिप्ता दिग्धा दिग्भित्तया यस्य ततत्तथाविधमिव॥ तथा उत्सर्पिणी प्रस
रशीलाकर्पूरपांसूनां यावदीषत्ताया आपूरितमिव व्याप्तमिव॥ तथा स्फाटिक मणीनां यन्महामंदिरं विशालगृहं तस्य या उदर
दरी गर्भकंदरस्तां प्रविष्टमिव॥ परितः सर्वतोपि श्वेततायाः प्रसृतत्वात्॥ ॥ मन्ये स्फटिकमणिगृहगर्भविवर राम ११८

463/1933

प्रविष्टमिति॥ तथा द्रवीभूता गलिता यः तुहिनाचलो हिमालयस्तस्य महाप्लवेन महापूरेण उत्प्लवमानमिव प्रवाह्यमानइव॥ त
तश्चंद्रप्रकाशप्लाव्यमानं तत्॥ कैलति॥ शांशाकोदयेजाते सति॥ अद्रिभिः पर्वतैः कैलासेनेव रजताद्रिणेव आचरितं कैला
सायितं॥ तथा विटपिभिर्वृक्षैः श्वेतातपत्रैरिव आचरितं श्वेतातपत्रायितं॥ तथा मत्स्यंकेन दधिनेव आचरितं। दधीयितं॥ तथा जल
निधा वारिभिः जलैः दुग्धेनेवाचरितं दुग्धायितं॥ तथा व्रततीभिः वीरुद्भिः मुक्ताहारलतयेव आचरितं मुक्ताहारलतायितं॥ त
था श्रीफलैः बिल्वैः शंखेनेव आचरितं शंखायितं तथा जनपदैः देशैः तावत् स्थातव्यपदेशा इतिन्यायात् जनपदवासिलोकैः श्वेतद्वी
पस्येव मनोरथैरिव आचरितं श्वेतद्वीपजनायितं श्वेतद्वीपवासिनो हि जनाश्वेता भवंति॥ तथा शशांककांत्या सर्वेपि जना धवलीभूता वीक्ष्य
ते अतः किमु श्वेतद्वीपवासिनो भो इति॥ अपि च पुनश्चंद्रोदये जाते तदाह॥ सर्वे इति॥ चंद्रांशुभिः शशिकांतिभिः सर्वेपि पक्षि
णा हंसाः जाताः तथा सर्वेपि गजाः ऐरावणा जाताः॥ तथा सर्वे शैलाश्चयगिरयो रौप्यपुंजाः कलधौतराशयो जाता॥ सुधेति॥ ज्यो
त्स्नया चंद्रातपेन मेदिनी एवंविधा कृता किंभूता उत्प्रेक्ष्यते॥ सुधापंकेन उपलिप्ता इव दिग्धेव च॥ तथा स्फाटिकोपलैः स्फुटिकमणिभि
र्बद्धेव॥ खचितेव॥ तथा विलीनं द्रवीभूतं यद्धिमं तेन दिग्धेन लिप्तेव श्वेतत्वा विलोकना दिमा उत्प्रेक्षाः॥ अपिच पुनः॥ सौधेति॥ क्षुभ्य
त्क्षोभं प्राप्नुवन् यः क्षीरपयोधिः क्षीराब्धिस्तस्य यः पूरः प्रवाहः तत्सदृशे शशांकोदये जाते सति सौधस्कंधानां नृपमंदिरोपरिभा
गानां यानि तलानि अधोभागास्तानि दीपपटलैः प्रदीपवृंदैः लक्ष्यंते ज्ञायंते अन्यथा सर्वस्यापि धवलत्वात्कथमेतान्येव सौधस्कंध
तलानीति परं दीपैः तानि ज्ञायंते तत्शब्दः पुन्नपुंसकः॥ तथा पांडुध्वजाः धवलाः पताकाः कंपनवातप्रेरणेन लक्ष्यंते॥ तथा हंसाः पक्ष
योर्विधूननेन चलनेन वा अथवा मत्ता आत्मा मुकुलेन निद्रांते तंद्राया अवसाने यो नादः कूजितं तेन लक्ष्यंते॥ तथा कुमुदानि श्वेतकमलानि ष
ट्पदानां भृंगाणां यानि रुतानि झंकारास्तैः च पुनः उत्सर्पी प्रसरणशीलो यो गंधः आमोदः तेन लक्ष्यंते॥ ॥ अन्यथा कोक
नदादीनामपि तदानीं धवलत्वात्कथं ज्ञायंते एतान्येव कुमुदानीति परं भृंगझंकारैरुत्सर्पिगंधेन च तेषामवगमः अन्यानि च पद्मानि श्वेतत्वे
समानेपि रविविरहात् सिल्वाड्रागमभृंगझंकृतानि उत्सर्पिगंधानि च भवंतीति॥ तथाविधे भ्रांतिजनके चंद्रोदयस्य प्रपंचे विस्तारे ज्ञा

नं०२० तमतिहतात्प्रभावात्उक्तं तथा रणरणकेन अभिभूयमानः पीड्यमानः निषधनाथो नलः चिंतयांचकार। विचारयतिस्म॥ किंतत्
११९ इत्याह इत इति॥ अयं प्रत्यक्षः सर्वो मनसिजस्य कामस्य यो महिमा अनुभावस्तस्य परिकरः परिवारः तत्सहायदानात् असह्यः सोढु
मशक्यः कः परिकर इत्याह। इतः अस्मिन् प्रदेशे चंद्रः सांद्रात् घनात्। अग्निवत्परुषान् कठोरस्पर्शान् किरणान् किरति विक्षि
पति। इतोपि अनीलति विकसंतियानि कुमुदवनानि तेषां वायुर्विलसति वाति। इतोपि कादंबानां कलहंसानां ध्वनितं शब्दितं
किंभूतानां निद्रया अलसात् कूजयांतितथा तपांउत इति। उतस्मिन् विभागे दुर्निवारो वारयितुं अशक्यो मकरकेतनः कामः शरान्
किरति विक्षिपति। इतोपि वयं कुलिशपाणि इंद्रः तेन दत्ताया आज्ञाया अर्थात् दमयंतीवरणीयेति। आदेशास्तया आकुलाः व्यग्राः प
रवशा इत्यर्थः। ततस्मात् एतत् कामानुचरत्वं तदाज्ञावर्तित्वं च युगपत् अतिसंकटं अतिसंबाधः॥ ॥यद्यस्मात् ।इ
ह उभयतः। संकटापनिपाताधिकार ॰ दे शिक्षितरूकं ॥ किं॥ इतो विषमावासो नश्यत प्रदेशात्वात्। इतस्तटी वर्द्धनदीतट विषमदुस्त
टी उता महाव्याघ्र ततो भयं तदवमेव न्यायो मम प्राप्त इति॥ ततस्मात्॥ इदानीं किं इह कर्तव्यं॥ अथवेति पक्षांतरे। पूर्वपक्ष
स्तु मोहरूपो द्वितीयस्त्वयं तदाज्ञाकरणरूपः कथं हास्येनापि अवंध्यं सफलं वचो येषां ते अवंध्यवचसः तेषां लोकपालानां खलु अ
नुनय अनुनयः प्रसादनं तेषामेव आदेश आज्ञा अविलंघनीयः। अनतिक्रमणीयः इति चिंतयन् सन् एकाकी पद्माम वनि
तनिकेतनात् आत्मगृहान्निर्गत्य आपततिस्म आगच्छत् शशांककिरणजाले उपदर्शितं अवलोकितं वा। मयस्यासौ उपदर्शि
तवर्त्म किरणजाले केरिव॥ उत्प्रेक्ष्यते॥ परिजनैरिव। उत्प्रेक्षते। परिजनैरिव यथा परिजनैर्निर्गच्छत स्वजनस्य वर्त्म दर्श्यते॥ तथा
पभिरपि एवंविधः सन्नलः केश्चित्काललवैः कालविशेषैः कैलासकूटमिव। रजताद्रिशिखरमिव आचरंतः कैलासकूटाय
मानाः अत्युच्चा इत्यर्थः॥ एवंविधा ये अट्टालकाः प्राकाराग्रेरणगृहास्तेषां आभोगेन विस्तारेण भव्यं सुंदरं भीमपालस्य भवनं राम
गृहमभ्याप प्राप कन्यानामंतःपुरं अवरोधः कन्यांतःपुरं ततपुरंदरस्य शक्रस्य यत् वरप्रदानं॥ यथा प्रविशंतं न कश्चित् तां विलोकयि
व्यतीत्य तकंतस्य प्रभावात्। ज्ञाकः नदृश्यमानं रूपं आकृतिर्यस्मात् अदृश्यमानरूपः प्रासादस्य जालकैः गवाक्षविवरैः प्रविवेश प्रविष्ट ११९

465/1933

न॥ प्रभावस्तत्र शिशकाविरचने कार्यः॥ जालं तु गवाक्षे क्षारके गणे दंभानाययोः श्रेतिहेमानेकार्थः। प्रविश्य कन्यांतःपुरे प्रवेशाय
धाय यत्रासौ दमयंती आस्ते तं सौधपृष्ठं आरूढवान्। आरुरोह॥ किंभूतो नल उत्प्रेक्ष्यते ह्यगात् विप्रकृष्टदेशात्॥ अभिमुखाग
तेन सन्मुखमागतेन। तथा अनवरतं अजस्रं दह्यमानो भस्मीक्रियमाणो यः कृष्णागरुः कालागुरुः। सएव धूपो गंधद्रव्यं तस्य यो धू
मः सएव अभिदर्शितस्यानर्त्तकेन कंपकेन वातेन हि धूम आल्प्यत इति तथा कर्पूरकस्तूरिकादीनां क्षोदे यक्षकर्दमः बहलं निबिडं
यद्यक्षकर्दमांशुतेन सिक्तेक्षितायाः सौधस्कंधयाः संधिः श्लेषस्तस्मिन् विचरितुं विहर्तुं शीलं यस्यासौ। तथा विगलन गंधवाहे
न वायुना कृतं आभ्युत्थानं अभिमुखं उत्थानं यस्मै एवंविधइव। यदा ह्यतिथिरागच्छेत् तस्याभिमुखमुत्थानं क्रियते। तथा न
वातेन वाभिमुखमागतेनाभ्युत्थानं नलस्य कृतमिति॥ तथा स्तोकं अल्पं अंतरं अवकाशं परिक्रम्य उल्लंघ्य इतइतः अस्मिन् अस्मि
न् प्रदेशात् देशाभिमीवर्त्तत इति गीतगोष्ठ्यां गानसभायां स्थितायाः सख्यो वयस्यास्तासां गीतझंकारेण आहूयमान इव इव आका
र्यमाण इव नलः न गीत झंकारेण आग्निय यथात्र भमी वर्त्तत इति॥ तत्रोत्प्रेक्ष्यते। नतझंकारेण आहूयमान इव आकार्यमाण इ
व उत्ताउतादविवर्त्तत इति आकार्यत इति आस्य च सा परं मनाक् ईषत् बहितो अंतरिक्षतः अनुपक्ष्यमाण एव अज्ञायमान एव नलः एवंविधां
दमयंतीमद्राक्षीदिति संबंधः किंभूतां दमयंती वेणूनां वंशानां विपंचीनां क्वणं स्वरं अनुसरति। अनुप्रवर्त्तत इत्येवं शील वेणुवीणाक्व
णानुसारि तेन वेणुवीणास्वरानुगामिना॥ तथा ईषत्कलो अस्यामिति काकलीनिषादः काकलीसंज्ञो हि अल्पतर्पणा इव तु कोमलाया
काकली प्रायेण बाहुल्येन वर्त्तते अस्मिन्निति कोमलकाकलीप्रायं तेन एवंविधेन॥ किन्नरपुरुषस्य यत्संगीतं सम्यग्गानं तेन विनोद्यमा
नां मकूनृहल्लीक्रियमाणां। पुनः किंभूतां उत्प्रेक्ष्यते। अलकवल्लरीमध्ये कबरीमध्ये निवेशितानि स्थापितानि तारानुकारिणी तारो
पमानि मौक्तिकानि यस्मिन्। तथाविधेन। तथा कज्जलेन अंजनेन कलंकिता कलंक इव आचरितस्तौ। नयनोत्पलपक्ष्मपालि
यस्य कलंकइव आचरति स्मेति। लुप्तापि॥ एवंविधेन मुखेन। गगनेय चंद्रः तस्य स्पर्द्धया संहर्षेण भूतलमपि॥ पूर्णं उदितं उदयप्रा
प्तं इंदुमंडलं यत्र जगत् एवंविधं आपादयंतीमिव। किल भान स्वव चंद्र उदेतीत्स्यतत् किं॥ अहं भूव्यपि चंद्रो इंदुः यशो भावि

चं॰२ धाम्यामीति गगनचंद्रेस्पर्द्धयामन्ये दमयंत्या स्वमुखेन भूतले पूर्णोदितं इंदुमंडलं ।। संपादितमिति ।। इदमस्यामुखंनकिंतुपूर्ण
१८० इंदुमंडलमुदितमिति भाव: ।। पुन: किंभूतां हारलतायामुक्तालतयाकृत: कृत: कंदल-आश्लेष: संयोगोयस्या: सातां कंठकंदल
लोविलहारमित्यर्थ: किंभूतया हारलतयाउच्चयोयाकुचमंडलो पयोधरौतयोविलोलया चंचलया चपलया ।। उत्प्रेक्ष्यते ।। म
हान्त: सकामा: ये सप्तर्षयोमरीच्यादयोग्रहाश्चमंगलादय: ।गणानिचाभीष्यादीनि ।। यद्वाग्रहानक्षत्राणितेषांगणावृंदानितेषां
पंक्तयवश्रेण्यव मन्ये हारलतायामभूनिमौक्तिकानि न किंतु सकामा: सप्तर्षिग्रहगणा: ।एवंदमयंतीमालिंगितुं आगता प्राप्ताइति ।पु
न: किंभूतां कर्णयालंम्बनप्राप्तेन तथाकुमुद मंजरी इतीया सहायीभूता ।। यस्याएवंविधेन ।। बालपल्लवेन नवकिसलयेन वि
विराजितं वदनं यस्या: सातां बालपल्लवेनकेनेव ।। उत्प्रेक्ष्यते ईषन्मनाक् ।। कपोलपालिगंडप्रांतपरामृशता तथा कुमश्चाटुका
र: प्रियवचनीलुपयेन एवंविधेन मंतसमयेन अहितोमुक्तोयोहत: तेनेव शंकेकर्णोपांते ।। असौबालपल्लवो ।। नकिंतुवसंते
नचाटुकारिलहत: प्रेषित: इति पुन: किंभूतां अच्छाभ्रे: अतिशयेन अमले: कस्तूरिकापंकस्य येपत्रभंगा: पत्रलतास्ते:रलं
कृता मोदितभव्य सुंदरे भुजशिखरे बाहुयभागौ यस्या: सातां पत्रभंगै: कैरिवउत्प्रेक्ष्यते लावण्यं सौंदर्यमेव अमृतं तस्य रक्षार्थे
आगतैरायातैर्भुजंगैरिव ।। अमंतोहिभुजंगरक्ष्यंतेउपं अमीमृगपत्रभंगानांकितु लावण्यामृतरक्षणायभुजंगाएव आगताइति ।पुन:
किंभूतां आसन्नभुविनिकुरांगणविकीर्ण: विक्षिप्त: पांडुपुष्पाणांप्रकरै: समूहै: परिलताविष्टितापांडुपुष्पप्रकरै: कैरिवउत्प्रेक्ष्यते गगनादवती
र्यरूपवलोकनेकुतूहलेकोतुकेविद्यतेयेषांतानिरूपावलोकनकुतूहलानी तथाविधेर्नक्षत्रैरिवमन्ये अभि: पांडुपुष्पप्रकरा नकिंतुदमयं
तीरूपावलोकनकौतुका नक्षत्राण्येवगगनेनभमोत्यवतीर्यभूमौ परिवृत्य संस्थितानीति ।। पुनः किंभूतां दमयंतीं अच्छममलंपांडुंधव
लं नेपथ्यं वस्त्रविशेषं परिधानंवसानां उत्प्रेक्ष्यते ।गुरुमहत्तयतस्मिंनबिंबं आगेहस्तस्यमयत् स्पर्शसुखं तल्लिप्सतया तल्लुलस त
या नी ।नीप्रांते उच्छ्यमानपुंजिता: ग्रंथिकृता: तरंगायेन स तथाविधं वस्त्रांतरगतं वासोमध्यप्राप्तक्षीरोदधिवक्षीराब्धिमिव म
न्ये अमौनेपथ्य: परिहितानास्तिकिंतु वितंबस्य स्पर्शसुखाकांक्षया स्वतंमान नीवीप्रांतपुंजीकृत्य वस्त्रांतर्गत: क्षीराब्धिरेवायमुपागत १८०

4067/1933

इति ।पुन: किंभूतां गेष्यन्नपुरवलयेन विराजितोवामश्चरणपल्लवो यस्या: सातां गेष्यन्नपुरवलयेनकेनेव ।। उत्प्रेक्ष्यते अहमेवशेषरत्न
त्रयादमेयं त्वास्वयंवरे वरणीय: परिणेतव्यइतिअर्थ: प्रयोजनंविद्यते यस्या: सौदृत्सर्थीनकृत्वस्तयाउत्पलिलाविक्यापादलग्नेन शेषरंग
णव अनंतेन वमन्ये वामचरणन्यस्त: पादकटकोयं न ।किंतु सविवाहाभ्युपगमं कारयितुं शेषाहिरेवपादलग्नइति ।। पुन: किंभूतां उत्प्रेक्ष्यते
विविधा अनेक प्रकारायेविलासास्त एवबार्निकाश्चिन्न कश्चिन्न कूर्चिका स्ताभिराकारितामिव आलिखितामिव ।। आकारशब्दातु नामकार
वितांतान् सिद्धि: ।। आलिख्यहिस्वउत्त विधानादद्भुतं भवतितथेयमप्यद्भुताकारेत्यर्थ: ।पुन: किंभूतां उत्प्रेक्ष्यते अमृतद्रवरूपायेवर्णकाश्रु
क्लादय: तै: विचित्रिता विशेषेण चित्रिता अवयवानि अंगानि यस्या: साएवंविधामिव अंगेक चित्शुक्लस्तायाः हृत्सितसिततायाः हृत्चिल्हृष्टा
नाया श्च अवलोकनात् ।। मन्येपीयूषद्रववर्णकैरविचित्रितामीति ।पुन: किंभूतां उत्प्रेक्ष्यते आनंदस्य कंदलै: प्ररोहै: घटितामिव निर्मितामि
वदृष्टां आनंदजनकत्वात् ।पुन: किंभूतां उत्प्रेक्ष्यते मोहनमणिशिलायां उत्कीर्णमिव विभक्तिकतामिव युवजनमनोमोहजनकत्वात् ।। तथा
शृंगारएव दारुकाष्ठं तस्मिन् उत्कुटितामिव घटितामिव तथा वशीकरणस्य वशवर्तितावविधानस्य येपरमाणव: तैर्विनिर्मितामिनिष्पादिता
मिव सर्वस्यापि वशकारित्वात् ।तथा मदनमदावेव मृत्पिंडस्तेन निष्पादितामिव ।। तथादृशोबद्धलेपस्य पुत्रिकामिव पांचालिकामिव
अचलप्रदेशामन्येवज्ञलिप्तइवनेता उपसरणस्यार्थ: ।। तथाहृदयस्य चेतस: आकर्षणेसाकृष्टिरत्नस्य शलाकामिव ।यथा आकर्षम
णिशलाकया दूरस्थं वस्तु आकृष्यते ।। तथानयाचेतइति ।। तथाअनुरागस्य प्रेमबंधस्य जीवनौषधमिव ।अनुरागोमृतोप्यनयोजीवतीत्यर्थ:
तथामदनस्य कामस्य जयपताकामिव कामेन सर्वसर्वं जगज्जित्वाइयंसा जयपताके वोत्तंभिता ।पुन: किंभूतां एवंविधे सौधस्कंधज्योत्स्नाकौ
मुदीमिव अमृतं तस्य य: स्पर्श: तं अनुभवंतीं ।। वदयमानांकिंभूतसौधस्कंधबहुलाभि: प्रचुराभि: चंदनांबुछटाभि: आर्द्रितासिक्ताभू
ससनमिव ।। अतएवधवलायमानत्वात् विकीर्णा विक्षिप्ता: सुरभिपरिमलेन मिलंत: पुंजीभवंतोयमधुकरास्तेषांरवेणझंकारेण अनुमेयो
अनुमातुंयोग्य: पांडुपुष्पप्रकरामधुकरझंकारेणैव अनुमीयते यथात्र पुष्पप्रकरो विद्यतेशृंगारश्रवणादिति तथामसृण: कोमल: सितो
धवलाय: मृणावंधोलेपविशेषस्तनातेन पिच्छिल मनोहरपिच्छादित्वादिलच् ।। पुन: किंभूतां अच्छ अमलाअंशव: किरणायस्य एवंविधायेमय
यश्च रत्नानि च स्पंदिनि स्फटिका श्च चंद्रकांतमणय: तेषांयापर्यंकिका लघुपल्यंक: तस्याअंकं उत्संगं भजन्त्याश्रयंतिया सातां अस्यार्थकृत् ।। त

चं०२०

थानलब्धानिद्रायथासातां॥तदमयंतीमवलोक्य अयंनलःचिंतितवान्॥अहोइति अधुनास्मानलोकपालनोंद्रादीनां अभिनिवेशःपरिणयनाग्रहः॥ अशेषरूरवानांसमलरूरवानांयन्निधानं आस्पदंनस्मिन्पुरुषःनस्पृहयति अभिलषति अपितुसर्वोपिस्पृहयति॥स्पृहेरीप्सितइतिस्पृहयतेरीप्स्यस्यनिधानस्यसंप्रदानसंज्ञा॥चपुनः अहमेवमन्येविस्फारितानिविर्जृंभितानिभितानिताराननक्षत्राणिएवईक्षणानिनेत्राणितैःकृत्वाइमामवदमयंतींपश्यन्अयमाकाशःग्रहोयहःसूर्यादिभिःसहितोअभूत्पक्षेविस्फारिताम्लानकनीनिकायेषुएवंविधानियानिईक्षणानितैःकृत्वाइमामिवपश्यन्ग्रहाभृतादिभिर्विनिग्रहात्सहितोभूत॥चपुनःअहमेवंमन्ये अयंचंद्रःचंदनवत्सांद्रैःशीतैःकरैःकिरणैःइमामेवदमयंतींपरामृशन्स्पृशन्कलंकछलेनलक्ष्मदंभेनमदनएव अनलोग्निःतेनयोदाहस्तन्मयींतद्विकाररूपांव्रणलेखांहृदयेनमध्यभागेनउद्वहतिबिभर्ति।अन्योपिकराभ्यांअनलस्पृशन्सन्तद्दाहमयींव्रणलेखां॥विभर्त्येवविकारमयः अयमपिसमीपोद्यानस्यनिकटवनस्ययोमारुतोवायुःसः अस्यादमयंत्याःसमर्पितोदत्तःकुसुमानांगंधःसुरभिपरिमलोयेनएवंविधःसन्उद्याने उत्संशुकंउपरिवासःआक्षिपन्अपनयन्मदनेनआतुरःपीडितःतिर्यकुपततिअन्योपिस्मरातुरःकुसुमगंधंकस्तूरिकादिवार्पयन्संख्यानकर्षणपौरुषीयंकुरुते।सर्वथासर्वप्रकारेणमनुष्यलोकेनजितंयत्रमनुष्यलोके।अचिंत्यंचिंतयितुमशक्यं॥तथानआलोचनस्यविचारणस्यगोचरोविषयोयत्तत्तथाअतिरूपमसदृशं॥तथाअद्भुतमाश्चर्यरूपंतथाअमूल्यमनर्घ्यंस्त्रीरत्नमुदपद्यतजातं॥आइतिसंतापे।प्राप्यतनंवानिसंदेहःसंतापःआःसंतापप्रकोपयोःइतिवचनात्।हेप्रजापतेविधस्त्वंपरिणतंपरिपक्वंविज्ञानंयस्यसएवंविधोसिएवंविधभैमीनिर्माणात्॥तथाहेसंसारत्वंसनाथोसिसप्रभुरसि।तथाहेमदनत्वंमहोत्सवनानसिमहामहेप्राप्तवानसितथाहेचक्षुर्नेत्रंत्वंकृतार्थंकृतार्थंकृतरूत्वंसफलंअसितथाहेहृदयवनःसंपूर्णमनोरथायस्यतत्तथाविधंअसितथाहेरामनादःश्रमोदूरागमोनश्रमलस्यसंबोधनहेदूरागमनश्रम।त्वंसफलोसि।फलवानवर्तसे।यतएवंविधाभैमीमयाआलोकितेतिनथासकलयुवजनानांयानिमनांसितान्येवमधुकरास्तेषामारूपां आकर्षणकुसुमितलतिकेवपुष्पितव्रततिरिवयथाकुसुमितलतयाभृंगाःआकृष्यंतेतथात्वयायुवजनमनांसिइतितस्याःसंबुद्धौहेसकलयुवजनमनोमधुकराकृष्टिःकुसुमितलतिके।तथानिजननयनाभ्यांनिर्जितंराजीवंययासातस्याःसंबोधनेहेनिजनयननिर्जितराजीवहेदमयंतित्वंचिरंजीव॥तथाहीति॥तस्यानयनवर्णनामेवाह॥लक्ष्मीमिति॥हेनतेविदमयंति॥तवदृशोनेत्रयोर्वयंवलिंयामःउपहारीभवामःइतिपरमप्रीतिगर्भालोकोक्तिः॥किंभूतयोर्दृशोःअब्जसदृशोःपद्मसमानयोःपुनःकिंभूतयोःकांचित्

469/1933

कृतांलक्ष्मींशोभांबिभ्राणयोर्धारयंत्योःतथाचंचलदीप्यमानोभ्रमरवभंगःसभागेएकदेशोययोस्तयोः।यदातुचंचत्कूभंगसंगयोरितिपाठःतदाचंचंतोभ्रुवावेवभंगौतयोःसंगोयत्रतयोःअब्जामपिलक्ष्मींबिभ्रतिलथाचंचंतोविलसंतोभ्रुवत्कुटिलायेभंगास्तरंगास्तैर्भागएकदेशोयेषांतानिसरोमध्यगतत्वात्पद्मानांभ्रभंगेतिपाठे।चंचंतोभ्रूवत्कृष्णायेभृंगास्तेषांसंयोगोयत्रतानि॥३३॥अपिचपुनः।किन्नरेति।किन्नरवदनाद्विनिर्गतंनिःसृतंयत्संचमगीतमेवामृतंआल्हादजनकत्वात्पीयूषं।तस्मिन्श्रवणेश्रूयमाणेसति॥श्रूयमाणेसतिहरिणीदृशादमयंत्याःसालसामंथराचासौवलितावपश्चादवलोकनायप्रवर्तिताचसालसवलितासपुनःललिताचइपदधानमंतीकंपितावादकहरतिवशीकुरुतेमनइत्यध्याह्रियते।लुलिःसौत्रःलुल्यतेलुलितंअतएवहरिणादृकअतएवगीतानुरागलक्षणंहरिणीहवाकुमनुसरति॥३४॥इतिपूर्वोक्तानिअनेकविधानिचिंतयनसन्नलःमंदैःमंथरैःमृदुभिःसुकुमारैःलीलापदैःलीलयापदन्यासैःआगत्यसरोवकदंबकस्यवयस्यावृंदस्यमध्यंअविशत्॥प्रविशतिकिंभूतस्यसरोवकदंबकस्यगीतगोष्ठ्यांगानसभायांस्थितस्यतथाकोयमितिविस्मयेनआश्चर्येणविस्फारितानिविकासितानिविलोचनानियेनतत्तथाविधस्यमयासंभ्रमोभयंनाद्भुतंयस्यततूतस्यसंभ्रमवतोभीतस्यत्यर्थः॥संभ्रमोभीतौसंवेगादरयोरित्यनेकार्थः॥अथतस्मिन्नलेप्रविष्टेसतिसख्यःएवंविधानिचक्षूंषिचिरंबिभ्राणाःदधानाःसत्यस्तदभिमुखास्तंनलमभिसन्मुखाःतंनलमभिसन्मुखंयासांतातदभिमुखाः॥किमपिविचितवलितंकपितंआसनंपीठंयत्रएवंयथाभवतितथाकिमपिअवगलत्दुर्घनक्षरत्॥स्वेदसलिलंयत्रएवयथाभवतितथाकिमपिउत्पुलकितानिअंगानिअवयवायत्रएवंयथाभवतितथाकिमपिअनंगेनकामेनभंगुरंवक्रंयथाभवतितथाकिमपिअवलोकितंवीक्षितंअन्योन्यस्यपरस्परस्यमुखंयत्रएवंयथाभवतितथाअवलोकि॥तरु॥किंभूतानि।चक्षूंषि।आकस्मिकान्यकस्माज्जातोयोविस्मयआश्चर्यंतेनविस्फारितानिविकासितानितथाभयेनकोयंअकांडेआगतःइतिभीत्याभ्रमितानिकंपितानि।तथाकौतुकेनउज्जाग्रितानिउन्मुखीकृतानितथाव्रीडयालज्जयावलितानिपरिवर्तितानितथामुदाहर्षेणमिलितिसंयुज्यमानानिअरालपक्ष्माणिवक्रनेत्ररोमाणियेषुतानितथास्मराकूतेनकामाभिप्रायेणविलसितानिकंपितानिमृदितानिव।तथाहिरक्षारसेनअवलोकनेअनुरागेणअनिमिषाणिअसंकोचितानितथारत्याःसंघटनेनसंश्लेषणेइतो

नै०२० नलदृकृतथातो मखीनामिति नयनयोः संयोगेन मुकुलितानि मीलितानि॥ दमयंत्यपि इति हर्षोत्कर्षेण गद्गदा अव्यक्ताक्षरा या
१८२ गीस्तया गीता मुरत्ज्य मुत्कासनं भ्रमं सादरं यथाभवति तथा॥ उत्थितायाः कुब्जवामनकन्यकास्तासां मृदुकरतलाभ्यां यानालिंग
नानि तान्याकस्फोटस्तेन कलितः सहितोयः कलकलः कोलाहलः तेन मनाक् विलासेन वलितं परामुखीकृतं मुखं यया साएवंविधा
सतीतदभिमुखं नलसन्मुखं अवलोक्य शय्यातलात्। उदचलत्॥ उत्तस्थौ॥ इतीति किं हृद्वी भवनी वर्द्धयामो वर्द्धयामस्तेभ्य
मद्वित्वं कापि अद्भुतमधिमाकस्यचित् सद्भागवत्या ज्ञावितेश्वरः प्रियतमा अनैव समीपएव आगता दृश्यते॥ आः प्रकोप असं
भाव्यवास्या आगतसखी प्रतिकोपः आः संतापप्रकोपयोरित्यनेकार्थः॥ अस्य नलस्य अनेकप्रकाराः। यरक्षकाः रक्षयि
तारस्तैः रक्षितप्रति जागर्तीति॥ तथा पक्षिणामपि दुःप्रवेशो प्रवेष्टुमशक्या विशेषता रजन्यां रात्रौ कन्यांतःपुरकृतः प्रवेश उत्पद्य
तस्मात् कृतेन आश्चर्यरसप्रवेशेन स्तिमितं निश्चलीकृतं यत्तत् तथाविधनेन तथा किंचित् साचितिर्यक् संचारितेन प्रवर्त्तितेन
चक्षुषा पुनर्नलमवलोक्य चिंतयांचकार यदचिंतयत्तदाह॥ धन्येति॥ मा कापि भाग्यवती युवती धन्या पुण्यवती किंभूता उपरो
धिना प्रसादिना अद्रितनया गौरीयया सा उपराधिता द्विजनया यस्या युवत्याः कंठतं मुक्ताहार इव आल्हादयन् आल्हादं कुर्वन्
तथा प्रसादिता भुनायन एवंविधः सन् विलासिष्यसि विलुंठंकरिष्यसि संश्लेक्ष्यसीत्यर्थः॥ यथा मुक्ताहारः कंठे आल्हादयन् सन्
विलुठति तथा त्वमपि॥ नातेति हे अमलमंत्रपदे मातः धातः वेधः तव श्रमं तन्निर्माणखेदं अद्य अमुना नलेन सख्येन धन्यं सप
लं मन्ये मानं॥ हे मातर्भैदिनि अपरं अन्यत् किं त्वं मया वंद्यसे नमस्क्रियसे यस्यास्तव भुवः अयं नलपतिः॥ मातृशब्दं जननीप
र्याय मपि स्त्रियः सपत्न्यादिष्वपि प्रणयसंबोधने प्रयुंजते इति नलभूपतावप्यर्थिन्या दमयंत्या मातर्मेदिनीति संबोधनं न दुष्टं
अन्यथा सपत्नीं प्रति मातरित्यामंत्रणमनुचितं॥२०॥ एवममुना प्रकारेण चिंतयंत्येव तत्काले तत्समयमेव आकूतं च मीलना
भिप्रायः कौतुकं च कुतूहलं कृत एवमागत इति॥ हर्षश्च प्रियावलोकनात्। भयं च पित्रादिभ्यः कथमेवमपरिणीतवानेन सह
वार्त्तां विधत्त इति एतानि आदीयंत एवंविधा अनेकबहवो रसा ये तेषां या परंपरा परिपाटिस्तया परावर्जितः पश्चान्मुखीस्तेन यन्नीतलेयया १८२
सा तथा लज्जया अवनमितं ईषद्वामुखीकृतं मुखं यया सा एवंविधा सती विधेयस्य कर्त्तव्यस्य यो विवेकोविमर्शस्तस्य कल्पं राहित्यं अभ

471/1933.

नत॥ मत्रापि किंचिदज्ञासीत्यर्थः॥ नम्रोपि इति अमुनाप्रकारेण तस्याः दमयंत्याः समीपे वर्त्तितुं शीलं यस्याः सा तां समीपवर्त्तिनीं पूर्व
परिचितां पूर्वसंस्तुतां कि नरीमभाषत। संभाषितवान्॥ इतीति किं हे विहंगवागुरिके भवत्स्वामिन्याः किं एवंविधः समाचारः समाचर
णं चेष्टनं यत् अभ्यागतजनेन सन्मुखमासातिथिजनेन सह अन्यत्तिष्ठतु स्वागतालापमात्रकेणापि भवतीस्वागतमिति कु
शलमपि व्यवहारेण न क्रियते॥ सापि विहंगवागुरिका मं भ्रमः आदरस्तेन सहितोयः प्रणामः सपूर्वः प्रथमो यत्र एवं यथा भवति तथ
आपूर्वं सादरं प्रणम्य पश्चात् इदं वक्ष्यमाणं अवादीत्॥ किंचिदपि॥ हे स्वामिन् नव अतिथेः अनया सख्या दमयंत्या समुचितं अभ्यागत
जनयोग्यं किं न अनुष्ठितं किं न कृतं अपितु अभ्यागतस्य यत्क्रियते। तत् सर्वमपि कृतमित्यर्थः॥ तदेवाह॥ ननु सम्यग्वादे किंचिन्म
नाकू कंपितानि चालितानि यानि पाण्योः कंकणानि वलयानि तेषां ये रवाः॥ शिंजितानि तैः कृत्वा तव स्वागतं पृष्टं। अन्यो
पि ब्रुवन्नेव स्वागतं॥ पृष्ठेदिति। ननु च अभ्रे दृष्यत्नो सम्यग्वादे कृतावपीत्यनेकार्थः॥ च पुनः व्रीडया लज्जया नम्रं नतं मुखांबुजं
यस्याः सा एवंविधया अनया तव चरणयोर्नेत्रे एव कुवलये न्यस्ते निहिते अतिथेः किल पादयोरर्घपूजार्थं उत्पलं न्यस्यते एव
तथानया लज्जया वाङ्मुखत्वेन भवत्पादयोर्नेत्रे एव उत्पले न्यस्ते॥ तथानया त्वदितव प्रवेशाद्दत्तः त्वामियं हृदि प्रवेशयद्दित्यर्थः
किंभूते हृदि द्वारस्थ प्रवेशमुखावस्थितं यत् स्तनयुग्मं तदेव मंगलघटौ यत्र तत् तस्मिन् अन्योप्यतिथिः पूर्णकलशयु
ग्मसहितेन द्वारेण गृहांतः प्रवेश्यते तथा तवापि॥३६॥ तत्तस्मात् ससं भ्रमं सादरं यथा भवति तथा उत्थितया अनया दम
यंत्या समर्पितं दत्तं इदं समुल्लसंतो दीप्यमाना मणयो रत्नानि यत्र एवंविधं यत् पर्यंकिकासनं तत् देवो नृपः अधितिष्ठतु आश्र
यतु॥ हे देवि दमयंति त्वमपि इमां अहरखि त्रिनिकृष्टां विद्रुममणीनां प्रवालरत्नानां या पर्यंकिका तां अध्यास्व आश्रय॥
च पुनः परमुखेन हंसादिद्वारेण श्रुतं अन्योन्यस्य स्वरूपं याभ्यां एवंविधयोर्भवतोः इदानीं आसनास्वयं अनुभवनेन अव
लोकनेन नयनयोर्निर्वृतिः सुखं भवतु॥ तथा मर्त्यानां मनोरथा अभिलाषाय भेयं प्रियेण संगता भवत्वित्येवं रूपास्ते फलं
तु॥ इत्यमुना प्रकारेण तया किन्नर्या अभिहिता उक्तौ तौ दमयंतीनलौ मत्वरं शीघ्रं स्वीकराभ्यां येपराम्रष्टे स्पृष्टे सत्वर
स्वीकरपरामृष्टे एवंविधयोः स्फटिकस्य प्रवालस्य च या पर्यंकिका पर्यंकिका पदं उभयत्रापि याज्यते॥ स्फटिक मै

नं०२० पर्यंकिका प्रवालपर्यंकिकाच तयोः उत्संगभागं मध्यप्रदेशं भेजतुः शिश्रियतुः॥ ॥ततश्च ततप्र
र्यंकिकाध्यासानंतरं तौ दमयंतीनलौ हर्षादिति॥ तत्क्षणात् वेगात् रूपालोकनस्य यत्कौतुकं तेन अन्योन्यस्य परस्प
रस्य यदुत्कंठितं तस्मिन् विषये किंचित् मनाक् साचि च तिर्यक् सन्मुखं अभिमुखं नयनेत्रे संचारयामासतुः प्रवर्त्त
यामासतुः परस्परं मुखं तावद्द्रष्टुमित्यर्थः। किंभूते। नयने हर्षादानंदाश्रुचिते अश्रुभिर्व्याप्ते॥ तथा भयात् परिणीत
प्रियावलोकनाद्भयात् स्मात्तरलिते कंपिते। तथा विस्मयादाश्चर्यात् विस्फारिते विशालीकृते। तथा औत्सुक्यात् उत्कंठायाः
स्तिमिते निश्चले। तथा स्मरात् कामात् विलुलिते अवाङ्मुखीकृते। मदिते च। तथा लज्जया संकोचिते निमीलिते॥३७॥
नत्र च व्यतिकरे तस्मिन् अवसरे। अंतरीति॥ लज्जया व्रीडया मंथरयोरलसैर्मोक्तयोः दमयंतीनलयोः परस्परमन्या
न्यं मिलत्योः संयुज्यमानायां दृष्टौ तयोर्यः। प्रपातो अन्योन्यं वीक्षणमित्यर्थः तस्मिन् अर्थात् जाते सति हृदये उभयोश्चेतसि
निकृत्य कृता सर्वे समासमकालमेव युगपदेव आविर्गमनुभवन्ति बभुवुः तु विशेषेण विशिष्टरसात्तयोरंतश्चित्त एव कवलं परं उल्लसंति
उद्भवंति॥ न पुनर्बाधागोचरा विषयाः भवाग्निः वक्तुं उक्ष्यत इत्यर्थः। उ अवधारणे। समुच्चये पदे चित्तनेकार्थः॥ तथा एषा
रथानां भवतादयोपि कवयो विवक्षुः युगपत्तेषां उद्भवात् विवेचनं कर्तुं विधातुं न क्षमाः न शक्ताः॥३८॥ अपि च पुनः तत्र व्यतिकरे
तस्मिन्नवसरे। कर्णांतेति॥ स्मरः कामो लक्ष्य द्वयं पि दमयंतीनलरूपं वेध्ययुग्मं पि युगपत् समकालं विशिखान् बाणान् विमुच
न सन् श्रमवान् अभत् खिन्नो बभूव किंभूतः स्मरः संधान बाणज्यासंयोजने सत्वरे शीघ्रः करो यस्य संधाने सत्वरः करो यस्य सह
शीघ्रं बाणं संयोजयन्नित्यर्थः॥ पुनः किंभूतः स्मरः कर्णांतं श्रोत्रपर्यंतं यावत् कृष्टं कर्णांतकृष्टं अत एव वलयीकृतं मं
डलीकृतं चापचक्रं धनुर्मंडलं येन स तथा च चलद्दीप्यमाना या गुणः प्रत्यंचा तस्य स्खलनात् पुनः संघट्टनेन जर्जरित प्र
णप्रकोष्टः कलायिका यस्य सः॥३९॥ अनंतरं परस्परमुखप्रेक्षणात् पश्चात् नलः। आप्तायथार्थवादिनो या सखी तस्याः वच
वचनेन॥ यथा हे दमयंति प्रियाय। अर्घं देहीत्येवं रूपया गिरा स्वयमात्मना अर्घः पुष्पजलादिः तस्य दाने उद्यतां प्रवृत्तां तां राम
दमयंतीं इति अभिधाय तस्याः दमयंत्याः सखिभिः वयस्याभिः॥ सह परिमितो अल्पोयः परिहासो लीलापूर्वकमालापनं

473/1933

न किमपि किंचित जल्पन् किमपि किंचित् नाजल्पन् ये संभाषयन् किमपि ताः हासयन् मुहूर्त्तमिव आसांचक्रे
न स्थितो॥ इति अभिधायेत्यत्र इतीति किं हे उत्पलाक्षि कुवलयलोचने। प्रयासेन अर्घदान व्यायामेन अलं प्रयासं मा
कुरुत्वमित्यर्थः॥ अलमिति वारणे अयं खलु अनुनये अनुनयः प्रसादनं दमयंत्या एव यतस्त्वं परिश्रमस्य खेदस्य पात्रं भा
जनं श्रमिनत्वं व्यायाम सहेत्यर्थः॥ पारिजातमंजरीजरत्पवनेन कर्गतवायुना यत्संखोलनं दोलनं तेन य आयासः श्रमस्त
न सहित दमयंत्याः कल्पतरुमंजरी अर्घदानव्यायोमस्य जरत्पवनप्रखोलनमुपमानं किंभूताभिः सखीभिः स्वादवः सुंद
राः सुधावादुर्लभाः दुःप्रापाः याः सूक्तयः सुभाषिताभि ताएव सुधासेकः पीयूषोक्षणं तेन कोमला मृदवो ये आला
पास्तपुष्पंडिताभिः कुशलाभिः मधुरवचनोक्तिविदुराभिरित्यर्थः स्वादुस्तु सुंदरे मृष्टे इत्यनेकार्थः॥ चिंतितवांश्च॥ न
लो विचारितवांश्च॥ किं तत्॥ लोलेति॥ पक्षालेवा भवत्यो दृशो यस्याः सा तस्याः दमयंत्याः किंचिन्मनाक् साचि दृशा तिर्य
क् नयनयोः कांति मदायमुख उल्लोलेभिव तरंगैरिव यातिस्फुरति। तथा तरंगाः परंपरया स्फुरंति तथा दमयंतीनेत्र कांति
मन्मुखे इति पुनः पुनर्मां वीक्ष्यत इत्यर्थः॥ पक्ष्माणि रोमाणि संत्यस्मिन् इति पक्ष्मलं सिध्मादित्वाल्लुः किंभूतायाः दृ
शाः लोलया विलासेन नांदिवितनर्त्तिनि भ्रुवौ याभ्यां ततयोः। तथा स्मरभरेण कामातिशयेन श्रांते खिन्ने उल्लसंत्यौ
चंचलता तारकनीनिकाय यास्ततयोः। तथा अंतर्मध्यमौक्तिकमालिकावत् धवलयाः वलक्षयाः तथा मुग्धस्मितेन मनाङ्
घटहास्येन स्मरयाः विकस्वरयाः तथा कृता विहिता अनिलेन वायुना चलतिरूपमानयनीलोत्पलकुवलयेन याः स्प
र्द्धां संहर्षायया स्तयोः दृशोर्ध्वलनात् वायुकंपितनीलोत्पलोपमानं॥ अपि च॥ पुनश्चिंतितवान्॥ दृगिति। हेतरुणि
दमयंती क्षणं यावत् अभिमुखं तव सन्मुखं वक्रमाननं यस्य तथाविधं मयि तव एवंविधं वलक्षं धवलं वीक्षितं अवलोकनं त्वं
मा निरोधीः॥ मावारय॥ पुनः पुनः मां वीक्षस्वेत्यर्थः किंभूते मयि विस्मयमानाश्चर्येण स्मेराविकस्वरा दृष्टिर्यस्य सत
स्मिन् पुनः किंभूते मयि चलति अत्र स्वल्पकालात् स्थानात् चंचले अत एव मयि वीक्षण व्याघातं माकार्षीरित्यर्थः किंभू
तं वीक्षितुं दरईषत् मुकुलितासंकोचिता यानेत्रप्रांता तयाः पर्याप्तविक्षिप्ततारकनीनिका सतत अत एवं धवलं वीक्षितं पुनः

नै॰ २॰
१८४

किंभूतं मल्लत्वं सव्रीडं ॥ तथा सस्मितं सविकासं च पुनः ससंभ्रमं सकामं ॥५०॥ किं च पुनः अन्यत् अपरं निविष्टतेपरं प्रकृष्टं यस्मा
त्तदपरमत्युत्कृष्टमिदं वक्ष्यमाणं आशास्महे ॥ आशिषं इमहे ॥ लावण्यमिति ॥ इयं दमयंती सहस्रं समाः वर्षाणि यावत् जीयात्
जीवतु ॥ किंभूतं लावण्यं नयनं लिह्यते स्निग्धं तदेव अमृतं तस्य धाम स्थानं दीर्घिका वापी तया समा ॥ यथा दीर्घिका अमृतेन भृता
भवति । तथैवमपि लावण्यवती ॥ तथा सौंदर्यं च सुंदरता सौभाग्यं च सुभगता तयोः कुलगृहे उत्पत्तिस्थाने ॥ यथा कुलगृ
हे पितृमंदिरे कुमारी स्वैरं क्रीडति ॥ तथा अस्याः सौंदर्यसौभाग्ये ॥ तथा त्रैलोक्यमेव आकरः खानिः तस्मिन् रत्नकंदलि
व यासा यथा आकारे रत्नकंदली श्रेष्ठा तथैव त्रैलोक्य ॥ अहमेवं मन्ये या दमयंती आलोकनवीक्षणकौतुकं आलोकनकौतु
कं लोकस्य आलोकनकौतुकं लोकालोकनकौतुकं ॥ तस्य प्रशमनं लोकाप्रष्टव्यदर्शनात् ॥ दृष्टिफलप्राप्तीत्यर्थः ॥ बहुना स्रष्टुः सा
त्रिस्रष्टुः श्रमेण आदरात् विधाय रूत्या विधिना विधनावेध्यता स्रष्टुः सर्गस्य ध्वजारोहणउपरिपताकाधान्यसनं विहितं ॥ ध्वजो हि प्रासा
दं पूर्णं निर्माय उपर्येव विधीयते ॥ तथा विधिना सर्वां सृष्टिं विधाय उपपताकोपमा विहिता सर्वोत्कृष्टेयमित्यर्थः ॥ अहो आश्च
र्यं अस्य स्तनं ऐतत्कार्थसिद्धः शब्दः गतिस्थापितत्वमक्रीति ॥ रंगेति तुः पुनरर्थे पुनः कुरंगाक्षा दमयंत्या यत्र यत्र
अंगे अवयवे मम मम चक्षुःसंचरं गतिं गच्छति ॥ तत्र तत्रैव बलात् हठात् बाणकरः कुसुमहस्तः स्मरो दृश्यते तस्य साधि
ष्ठानत्वात् मया स्मरबाणबाधा प्राप्यत इत्यर्थः ॥५२॥ इयं दमयंती अन्येषामिंद्रादीनामर्थे अन्यार्थं कथं प्रार्थ्यते ॥ याच्यते ॥ या
च्यते ॥ तत्तस्मात् ॥ अवंध्यस्यापि प्रभावो दासत्वं इतत्वमित्यर्थः ॥ दयतो ॥ यतः परप्रेष्यभावः परपस्य स्वातंत्र्यस्य ॥ स्वच्छास्वारि
त्वस्य स्वातंत्र्यस्य ॥ वायन्मुखं तत्तिरयति ॥ आच्छादयति ॥ स्वातंत्र्यस्य स्वच्छीकरोतीत्यर्थः ॥ तथा पारवश्यस्य परधीनतायाः य:
इन्द्रः संतापः तं अभिमुखं सन्मुखं करोतीति अभिमुखयति ॥ पराधीनता क्लेशं जनयतीत्यर्थः ॥ तथा तिरस्कारं गर्जनं आमंत्र
यति ॥ आह्वयति ॥ तिरस्कारं वितनुत इत्यर्थः ॥ तथा दैन्यं दीनतामादरयति गौरवयति दीनतां कुरुत इत्यर्थः ॥ तथा लघिमानं ला
घवं आह्वयति ॥ आमंत्रयति ॥ तथा हास्यपदं हास्यस्थानं ॥ आवाहयति कारयति ॥ ॥हास्यं कारयती
त्यर्थः ॥ आङ्पूर्वकस्य वहतेः करोत्यर्थत्वात् ॥ तथा औचित्यभंग करणीय विध्वंसमानयति ॥ प्रापयति ॥ ॥तथा

राम
१८४

475/1733

र्पणं ॥ कृपणतां भयातुरं करोतीत्यर्थः अत्र कृपणशब्दो भयातुरार्थः ॥ पदे पदे संति भट्टारणो ह्रदानेन पुहिंसारसणः पूर्यते
धिगीदृशं तेन यत्न कुत्सितं कपाश्रयेयः कृपणपतत्रिणीति नैषधपद्यस्य क्व दिङ्कृपणदिने भयातुरे वेति वा स्यात् अंगीकार्य
ति अभ्युपगमयति ॥ तया तुरतां ॥ तथा वस्तुभावं वस्तुस्वरूपं अपहस्तयति ॥ अधरयति पौरुषं हीकरोति पुरुषास्य तिपदं स
चयत्यते ॥ तथा हीनितदवपरप्रेष्यभावस्य अमत्वं दर्शयति ॥ सोच्छ्वासमिति ॥ सुधियां बुद्धिमतां जनस्य त्वया संजनितं वरिव
स्या कृतं पारवश्यं पराधीनत्वं धिक् ॥ किंभूतं पारवश्यं सोच्छ्वासं उच्छ्वासेन सहितं मरणं अन्यत् मरणं निरुच्छ्वासं इदं च सोच्छ्वासमिति ॥
परवान् जनो जीवन्नपि मृत एव भवतीति भावः ॥१॥ तथा दहनं भस्मीकरणं निरग्नि अग्निरहितं अन्यद्दहनं अग्निना भवति ॥ इदं चा
ग्निं विनापि ॥२॥ तथा निःशृंखलं शृंखलारहितं बंधनं अन्यद्बंधनं शृंखलया भवति ॥ इदं शृंखलां विनापि ३ तथा निःपं
कं पंकं विना मलिनं ॥ मालिन्यभावप्रधानत्वात् निर्देशस्य अन्यत् मालिन्यं पंकेन भवति इदं पंकं विनापि ॥४॥ तथा नरकं दुर्ग
तिं किं च ॥ साग्पामहायातना महापीडा ॥५॥ पुनः पारवश्यं धिक् त्वां कुतो यतो हेतोः पंचानां मरणदहनबंधनमालिन्यनरक
रूपाणां पातकानां मध्ये यत् पारवश्यं अपरं अन्यत् सविशेषं अतिशायि महापातकं महापापं ५३ किं चान्यत् प्रस्तुतेति ॥ प्रकृत
स्य प्रस्तावापन्नस्य वस्तुनो विरोधेन प्रतिकूलत्वेन सर्वोपि उपक्रमः आरंभो ग्राम्यः ॥ अनुचितः सर्वो हि अनुचितं ग्राम्यमिति उच्यते
तत्र दृष्टांतमाह वीणायां पंचावाद्यमानायां सत्यां वंशः अरो वक्राश्चारोन गम्यते ॥ न प्रीणाति प्रकृते न वीणावादनेन सह वंशोद्गारस्य
विरुद्धत्वात् अतो ग्राम्यत्वेन नैतावत् कृच्छ्रं तत्प्रीति प्रकाशयोः तथा प्रस्तुतं किल मम परिणयार्थमागमनं तत्र च विरुद्धं लोकपाला
नामभ्युपगमं कारयितुं दूत्यकर्मेति ॥ तत्तस्मात् किमिदानीं इदं उच्यते ॥ तथा हेलो लाक्षिलो लोकपाला स्वां दमयंती अस्मन्मुखेन अस्माकं
द्वारा वृण्वंति याचंते ॥ उतप्रस्तुतायां अनुरागो भज्यते तस्याः प्रेमबंधस्य प्रस्तुतत्वात् ॥ तस्य भंगो विनाशः ॥ अथ तेषां इंद्रादीनां आदेश
आज्ञा अपह्नूयते अपलप्यते तत्त्वार्थना वा न निवार्यत इत्यर्थः ॥ स्वामिनां च तेषां अन्यथाकृष्यते यथोक्तमिति तर्हि श्रेयः स्खलनं भ
य: प्रतिघातः श्रेयांसि न भवंतीत्यर्थः ॥ अथ यथावृत्तं ॥ यथाभूतं तत्सार्थं तल्लक्षणं आख्यायते कथ्यते तर्हि स्वार्थहानिः तत्तस्मात् स्वार्थ
विघातोवं मनागिष्टं मतं स्वार्थविघातस्यापि मनागिष्टत्वात् वरमित्यव्ययं मनागिष्टं तुः पुनरर्थे न पुनः विश्वस्तानां विश्रब्धानां देवता

नं०३०
१८८

नांचं वनारूपं पातकं पापम कु विश्वस्तजनवंचनस्य महापापरूपत्वात् ॥ इति अमुनाप्रकारेण चिंतयन् मनसा अवधारयन् सन्
सन्नसः नलः अशेषमणिगमन समापपुरंदरादेद्वांदृष्टादिशं समप्रपंचं सविस्तारं आचचक्षे कथयामास ॥ सा दमयंती शोकेन स्मि
तेन चईषद्धास्येन मुग्धरम्येन मुखं यस्याः सा एवंविधा सती इति प्रियंवदिकां त्वया सार्द्धं अन्या अहं तानंगी करिष्येन वेत्येव
रूपोत्तरप्रदानात् अपराया आलापलीला संभाषणविलासः तां अकरोत् अर्थिनोपि लोकपालान् प्रत्यखंडानलं प्रत्यनुरागाग्रह
च अन्या आप्त्याज्ञिनं प्रति यादयां चक्र इत्यर्थः ॥ इतीति किं हे मितिरोपभाषण सरोषाव्रत इत्यर्थः ॥ हे रोषभाषणे नुनयपि वेत्यने
कार्थः ॥ हे प्रियंवदिक प्रियमिष्टं अस्माकं जीवितं प्राणधारणं यस्याः सा एवंविधया अवयामात्रा ॥ तातेन पित्राम ध्यान्हे समाह
यआकार्यत्वं ॥ किं मुक्तासि ॥ नवकिमुक्तमित्यर्थः तथा किं शिक्षितासि कामिक्षा तव प्रदत्ता किमाव ॥ नामणि वितर्क ॥ इयं भामी व
ला अविनीता ॥ अविनयवती ॥ तथा इयं आग्रहात् हठेन यसाव्यातात् इति कथनेन केनापि कर्णजपन पिशुनेन तातस्य हृदयादह किं
दूरीकृता न इति वितर्कः ॥ खलु अनुनय अनुनयः प्रसादनं गुरूणामव गुरवः पिआदयो देवाः वंद्याः नमस्करणीयाः तेभ्योगुरुभ्यो
देवभ्यश्च विभिमनलापि इति अमुनाप्रकारेण पुनर्भूयः तां दमयंतीमभ्यधात् उवाच ॥ इतीति किं मदिरहर्षदायिनी प्रांतरक्त च
नेत्र इति रतिरहस्यान्नत्वात् प्रांतशोणे अक्षिणी नेत्रे यस्याः सा मदिराक्षी तस्याः संबोधने हे मदिराक्षी दमयंति मदिरा मद्यपानं
मदनयति मदनवंतं करोति नकरोति इति णिच् विन्मतालुप्ति इति मतुप्प्रत्ययस्य लुक् ॥ तथा तारुण्यं यौवनं तरलयति चपलयति
तथा धनं अंधयति अंधं करोति व्याकुलं करोतीत्यर्थः ॥ तथा मन्मथः कामः उत्पथयति उत्पथमुन्मार्गं करोतीति उत्पथयति ॥
उन्मार्गप्रवर्त्तयतीत्यर्थः ॥ तथा रूपाभिमानः सौंदर्यगर्वः विरूपयति विरूपं करोति ॥ रूपं तु श्लोकशब्दयोः ॥ पशावाका
रे सौंदर्ये नाणके नाटकादिके ग्रथावृत्तौ स्वभावे चेत्यनेकार्थः ॥ तथा गर्वः खर्वं करोति आः स्मानं नीचः विधत्त इति खर्वयति सर्वत्र
तत्करोति तदाचष्ट इति णिच् ॥ एतत् सर्वांक सर्वजनानां प्रसिद्धं विख्यातं ॥ किंतु हे दमयंति त्वं उदं पूर्वोक्त असत्यतां अनृततामानेषीः
मा प्रापय त्वमपि तथैव कुर्वीत्यर्थः ॥ एतान् नामानुप्राणीष्वति नापि तं वा अथवा नवांगतव सशरीरं सर्वमनंतपूर्वोक्तं व्यभिचरतु अ
न्यथा भवतु ॥ मदिरादयो मदनवनादिकरणानि ॥ भवंत्वित्यर्थः नहि त्वयि चंद्रवन्हिः संभवति नहि अमृते च विषाकाराः संभवंति ॥ १८९

477/1933

तथा त्वं शशिरीपीयूषभावा ॥ मदनवनादिरलमादयोहिवन्हि विषांकुरप्रायाः अन एव त्वयि एतेन संभावयंतीत्यर्थः ॥ तद्धिति
यस्मात् मदिरादय स्त्वां मदनतादि विशिष्टां कर्तुं न क्षमा स्तस्मात् इमं देवादेवां भाव इ्यासीः मानव गणय ॥ यतः अमी लोक
पालाः प्राणीनां यत्नां सर्वथा भवंति ॥ समर्था भवंति ॥ यथा रुचि कंदरं वा कुर्वंतीत्यर्थः ॥ तत्रापि लोकपालेष्वपि विशेषत आ
धिक्येन सकल दिक्शानां सकलदेवानां अधिपतिः स्वामी तथा अशेषस्कराणां समस्तनिर्जराणां यानि किरीटानि मुकुटानि तेषु
या मणिमयूख माला रत्नांशुश्रेणि स्तया अर्चितं पूजितं चरणारविंदं यस्य सः सर्वदेव नम्य इत्यर्थः एवंविधः पुरंदरो देवः तत्त
स्मात् हे दमयंति त्वं अमीषां अमृतभुजां लोकपालदेवानां मध्ये कमपि पुरंदरादिकं वृणुस्व अंगीकुरु ॥ तथा स्वर्गस्य स्थानानि मानय
उपभुंक्ष्व मा निरीह उपभोगार्थं ॥ तथा मर्त्यलोका त्वत्यानि यानि सुखानि तेषां अभूमिः स्थानमसि भूमिशब्दो अ स्थानमात्र वाची
तथा चोक्तं कालीदास कविभार घुकाव्ये उदजांगण भूमि स्थिति ॥ एवं विधे च व्यतिकरे एतादृशः प्रस्ताव राज्ञा देवरणस्वरूपे उक्ते
सति दमयंत्या पुनरुक्तं इदं जल्प्यं वाक्य पंचं असहमानया सोढुं अशक्नुवत्या तस्या मनाक् ईषत् शिरसि तरलितं कंपिते सति ज
ल्पस्य पुनरुक्तता च एकशः पर्वतकनाप्तत्वात् द्वितीयवारेण चस्वयमेव नलेनोक्तत्वात् ॥ दमयंत्या केमेव अरुंतुदं मर्मव्यथकं
अंकुशं असहमानया अरण्यकरिण्या काननहस्तिन्ये इव यथा अरण्यकरिणा अंकुशमसहमानया मनाक् शिरः तरल्यते
तथा तयापि ॥ तया मनसि चेतसि स्तोकं कृतेसति ॥ इंद्रप्रार्थनोक्तो खर्व आत्मानिश्चत्वात् ॥ तथानि सहसोढुमशक्यो योनिश्वा
समरुतसुस्व वायुः तस्मिन् मुक्ते सति ॥ तथा चक्षुषि पराकर्त्तितसति ॥ अशितेसति तथा वदनारविंदं विवर्णतां विच्छाय तामानीते
सति वदने विच्छाये जातेसतीत्यर्थः ॥ प्रस्तावे अवसरे पंडितापि दुषि अस्मिन्नवसरे इदं वक्तव्यमिदं न वक्तव्यमिति ज्ञाना प्रियंव
दिका सखी प्राह ॥ हे देवराजन् श्रोतव्यं श्रवणार्हं कृतं ॥ तथा देवादिशः अवधारितो मनसि धृतः किंतु यं इदमयंती न स्वतंत्रा न स्वा
धीना तन्न हेतुमाह ॥ यतः मदीशितस्य इयं ईश्वरे छायास्क किल इश्वरे छाया प्रवर्त्तते ईश्वरे च्छाया निवर्तित इति ईश्वरेच्छा परवशे
त्यर्थः ॥ च पुनरयं अंगनाजनस्य अनुरागः प्रेमबंधः प्राणिनां आलोचनस्य विचारणस्य गोचरो विषयः न विचारयितुं शक्य
इत्यर्थः ॥ तथा देति ॥ अनो गंजनस्य अनुरागः तस्य प्रेमबंधः प्राणिनां न आलोचनस्य विचारणस्य विचारविषयत्वमेव दर्शयति

न॰टी॰ नीव्रआय। स्नपनतापः स्वर्यातपः संप्रियस्ताद्यस्याः माएवंविधा अंभोजिनीपद्मिनीलोक भपिमनागपिपीयूषश्रावि
१८८ णश्च्वंद्रस्यरुचः कांतिर्नसहतेकिंतुविक्वाया भवतिचपुनर्मालिन्याजातेर्मालिकास्रक् मल्लिकासंकंतनंदलोक्षणेन परिम्लायति
विषमायाभवति अंभोजिन्या जातिस्रजश्चसाक्षान्मूर्ख्यालाध्यवसायान्मकंदरोपनानुरागउक्तस्तथाऽस्या अपिरम्येष्वपिलो
कपाल्युनानुरागइतिभावः एतत्तुवक्ष्यमाणप्रसिद्धंचसर्वं जनविदितंच ॥तदेवाह॥भवतीति॥हेदेवक्कापिकुत्रचित् नसर्वत्रक
स्यापिकस्मिन्नपिहृदयहारीवल्लभाभवतिगुणविशेषः प्रेमबंधस्यप्रयोजकोऽन्यो भरवलुनेवगुणविशेषेणप्रेमबंधोभवतीत्यर्थः
॥एतदेवदृष्टांतेनदृढयति॥बनानवनकिसलययतिपल्लवयति॥वसंतेमधौमाल्लतिजातिर्नविकसति॥नपुष्पतिकोत्रहेतुः कि
मत्रकारणं॥यदिपुनः माधवीशेषपक्षपातप्रेमबंधाभवेत्तदाजातिरपिवसंतेपुष्प्यन्नचपुष्पति। एतावताबहुगुणविशिष्टान
पिलोकपाल्यान। पमित्यत्तत्यंत्वयिवप्रेमवतीनिरूचितं॥पुनर्गुणविशेषंदर्शयति किंभूतवसंतकोकिलानामालापनरम्यः संद
रः कोकिलालापरम्यःतस्मिनवसंतातइत्यत्रअंतशब्दः स्वरूपार्थः एवममुनाप्रकारेण अनेकविधानिबहुप्रकाराणियान्युपाख्या
नानिदृष्टांतानित्वनिपुणयादक्षया॥तयाप्रियंवदिकयासहतस्मिनकाले। अवसरउचितयोग्यंयथाभवतितथा अनुक्रम
प्रकटंयत्स्मितंहास्यंतदेवश्वेतत्वात्सुधापीयूषंतयास्निग्धंचारुयथाभवतितथा अविरुद्धंपूर्वापरविरोधवर्जितंयथाभवतित
थापरिमितः स्तोकंयः परिहासोलीलापूर्वकहास्यंतेनकंदर्पयथाभवतितथा अनुबंधसूत्मानरबुद्धैरवाच्यकरणप्रवृत्त्यारोहितोवर्दिं
तीतःअनुरागोयत्रतत्एवंयथाभवति॥तथाआज्ञाल्यंशास्त्रविहितंयथाभवतितथा अकठोरंकोमलंयथाभवतितथाउष्ठितंयत्रके
प्रियंइत्येवंयथाभवतितथा आलोल्यंस्मा कलोवं जल्पन्। तयाइहकन्यांतःपुरेचिरंस्थातुं अयुक्तमितिचिंतयन्। दमयंती
माप्य नलः पर्यंकिकाप्रस्थान। लघुपल्यंकोपरितनतलात्॥उदतिष्ठत्॥उत्तस्थौ अल्पाल्पमिति॥एकंबहुव्रीहिवदितिपूर्वस्मात्
मितोयः प्रथमंतल्पोत्थानात्पूर्वमुत्थितयासुकाम्नया॥तथालज्जया अवनम्रं॥ईषन्नतंवदनारविंदंयस्याः सातयालज्जावन राम
म्रवदनारविंदया॥तथादमयंत्यासखीवृंदेनवयस्यावृंदेनच।महर्द्धिताणिपदानि अनुगम्यमाने अनुव्रियमाणोनलोविहस
न् सन्॥इदमवदत्॥आयासेनखेदेन अलं अलं आयासंकुरुत्वर्थः संभ्रमेठितंसखंजायतीइत्यभिधायउक्ता स्वसदनंप्रयासीत् १८८

[fold]

479/1933

जगाम स्वगृहेपुनर्गत्वाचशिरीषकुसुमकोमलशयनेसुभसकुमारेशय्यातलेनिषण्णः उपविष्टःसन् चिंतयांचकार॥हर्षादिति॥त
स्यामृगदृशोदमयंत्यानवसंगमेप्रथमसंयोगसन्मुखंवदनंतत्भूयोपिकिंद्रक्ष्येत।तथाविभ्रमुखं।पुनरपिकिंवीक्ष्येत॥अत्रयत्
दृष्टंचतिअथाप्रियवतेकिंभूतंतत। नवसंगमेमुखंहर्षादानंदात्उद्गताःपुलकाःरोमांचाःयत्रतत्उत्पुलकंतथारभसात्वीक्ष
णात्कस्यानिकाभिविकसवशात्तथाकलुकात्उन्मीलितं उन्मुखीकृतं॥तथाशृंगारात्शृंगाररसात्। अलसं। आलस्योपेतं।त
थाभयात् अपरिपाकभिया सहवार्त्ताविधानेनपिप्राहिभ्याभीतत्वरलान्वंचलादृष्टिर्यस्यतत्।चपुनःलज्जाभरात्व्रीडातिश
यात्नम्रंनमनशीलंपुनःकिंभूतंकिंचित्मनाक्कांचनवत्स्वर्णवत्गौरापीतवर्णौयौगंडौकपोलौताभ्यांसकाशात्गलितंक्षरि
तंयत्स्वेदांबुघर्मजलंतेनरम्यंमनोहरंयद्वाऽस्यायामनाविधयातस्याःमृगदृशः॥नक्षितिपूर्वस्वंमुखंनवसंगमेविवाहादूर्ध्वंप्रथमसं
योगेभयापिकिंदृश्येताअयंमुखविशेषणानितान्यवनचरंभयानवात्सात्वपश्चातस्वलदक्॥अपिचपुनः।अपेति।मृगाक्षीह
रिणलोचनाचक्षुःपानअपसरतिनयातिपुनःपुनर्नेमाचामेवपश्यामीत्यर्थः॥चपुनःइयंप्रत्यक्षारजनीनिशानयातिविरहित्वात्
स्वाकापिनवढ़ाजातेत्यर्थः॥तथानिद्रानंदानेनिनायातिनदाभवनाथिकामोपिग्रहस्यति"सस्वयति॥यस्मात्वतइतिखेदेदुःखि
तानांबहूनांबहुभिःप्रकारैःअपायाःप्रत्यूहाःअभिमुखाभवंतीतिसन्मुखाःआयांतेअतएवममापिविरहदुःखितत्वेनेतेअपायाःआना
र्त्तानिरेव॥इतीतिसन्नृपतिर्नलश्चित्तस्यशोभाश्चरणसरोजद्वंद्वं पादपद्मद्वयमाधायसंस्थाप्यस्यत्वेत्यर्थःत्रियामांसत्रिं अनैषीत्
अत्यवाहयत्॥किंभूतोनृपतिःशिवपूर्वाणिप्रकारेणविहिताःकृतायेवितर्कावितकल्पास्तेषांआवेशोहृदिप्रवेशोतेनविध्वस्तानष्टानिद्राय
स्यसःनथाएवंविधंचक्षुर्नेत्रंदधानोबिभ्राणःकिंभूतंचक्षुःजलेनअश्रुजलेनयोजडिमाजडत्वं अनुन्मिषत्वं जलजडिमावर्ततइति
सजलजडिमावर्त्तनइतिसजलजडिमानोन्मुखीभवतीत्यर्थः॥तथामिल्लतिसं।कुंचंतिपक्ष्माणिनेत्ररोमाणियत्रतत्मिलत्पक्ष्मयद्वास
जलेनवजडिम्नामीलितपक्ष्मचेतिसमासःपुनःकिंभूतःउभयस्मिनपिकाराभ्यर्थितभैमीपरिणयनेश्चयत्प्रतिघातःइतितत्परिणयाभ्य
नोनादकसर्वातिशायिरूपावल्लोकनोत्पन्नानुरागाचपरिणयामीत्यभयचसंगआसक्तिःविद्यतेयस्यासोउभयसंगी॥किंचिज्जानाति प
रिणयामि॥किंचिन्नजानातिनपरिणयामीत्युभयत्राभिलाषवानयद्वाउभयस्मिनशंभुपदपद्मस्मरणभैमीमुखपनस्वल्पेवकेन्वसंप

चं०२० निघंतेयस्यासाउभयसंगी॥ अतरीतिगना विनीर्मर्थीत्व॥ ॥प्रत्यंतरत्तु अतिविदग्ध इति पाठः मत्तस्य पत्व उतिवाचनाचार्यश्रीमश्री
१८९ प्रमादमाणिक्यगणिशिष्यश्रीजयसोमगणिशिष्य पंडितश्रीगुणविनयगणिविरचितायां श्रीत्रिविक्रमभट्टविरचित श्रीदमयंती
कथाविवृतौ उप्रमउच्छ्वासः समाप्त॥ श्रीमत्खरतरगच्छमध्येभुवन्नवांगवृत्तिकरा: श्रीमदभयदेवाख्याः पुरावराचार्यगुणमुख्याः
तेषांक्रमणपट्टविख्याता लक्षसंख्यगुणदक्षाः र जैनलधिगंभीराः श्रीजिनमाणिक्यसूरिवरा॥२॥ तत्पदे विशदप्रभाकरस्फु
र्जस्प्रतापोद्भुत॥ वादप्रामतत्याभरापनिमदः पौगसदास्फुरा तत्कृत्यविधानता भुविचमत्कारं विशांचक्रिरे चेतस्सःप्रथमामंग
अभिगमताल्लब्धप्रतिष्ठा श्वय॥ युगप्रधानेषु महाप्रभावश्रियांनिधानेषु विशुद्धबुद्धिषु विराजमानेषु जनेषु तेषु॥ सुतेषु सत्सु जि
नचंद्रसूरिषु॥४॥ श्रीक्षेमशाखा स्फुरधानिशाधिरसभवशा समवाग्विलासा:। श्रीक्षेमराजा भुविपारिजातपूल्लोपमा: पावकल्लक्ष्मि
लक्ष्म्या:॥५॥ तत्पंतुतेषां चवराविनया: सद्भागधेया: स्वगुण: स्मेया: चत्वारआसन्विमलप्रबोधा विधर्नुवेदाइवमूर्तिमंत:॥६॥
॥ शिवमंदरनामानाविलसत्संवेगरूपकलितकाव्या:॥ पाठकपदप्रधाना उभयेपिप्राप्तकीर्तिभरा॥७॥ सद्दृयादयास्तनीयास्सद
यासमतत्न्दयातिलकगणमय: वागुरवावागुरव: तूर्या: शिष्याश्रीजिनयंते॥८॥ श्रीमलबोधमाणिक्यनामधेयास्फुसाधुबलधरा:
भाग्याभ्यधिकास्तेषांविदधनमीपुन: शिष्या:॥१०॥ चत्वारोप्यंबुधिवद्गंभीराक्षोभ्यत्वादिगुणयुक्ता:॥ नचलद्संगतिभाजाभवंतियेस्मिन्
महीपांडे॥१०॥ वागुलगुणारंगाख्यारंगद्भक्तिभागदयाम:॥ श्रीजयसोमास्सोमाननास्तथाक्षेमसोमाह्ला:॥११॥ तत्रश्रीजयसो
मकल्पतरवोभ्रमयप्रमान्नामुषी॥ शाखालीदवागमावरतलासत्पात्रशोभावहा: कीर्तिप्राप्तफला: कलोत्तरकलास्संतीह मसाठका:
श्रीमंतोगुरवोरवोदितरसे: संप्रीणीतप्राणिन:॥१२॥ तेषांशिष्योमुख्योगुणविनयाख्योविमृश्य॥ शास्त्राणिसत्याणिनीय हैमानेकार्थी
आदिमुख्यानि॥१३॥ श्रीचंडपालविरचितं दुर्गपदप्रकटनेक्षमितवृत्तं श्रीचंपूटीप्पनकं पुन: सहांद्समुपज्ञाख्यं॥१४॥ श्रीत्रिविक्र राम
मवंश्याद्भुत सद्दिक्रमराजसिंहरूपराज्ये। मत्कमकर्मचंद्रशिधीसत्तधर्यसंधार्ये १५ श्रीमद्विक्रमभूपते: स्वारसरस्वत्कशक्रप्रमाख्या १८९
तायां शरदिप्रमाद विमरभ्रांतिप्रपोराकुले॥ श्रीसत्कथकनाम्नीभद्रनगरे अर्हच्चैत्यशोभाधरे चक्रे श्रीदमयंत्युदारचरिते टीकामहार्घा

481/1933

सुधा:॥ सदस्याभणीनायां॥ श्रीचंपांस्तसंविदियन्मयावितथंप्रोक्तमतिमादात्र्नचान्यथा॥१७॥ सद्व्याख्यांकुर्वतासंतो॥ नु
ग्रहंमयिधीधना: तत्कृत्तोत्सारंत्वायंयांमावजानंतुकिंचन॥१८॥ युग्मं॥ गच्छत: स्खलनंक्वापिभवत्येवप्रमाद:॥ हसंतिदुर्जना
स्तत्र। समादधतिसज्जना:॥१९॥ आकृतिकबुधविनिर्मितमेतद्व्याख्यानमिति विमृश्येह॥ मावज्ञांकुरुतबुधा: ग्रथानसंवी
क्ष्ययदृक्षां॥२०॥ श्रीफलवर्द्धिकपार्श्व। श्रीमज्जिनदत्तकुशलसूरीणां सौम्यदृशाप्रणतामिह शुभार्थदात्रीरेषास्तात्
वैय्याकरणविशिष्टै: शिष्टै: मदसननिवेकमतिपुष्टै:॥ रत्ननिधानै: वाचकमुख्यै: दक्षै: अशोधिय॥२२ नयेषुदशेषुविशिष्ट
धर्मवार्तां पिबत्यांतिक्तितांसभाज॥ येनपत्तापालनतत्परेण॥ प्रवर्तितस्तेषु विशुद्धधर्म:॥१॥ अनार्यात्रपिदेशा: सद्धर्मभावनया
येनायाविहितायद्दतिस्म: पुष्प: सुवासिता:॥२॥ दोषापहारा नमसोविनाशनात्प्रकाशनात्न्यायपथस्यभूतले॥ श्रीसूर्यसवारू
रणानुसी पंगिणा श्रीमाहिमायनकंतंमहाद्भुतं॥३॥ गवादिप्राणिसंघातघातस्यप्रतिषेधनात् येनकांनादयोकांता। संभोग्येकम
शिरूमा॥४॥ स्वप्नेपिसज्जना: सर्वे यस्यभामामिषंदद्भुतपालयश्चिराद्राज्यंयत्कापावारिवारिधि:॥५॥ अस्यराज्ञ: प्रसत्यामीध
र्मंकुर्वंतिसाधव:॥ तस्माद्यपिजयानिस्वंयनाधर्मकर्त्तामय:॥६॥ यस्यनाम्निविराजंतेविश्रुत्स्महेश्वरा: तेनात्राकवरेत्याख्याख्या
नामर्थ्यभूतले॥७॥ विबुधश्रेणिविराजितसविधवसनंदनश्रियामुदितेतजगोरक्षदक्षा शुभनयपत्त्वाचिदिक्साथ ८ अकबरनृप
धिनपता विग्रविनाशरभुवमममिनवर्षे श्रीमल्लाभपुरीयं प्राकाविपरापरस्फुधियाम्॥९॥ इतिचंपूवृत्ति: समाप्ता सारस्वतीति
नाम्नीदृत्तिरियम्॥ ॥ ॥ श्रीरामायनम:॥ ॥२७॥ ॥७॥

483/1933

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

इतिचंपूवलिः समाप्तिमागमत्